यमस्य केतवो ध्वजा इव मृत्युसूचका इत्यर्थः । नोऽस्माभिः ॥ ५ ॥ प्रत्यक् पश्चिमवाहिनी ॥ ६ ॥ अभिषिच्य स्नात्वा ॥ ७ ॥ ब्राह्मणांश्च तैः कृतशान्तिकाः सन्तो गवादिभिः पूजयिष्यामः ॥ ८ ॥ विधिः प्रकारः मङ्गलायनं च । किंच, देवद्विजगवां पूजा । भव उद्भवहेतुः । देवलोके परम उद्भवो भविष्यतीति भावः ॥ ९ ॥ मधुद्विषो वाक्यमाकर्ण्य तथेत्यभिनन्द्य । उत्तीर्य समुद्रम् ॥ १० ॥ सर्वश्रेयोपबृंहितमित्यत्र संधिरार्षः । भगवतानुक्तैरपि सर्वैः श्रेयोभिः सहितं चक्रुः ॥ ११ ॥ पीयत इति पानम् । मैरेयकं मदिराविशेषम् । मधु सुरसम् । दिष्टेन दैवेन विभ्रंशितधियः । नह्यन्यथा तस्मिन्स्थाने तदुचितमिति

॥ श्रीभगवानुवाच ॥ एते घोरा महोत्पाता द्वार्वत्यां यमकेतवः ॥ मुहूर्तमपि न स्थेयमत्र नो यदुपुङ्गवाः ॥ ५ ॥ स्त्रियो
बालाश्च वृद्धाश्च शङ्खोद्धारं व्रजन्त्वितः ॥ वयं प्रभासं यास्यामो यत्र प्रत्यक्सरस्वती ॥ ६ ॥ तत्राभिषिच्य शुचय उपोष्य
सुसमाहिताः ॥ देवताः पूजयिष्यामः स्नपनालेपनार्हणैः ॥ ७ ॥ ब्राह्मणांस्तु महाभागान्कृतस्वस्त्ययना वयम् ॥ गोभू-
हिरण्यवासोभिर्गजाश्वरथवेश्मभिः ॥ ८ ॥ विधिरेष ह्यरिष्टघ्नो मङ्गलायनमुत्तमम् ॥ देवद्विजगवां पूजा भूतेषु परमो
भवः ॥ ९ ॥ इति सर्वे समाकर्ण्य यदुवृद्धा मधुद्विषः ॥ तथेति नौभिरुत्तीर्य प्रभासं प्रययू रथैः ॥ १० ॥ तस्मिन्
भगवतादिष्टं यदुदेवेन यादवाः ॥ चक्रुः परमया भक्त्या सर्वश्रेयोपबृंहितम् ॥ ११ ॥ ततस्तस्मिन्महापानं पपु-
र्मैरेयकं मधु ॥ दिष्टविभ्रंशितधियो यद्द्रवैर्भ्रश्यते मतिः ॥ १२ ॥ महापानाभिमत्तानां वीराणां दृप्तचेतसाम् ॥ कृष्ण-
मायाविमूढानां संघर्षः सुमहानभूत् ॥ १३ ॥ युयुधुः क्रोधसंरब्धा वेलायामाततायिनः ॥ धनुर्भिरसिभिर्भल्लैर्गदा-
भिस्तोमरर्ष्टिभिः ॥ १४ ॥ पतत्पताकै रथकुञ्जरादिभिः खरोष्ट्रगोभिर्महिषैर्नरैरपि ॥ मिथः समेत्याश्वतरैः सुदुर्मदा
न्यहन् शरैर्दद्भिरिव द्विपा वने ॥ १५ ॥ प्रद्युम्नसाम्बौ युधि रूढमत्सरावक्रूरभोजावनिरुद्धसात्यकी ॥ सुभद्रसंग्राम-
जितौ सुदारुणौ गदौ सुमित्रासुरथौ समीयतुः ॥ १६ ॥ अन्ये च ये वै निशठोल्मुकादयः सहस्रजिच्छतजिद्भानु-
मुख्याः ॥ अन्योन्यमासाद्य मदान्धकारिता जघ्नुर्मुकुन्देन[3] विमोहिता भृशम् ॥ १७ ॥ ॥ ॥

भावः । यद्द्रवैर्यस्य द्रवै रसैः ॥ १२ ॥ कृष्णमायाविमूढानामिति मुख्यो हेतुः । संघर्षः कलहः ॥ ॥ १३ ॥ ततो युयुधुश्च ॥ १४ ॥ पतन्त्य इतस्ततश्चलन्त्यः पताका येषु तै रथादिभिर्मिथः समेत्य न्यहन्न्यघ्नन्नित्यर्थः । दद्भिर्दन्तैरिव ॥ १५ ॥ मिथः समेत्येत्यस्य प्रपञ्चः—प्रद्युम्नेत्यादिचतुर्भिः । गदौ श्रीकृष्णस्य भ्राता एकः, पुत्रश्चापरस्तौ । सुमित्रासुरथाविति दैर्घ्यमार्षम् । असुरथनामा वा कश्चित् ॥ १६ ॥ मदान्धेन मदतमसा बलात्कारिताः ॥ १७ ॥ ॥

१ अत्र—'शापश्च नः कुलस्यासीद्ब्राह्मणेभ्यो दुरत्ययः' इत्यर्धमधिकं क्वचित् । २ 'परमोदयः' इति पाठः । ३ मुक्तिसुखं कुत्सितं यस्मात्स मुकुः प्रेमानन्दस्तं ददाति तेन ।

दाशार्हादयो नव तत्तद्वंश्याः । अर्बुदा माथुराः शूरसेनाश्च तत्तद्देशीयाः ॥ १८ ॥ भ्रातृभिश्चेति भ्रात्रादिशब्दानां सप्रतियोगिवाचित्वाद्भ्रातरो मातुला इत्यादि ज्ञेयम् । मित्रैश्च मित्राणि च । अहन् हतवन्तः ॥ १९ ॥ धन्वसु धनुःषु । जहुर्जगृहुः ॥ २० ॥ परिघा लोहदण्डाः । भृताः धृताः । तं च श्रीकृष्णमपि ॥ २१ ॥ प्रत्यनीकं प्रतिपक्षम् ॥ २२ ॥ एरकामुष्टिरूपौ परिघावुद्यम्य ॥ २३ ॥ स्पर्धानिमित्तः क्रोधः कुलं क्षयं निन्ये ॥ २४ ॥ २५ ॥ पौरुषं योगं परमपुरुषध्यान-

दाशार्हवृष्ण्यन्धकभोजसात्वता मध्वर्बुदा माथुरशूरसेनाः ॥ विसर्जनाः कुकुराः कुन्तयश्च मिथस्ततस्तेऽथ विसृज्य
सौहृदम्[1] ॥ १८ ॥ पुत्रा अयुध्यन्पितृभिर्भ्रातृभिश्च स्वस्रीयदौहित्रपितृव्यमातुलैः ॥ मित्राणि मित्रैः सुहृदः सुहृद्भि-
र्ज्ञातींस्त्वहन् ज्ञातय एव मूढाः ॥ १९ ॥ शरेषु क्षीयमाणेषु भज्यमानेषु धन्वसु ॥ शस्त्रेषु क्षीयमाणेषु मुष्टिभिर्ज-
ह्रुरेरकाः ॥ २० ॥ ता वज्रकल्पा ह्यभवन्परिघा मुष्टिना भृताः ॥ जघ्नुर्द्विषस्तैः कृष्णेन वार्यमाणास्तु तं च ते ॥ २१ ॥
प्रत्यनीकं मन्यमाना बलभद्रं च मोहिताः ॥ हन्तुं कृतधियो राजन्नापन्ना[2] आततायिनः ॥ २२ ॥ अथ तावपि
संक्रुद्धावुद्यम्य कुरुनन्दन ॥ एरकामुष्टिपरिघौ चरन्तौ जघ्नतुर्युधि ॥ २३ ॥ ब्रह्मशापोपसृष्टानां[3] कृष्णमायावृता-
त्मनाम् ॥ स्पर्धाक्रोधः क्षयं निन्ये वैणवोऽग्निर्यथा वनम् ॥ २४ ॥ एवं नष्टेषु सर्वेषु कुलेषु स्वेषु केशवः ॥ अवतारितो
भुवो भार इति मेनेऽवशेषितः ॥ २५ ॥ रामः समुद्रवेलायां योगमास्थाय पौरुषम् ॥ तत्याज लोकं मानुष्यं
संयोज्यात्मानमात्मनि ॥ २६ ॥ रामनिर्याणमालोक्य भगवान्देवकीसुतः ॥ निषसाद धरोपस्थे तूष्णीमासाद्य
पिप्पलम् ॥ २७ ॥ बिभ्रच्चतुर्भुजं रूपं भ्राजिष्णु प्रभया स्वया ॥ दिशो वितिमिराः कुर्वन्विधूम इव पावकः ॥ २८ ॥
श्रीवत्साङ्कं घनश्यामं तप्तहाटकवर्चसम् ॥ कौशेयाम्बरयुग्मेन परिवीतं सुमङ्गलम् ॥ २९ ॥ सुन्दरस्मितवक्त्राब्जं
नीलकुन्तलमण्डितम् ॥ पुण्डरीकाभिरामाक्षं स्फुरन्मकरकुण्डलम् ॥ ३० ॥ कटिसूत्रब्रह्मसूत्रकिरीटकटकाङ्गदैः ॥
हारनूपुरमुद्राभिः कौस्तुभेन विराजितम् ॥ ३१ ॥ ॥ ॥ ॥

लक्षणम् । तमेवाह—संयोज्येति । मानुष्यं लोकं भूर्लोकं मनुष्यरूपतां वा ॥ २६ ॥ धरोपस्थे भूतले ॥ २७ ॥ भ्राजिष्णु रूपं बिभ्रदिति ॥ २८ ॥ तदेवानुवर्णयति—श्रीवत्साङ्कमिति चतुर्भिः ॥ २९ ॥ सुन्दरस्मितं वक्त्राब्जं यस्मिंस्तत् । पुण्डरीकवदभिरामे सुन्दरे अक्षिणी यस्मिंस्तत् ॥ ३० ॥ ३१ ॥ ॥

१ सौहृदं विसृज्यान्योन्यं जघ्नुरिति पूर्वेणान्वयः । २ हन्तुमापन्नाः प्राप्ताः । 'नानास्त्रैराततायिनः' इति बाल० पाठः । ३ व्याख्यान्तरं—ब्रह्मेति । ब्रह्मशापोऽप्युपसृष्टो रुग्णो येभ्यस्तेषां किंवा उपसृष्ट उपप्लवं प्रापितो यैस्तेषां । कृष्णस्य मायावियोगदर्शिकेच्छाप्यावृता येन तादृश आत्मा स्वरूपं येषां तेषां स्पर्धया सहितः क्रोधः क्षयं प्रकाशात्मकं स्थानं प्रति तान्निन्ये । तत्र दृष्टान्तः—यथा वेणुसंघर्षजो वह्निः अवनं तद्वनोत्पन्नातिरिक्तं विद्राव्य तन्निवासमेव प्रापयति तथा प्रपञ्चोत्पन्नातिरिक्तांस्तान्विद्राव्य नित्यं धाम निन्ये इत्यर्थः ।

वनमालापरीतान्यङ्गानि यस्मिंस्तत् । निजायुधैश्च परीताङ्गम् । पङ्कजारुणं वामं पादं दक्षिण ऊरौ कृत्वा आसीनं रूपं बिभ्रदिति पूर्वेणान्वयः ॥ ३२ ॥ जरा नाम कश्चिल्लुब्धको मृगयुः । मृगास्यमिवाकारो यस्य तं चरणम् ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ब्रह्मशापकृतमेतत्तव नापराध इति चेदत आह— यस्य तवात्मयोगरचितं स्वाधीनमायया रचितं विरिञ्चिः अस्य तनया रुद्रादयश्च ये चान्ये गिरां पतयो वेदद्रष्टारस्तेऽपि न विदुस्तस्य तेऽचिन्त्यमायस्य एत-

वनमालापरीताङ्गं मूर्तिमद्भिर्निजायुधैः ॥ कृत्वोरौ दक्षिणे पादमासीनं पङ्कजारुणम् ॥ ३२ ॥ मुसलावशेषायःखण्ड-
कृतेषुर्लुब्धको जरा ॥ मृगास्याकारं तच्चरणं विव्याध मृगशङ्कया ॥ ३३ ॥ चतुर्भुजं तं पुरुषं दृष्ट्वा स कृतकिल्बिषः ॥
भीतः पपात शिरसा पादयोरसुरद्विषः ॥ ३४ ॥ अजानता कृतमिदं पापेन मधुसूदन ॥ क्षन्तुमर्हसि पापस्य उत्तम-
श्लोक मेऽनघ ॥ ३५ ॥ यस्यानुस्मरणं नृणामज्ञानध्वान्तनाशनम् ॥ वदन्ति तस्य ते विष्णो मयाऽसाधु कृतं प्रभो
॥ ३६ ॥ तन्माशु[1] जहि वैकुण्ठ पाप्मानं मृगलुब्धकम् ॥ यथा पुनरहं त्वेवं न कुर्यां सदतिक्रमम् ॥ ३७ ॥ यस्या-
त्मयोगरचितं न विदुर्विरिञ्चो रुद्रादयोऽस्य तनयाः पतयो गिरां ये ॥ त्वन्मायया पिहितदृष्टय एतदञ्जः किं तस्य
ते वयमसद्गतयो गृणीमः ॥ ३८ ॥ ॥ श्रीभगवानुवाच ॥ मा भैर्जरे त्वमुत्तिष्ठ काम एष कृतो हि मे ॥ याहि त्वं
मदनुज्ञातः स्वर्गं सुकृतिनां पदम् ॥ ३९ ॥ इत्यादिष्टो भगवता कृष्णेनेच्छाशरीरिणा ॥ त्रिः परिक्रम्य तं नत्वा विमा-
नेन दिवं ययौ ॥ ४० ॥ दारुकः कृष्णपदवीमन्विच्छन्नधिगम्य ताम् ॥ वायुं तुलसिकामोदमाघ्रायाभिमुखं ययौ ॥ ४१ ॥
तं तत्र तिग्मद्युभिरायुधैर्वृतं ह्यश्वत्थमूले कृतकेतनं पतिम् ॥ स्नेहप्लुतात्मा निपपात पादयो रथादवप्लुत्य स बाष्पलो-
चनः ॥ ४२ ॥ अपश्यतस्त्वच्चरणाम्बुजं प्रभो दृष्टिः प्रनष्टा तमसि प्रविष्टा ॥ दिशो न जाने न लभे च शान्तिं
यथा निशायामुडुपे प्रनष्टे ॥ ४३ ॥ इति ब्रुवति सूते वै रथो गरुडलाञ्छनः ॥ खमुत्पपात राजेन्द्र साश्वध्वज उदी-
क्षतः ॥ ४४ ॥ तमन्वगच्छन्दिव्यानि विष्णुप्रहरणानि च ॥ तेनातिविस्मितात्मानं सूतमाह जनार्दनः ॥ ४५ ॥ ॥

ब्रह्मशापादि अञ्जसा असद्गतयः पापयोनयो वयं किं गृणीमः कथं वर्णयामः । अतस्तदास्ताम् । आशु मां जहीति भावः ॥ ३८ ॥ ३९ ॥ 'इच्छाशरीरिणा' इत्यस्यायं भावः—शुद्धसत्त्वमयीं निजां मूर्तिमन्तर्धाय तत्प्रतिकृत्यैव विडम्बनमात्रमिति । एतदेव स्फुटीकरिष्यति—देवादयो ब्रह्ममुख्या इत्यादिना ॥ ४० ॥ ॥ ४१ ॥ तं पतिं तत्र दृष्ट्वा तस्य पादयोर्निपपात[3] ॥ ४२ ॥ ४३ ॥ उदीक्षतः उदीक्षमाणस्य सूतस्य सतः ॥ ४४ ॥ ४५ ॥ ॥ ॥

---

१ वत्सस्मात्कृतापराधत्वान्मा मां आशु जहीति चक्र० । 'तमाशु' इति विज० पाठे तं लुब्धकमित्यर्थः । 'ममाशु' इत्यपि पाठः । २ दृष्ट्वेत्यध्याहृतम् । ३ निपपात आह चेति शेष इति बाल० ।

निर्याणं योगमार्गेण । मद्दशामितीच्छाशरीरामिप्रायेण ॥ ४६ ॥ ४७ ॥ अविता रक्ष्यमाणा इन्द्रप्रस्थं गमिष्यथेति ब्रूहीति पूर्वेणान्वयः ॥ ४८ ॥ मन्माया-रचनामेतां विज्ञायेति निजमूर्तेरन्तर्हितत्वाद्वृथा शोकं मा कुर्वित्यर्थः ॥ ४९ ॥ कुलस्य विनष्टत्वाद्दुर्मनाः ॥ ५० ॥ इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे भावार्थदीपिकायां टीकायां त्रिंशोऽध्यायः ॥ ३० ॥ ॥ एकत्रिंशे स्वकं धाम जगाम भगवानितः ॥ तमेवानुययुः प्रीत्या वसुदेवादयस्ततः ॥ १ ॥ देवान्यदून्विधायादौ भूयो देवान्विधाय च ॥ श्रीकृष्णः स्वेच्छया धाम स्वतन्वैव समाविशत् ॥ २ ॥ मुनयः सनकादयः । प्रजेश्वरा मरीच्यादयः ॥ १ ॥ द्विजा गरुडलोकनिवासिनः पक्षिणः । मैत्रेयादयो वा ॥ २ ॥ भगवतो निर्याणं द्रष्टुकामाः सन्तः परमोत्सुकास्तत्रागमन् । तेषामौत्सुक्यकृतं महोत्सवमाह

गच्छ द्वारवतीं सूत ज्ञातीनां निधनं[3] मिथः ॥ संकर्षणस्य निर्याणं बन्धुभ्यो ब्रूहि मद्दशाम् ॥ ४६ ॥ द्वारकायां
च न स्थेयं भवद्भिश्च[4] स्वबन्धुभिः ॥ मया त्यक्तां यदुपुरीं समुद्रः प्लावयिष्यति ॥ ४७ ॥ स्वं स्वं परिग्रहं सर्वे
आदाय पितरौ च नः ॥ अर्जुनेनाविताः सर्व इन्द्रप्रस्थं गमिष्यथ ॥ ४८ ॥ त्वं तु मद्धर्ममास्थाय ज्ञाननिष्ठ उपे[5]-
क्षकः ॥ मन्मायारचनामेतां विज्ञायोपशमं व्रज ॥ ४९ ॥ इत्युक्तस्तं परिक्रम्य नमस्कृत्य पुनः पुनः ॥ तत्पादौ
शीर्ष्ण्युपाधाय दुर्मनाः प्रययौ पुरीम् ॥ ५० ॥ ॥ इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे यदुकुल-
संक्षयो नाम त्रिंशोऽध्यायः ॥ ३० ॥ ॥ श्रीशुक उवाच ॥ अथ तत्रागमद्ब्रह्मा भवान्या च समं भवः ॥
महेन्द्रप्रमुखा देवा मुनयः सप्रजेश्वराः ॥ १ ॥ पितरः सिद्धगन्धर्वा विद्याधरमहोरगाः ॥ चारणा यक्षरक्षांसि कि-
न्नराप्सरसो द्विजाः ॥ २ ॥ द्रष्टुकामा भगवतो निर्याणं परमोत्सुकाः ॥ गायन्तश्च गृणन्तश्च शौरेः कर्माणि जन्म
च ॥ ३ ॥ ववृषुः पुष्पवर्षाणि विमानावलिभिर्नभः ॥ कुर्वन्तः संकुलं राजन् भक्त्या परमया युताः ॥ ४ ॥ भग[6]-
वान् पितामहं वीक्ष्य विभूतीरात्मनो विभुः ॥ संयोज्यात्मनि चात्मानं पद्मनेत्रे न्यमीलयत् ॥ ५ ॥ लोकाभि-
रामां स्वतनुं धारणाध्यानमङ्गलम् ॥ योगधारणयाग्नेय्याऽदग्ध्वा धामाविशत्स्वकम् ॥ ६ ॥ ॥

सार्धेन—गायन्तश्चेति ॥ ३ ॥ ४ ॥ विभूतीरिन्द्रादींश्च । 'पद्मनेत्रे न्यमीलयत्' इत्यत्रायं भावः—पूर्वं ब्रह्मादिभिः 'सलोकान् लोकपालान्नः पाहि वैकुण्ठ किङ्करान्' इति प्रार्थितत्वादिदानीं च स्वं स्वं लोकं प्रति नेतुमागतत्वाद्बहुषु च तेषु दाक्षिण्यात्तान्वञ्चयितुं समाधिमिव कुर्वन्नेत्रे न्यमीलयदिति ॥ ५ ॥ योगिनामिव स्वच्छन्दमृत्युभ्रमं वारयति—लोकाभिरामामिति । अयमर्थः—योगिनो हि स्वच्छन्दमृत्यवः स्वां तनुमाग्नेय्या योगधारणया दग्ध्वा लोकान्तरं प्रविशन्ति । भगवांस्तु न तथा, किंत्वदग्ध्वैव स्वतनुसहित एव स्वकं धाम वैकुण्ठाख्यमविशत् । तत्र हेतुः—लोकाभिरामाम् । लोकानामभिरामोऽभितो रमणं

---

१ इतः प्रकटप्रकाशात् । २ देवान् यदून्विधाय पूर्वं तान् तदंशास्तेषु प्रवेशयेत्यर्थः । ३ वस्तुतस्तु निधनं नितरां धनं अप्रकटधामगमनम् । ४ 'भवद्भिश्चः सबन्धुभिः', 'भवद्भिः स्वस्वबन्धुभिः' इति पाठौ । ५ उपेक्षकः पुत्रवित्तादिषूदासीनः । ६ 'भगवानपि तान्वीक्ष्य' इति पाठः ।

स्थितिर्यस्यां ताम् । जगदाश्रयत्वेन जगतोऽपि दाहप्रसङ्गादित्यर्थः । किंच, धारणाया ध्यानस्य च मङ्गलं शोभनम् । विषयमितरथा तयोर्निर्विषयत्वं स्यात् ।
दृश्यते चाद्यापि तदुपासकानां तथैव तद्रूपसाक्षात्कारः फलप्राप्तिश्चेति भावः । इच्छाशरीराभिप्रायेण वा यथाश्रुतमेवास्तु, तत्रापि तु लोकाभिरामामित्या-
दीनां विशेषणानामानर्थक्यप्रसङ्गात्तदप्यदग्ध्वा तिरोधाय निर्गत इत्येव सांप्रतम् ॥ ६ ॥ तदा स्वं स्वमेव लोकमागमिष्यतीति संभ्रमेण देवादिकृतः सर्वतो
दुन्दुभिनादपुष्पवृष्ट्यादिमहोत्सवोऽभवदित्याह—दिवीति । भूमेः सकाशात् । श्रीकृष्णमनु ययुः ॥ ७ ॥ तदा श्रीकृष्णेऽन्तर्हिते सति कुतो गत इति वितर्क-
यन्तोऽपि ब्रह्ममुख्या देवादयः स्वधामनि विशन्तं श्रीकृष्णं न ददृशुः । तत्र हेतुः—अविज्ञातगतिमिति । क्वचित्क्वचिद्ददृशुश्च ततोऽतिविस्मिता बभूवुरि-
त्यर्थः ॥ ८ ॥ अविज्ञातगतित्वं दृष्टान्तेन स्पष्टयति—सौदामन्या गतिर्यथा मर्त्यैर्न लक्ष्यते, देवैस्तु लक्ष्यते तथा भूमण्डलं हित्वा गच्छतः श्रीकृष्णस्य
गतिर्देवैरपि न लक्ष्यते किंतु तत्पार्षदैरेवेत्यर्थः ॥ ९ ॥ ॥ १० ॥ अभिप्रायापरिज्ञानात्प्रथमं परिक्लिष्टं ततश्च दृष्टान्तेन स्पष्टमुक्ते हृष्टं दृष्ट्वा पुनस्तमेवार्थं

दिवि दुन्दुभयो नेदुः पेतुः सुमनसश्च खात् ॥ सत्यं धर्मो धृतिर्भूमेः कीर्तिः श्रीश्चानु तं ययुः ॥ ७ ॥
देवादयो ब्रह्ममुख्या न विशन्तं स्वधामनि ॥ अविज्ञातगतिं कृष्णं ददृशुश्चातिविस्मिताः ॥ ८ ॥ सौदामन्या
यथाकाशे यान्त्या हित्वाऽभ्रमण्डलम् ॥ गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैः ॥ ९ ॥ ब्रह्मरुद्रादयस्ते तु
दृष्ट्वा योगगतिं हरेः ॥ विस्मितास्तां प्रशंसन्तः स्वं स्वं लोकं ययुस्तदा ॥ १० ॥ राजन्परस्य तनुभृज्जननाप्य-
येहा मायाविडम्बनमवेहि यथा नटस्य ॥ सृष्ट्वात्मनेदमनुविश्य विहृत्य चान्ते संहृत्य चात्ममहिनोपरतः स
आस्ते ॥ ११ ॥ मर्त्येन यो गुरुसुतं यमलोकनीतं त्वां चानयच्छरणदः परमास्त्रदग्धम् ॥ जिग्येऽन्तकान्त-
कमपीशमसावनीशः किं स्वावने स्वरनयन्मृगयुं सदेहम् ॥ १२ ॥ ॥ ॥

प्रपञ्चयति—राजन्निति त्रिभिः । परस्य सर्वकारणस्य तनुभृत्सु यादवादिषु जननाप्ययेहाः आविर्भावतिरोभावरूपाश्चेष्टा मायया अनुकरणमात्रमवेहि । नटो
यथाऽविकृत एव नानारूपैर्जन्मादीन्विडम्बयति तद्वत् । आस्तां तावद्यादवादिषु जन्मादिशङ्का, यावद्विश्वसर्गनिरोधादिष्वप्यसावविकृत एवास्त इत्याह—
सृष्ट्वेति । आत्मना स्वयमेवेदं जगत्सृष्ट्वान्तर्यामित्वेनानुविश्य आत्ममहिना स्वमहिम्ना उपरत आस्ते ॥ ११ ॥ न पुनरन्यथा मन्तव्यं, यतोऽस्मिन्नेवावतारे
तत्प्रभावो निरतिशयो दृष्ट इत्याह—मर्त्येनेति । यमेन स्वलोकं प्रति नीतं गुरुसुतं मर्त्येन तेनैव शरीरेण य आनयदानीतवान् । शरणदः शरणागतरक्षकस्त्वां च
ब्रह्मास्त्रदग्धं यो रक्षितवान् । यश्चान्तकानामन्तकमपि ईशं श्रीरुद्रं बाणसंग्रामे जितवान् । मृगयुं लुब्धकं सदेहं स्वः स्वर्गमनयन्निन्ये । असौ स्वावने स्वरक्षणे
अनीशोऽसमर्थः किम् ॥ १२ ॥ ॥ ॥ ॥ ॥

१ स्वावने स्वस्य स्वानां यदूनां चावने रक्षणे । २ स्वमहिम्ना परमानन्दस्वरूपावस्थानेन । कचित्तु 'आत्ममहिमोपरतः' इति मूलपाठो दृश्यते ।

ननु यदि समर्थस्तर्हि किंचित्कालमत्रैव तेनैव वपुषा किं नातिष्ठत्तत्राह—तथापीति । यद्यप्युक्तप्रकारेणाशेषस्य जगतश्चराचरस्य स्थित्यादिष्वनन्यहेतुर्निर-
पेक्ष एव कारणं स्वयं यद्यस्मादशेषशक्तिधृक् तथापि यादवान् संहृत्य निजं वपुरत्र शेषितमवशेषितं प्रणेतुं कर्तुं नैच्छत् किंतु स्वमेव लोकमनयत् । तत्र हेतुः—
मर्त्येन देहेन किं, न किंचित्कार्यमिति स्वस्थानामात्मनिष्ठानां दिव्यां गतिमेव प्रकृष्टां दर्शयन् । अन्यथा तेऽपि दिव्यां गतिमनादृत्य योगबलेन देहसिद्धिं
विधायात्रैव रन्तुं यतेरंस्तन्मा भूदित्येतदर्थमिति भावः ॥ १३ ॥ य एनामुक्तप्रकाराम् । पदवीं गतिम् ॥ १४ ॥ तदैव भगवता स्वलोकं गच्छता वसुदेवा-

तथाप्यशेषस्थितिसंभवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक् ॥ नैच्छत्प्रणेतुं वपुरत्र शेषितं मर्त्येन किं स्वस्थगतिं प्रद-
र्शयन् ॥ १३ ॥ य एतां प्रातरुत्थाय कृष्णस्य पदवीं पराम् ॥ प्रयतः कीर्तयेद्भक्त्या तामेवाप्नोत्यनुत्तमाम् ॥ १४ ॥
दारुको द्वारकामेत्य वसुदेवोग्रसेनयोः ॥ पतित्वा चरणावस्रैर्न्यषिञ्चत्कृष्णविच्युतः ॥ १५ ॥ कथयामास निधनं
वृष्णीनां कृत्स्नशो नृप ॥ तच्छ्रुत्वोद्विग्नहृदया जनाः शोकविमूर्च्छिताः ॥ १६ ॥ तत्र स्म त्वरिता जग्मुः कृष्णविश्लेष-
विह्वलाः ॥ व्यसवः शेरते यत्र ज्ञातयो घ्नन्त आननम् ॥ १७ ॥ देवकी रोहिणी चैव वसुदेवस्तथा सुतौ ॥ कृष्ण-
रामावपश्यन्तः शोकार्ता विजहुः स्मृतिम् ॥ १८ ॥ प्राणांश्च विजहुस्तत्र भगवद्विरहातुराः ॥ उपगुह्य पतींस्तात
चितामारुरुहुः स्त्रियः ॥ १९ ॥ रामपत्न्यश्च तद्देहमुपगुह्याग्निमाविशन् ॥ वसुदेवपत्न्यस्तद्गात्रं प्रद्युम्नादीन्हरेः स्नुषाः ॥
कृष्णपत्न्योऽविशन्नग्निं रुक्मिण्याद्यास्तदात्मिकाः ॥ २० ॥ अर्जुनः प्रेयसः सख्युः कृष्णस्य विरहातुरः ॥ आत्मानं
सान्त्वयामास कृष्णगीतैः सदुक्तिभिः ॥ २१ ॥ बन्धूनां नष्टगोत्राणामर्जुनः सांपरायिकम् ॥ हतानां कारयामास
यथावदनुपूर्वशः ॥ २२ ॥ द्वारकां हरिणा त्यक्तां समुद्रोऽप्लावयत्क्षणात् ॥ वर्जयित्वा महाराज श्रीमद्भगवदालयम्
॥ २३ ॥ नित्यं संनिहितस्तत्र भगवान्मधुसूदनः ॥ स्मृत्याऽशेषाशुभहरं सर्वमङ्गलमङ्गलम् ॥ २४ ॥ स्त्रीबालवृद्धा-
नादाय हतशेषान् धनञ्जयः ॥ इन्द्रप्रस्थं समावेश्य वज्रं तत्राभ्यषेचयत् ॥ २५ ॥ ॥ ॥

दीनामपि तत्प्राप्तये उपायश्चिन्तित आसीत्तमाह—दारुक इत्यादिना ॥ १५ ॥ १६ ॥ १७ ॥ कृष्णरामौ सुतावपश्यन्तः ॥ १८ ॥ १९ ॥ २० ॥
सदुक्तिभिः सत्योऽवितथा उक्तयो येषु तैः, 'नाहं प्रकाशः सर्वस्य योगमायासमावृतः ॥ मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥' इत्यादिभिः ।
॥ २१ ॥ नष्टगोत्राणां नष्टसंततीनाम् । सांपरायिकं पिण्डोदकादि ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ ॥ ॥

१ उक्तप्रकारां सशरीरपरिकरसहिताम् । २ गतिमप्रकटप्रकाशे गमनम् । ३ 'स्वच्छगतिं' इति विज० पाठः । ४ 'पतींस्तांस्तांश्रिताम्' इति पाठः ।

॥ २६ ॥ आदित आरभ्य श्रीकृष्णचरितकीर्तनस्य फलमाह—य एतदिति द्वाभ्याम् ॥ २७ ॥ शंतमानि परममङ्गलानि । परमहंसगतौ श्रीकृष्णे ॥ २८ ॥ एवमेकादशस्कन्धभावार्थस्य प्रदीपिका ॥ स्वाज्ञानध्वान्तभीतेन श्रीधरेण प्रकाशिता ॥ १ ॥ ॥ इति श्रीमद्भागवते महापुराणे अष्टादशसाहस्र्यां वैयासिक्यां पारमहंस्यां संहितायां एकादशस्कन्धटीकायां श्रीधरस्वामिविरचितायां भावार्थदीपिकायामेकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ छ ॥ ॥

॥ समाप्तोऽयमेकादशः स्कन्धः ॥ ११ ॥

श्रुत्वा सुहृद्वधं राजन्नर्जुनात्ते पितामहाः ॥ त्वां तु वंशधरं कृत्वा जग्मुः सर्वे महापथम् ॥ २६ ॥ य एतद्देवदेवस्य विष्णोः कर्माणि जन्म च ॥ कीर्तयेच्छ्रद्धया मर्त्यः सर्वपापैः प्रमुच्यते ॥ २७ ॥ इत्थं हरेर्भगवतो रुचिरावतारवीर्याणि बालचरितानि च शंतमानि ॥ अन्यत्र चेह च श्रुतानि गृणन्मनुष्यो भक्तिं परां परमहंसगतौ लभेत ॥ २८ ॥ ॥ इति श्रीमद्भागवते महापुराणे अष्टादशसाहस्र्यां वैयासिक्यां पारमहंस्यां संहितायां एकादशस्कन्धे एकत्रिंशत्तमोऽध्यायः ॥ ३१ ॥ ॥ ॥ ॥

॥ समाप्तोऽयमेकादशः स्कन्धः ॥ ११ ॥

१ एतज्जन्म तत्र कृतानि चेत्यन्वयः ।

॥ श्रीगोपालकृष्णाय नमः ॥ ॥ श्रीगुरुं परमानन्दं वन्द आनन्दविग्रहम् ॥ यस्य संनतिमात्रेण चिदानन्दायते वपुः ॥ १ ॥ जयन्ति श्रीपरानन्दकृपाऽपाङ्गलसद्दृशः ॥ या नित्यमनुवर्तन्ते संपदो विगताद्दशः ॥ २ ॥ उक्तस्त्रयोदशाध्यायैर्द्वादशे त्वाश्रयः सतः ॥ अधिष्ठानावधित्वाभ्यामाश्रयश्चेश्वरः सतः ॥ ३ ॥ उक्तो लयावधित्वेन प्राकृतात्यन्तिके लये ॥ अधिष्ठानतया चोक्तो महापुरुषवर्णने ॥ ४ ॥ तत्रादौ षड्भिरध्यायैः शुकः प्राह परीक्षिते ॥ शेषैस्तत्राखिलान्याह सूतः पृष्टोऽथ सत्रिभिः ॥ ५ ॥ स्वाश्रयश्रवणे कार्यो न विलम्बो मनीषिणा ॥ इत्येतत्कालवैषम्यं चतुर्भिस्तावदुच्यते ॥ ६ ॥ तत्र तु प्रथमे भावि मागधान्वयभूमिपान् ॥ कलिप्रभावतः प्राह संकरादिमलीमसान् ॥७॥ एवंभूते सोमवंशे मुकुन्दस्वैरक्रीडावर्णिताथो स एव ॥ वंशो भावी वर्ण्यते कृष्णभक्तिं मुक्त्वा मुक्त्यै वर्त्म नास्तीति वक्तुम् ॥ ८ ॥ तदेवं वैवस्वतमनुवंशे सोमवंशप्रस्तावेन श्रीकृष्णावतारचरितानि सप्रपञ्चमनुवर्णितानि, अथेदानीं भावी सोमवंशः कलौ

॥ ॐ नमो भगवते वासुदेवाय ॥ ॥ राजोवाच ॥ स्वधामानुगते कृष्णे यदुवंशविभूषणे ॥ कस्य वंशोऽभवत्पृथ्व्यामेतदाचक्ष्व मे मुने ॥ १ ॥ ॥ श्रीशुक उवाच ॥ योऽन्त्यः पुरञ्जयो नाम भविष्यो बारहद्रथः ॥ तस्यामात्यस्तु शुनको हत्वा स्वामिनमात्मजम् ॥ २ ॥ प्रद्योतसंज्ञं राजानं कर्ता यत्पालकः सुतः ॥ विशाखयूपस्तत्पुत्रो भविता राजकस्ततः ॥ ३ ॥ नन्दिवर्धनस्तत्पुत्रः पञ्च प्रद्योतना इमे ॥ अष्टत्रिंशोत्तरशतं भोक्ष्यन्ति पृथिवीं नृपाः ॥ ४ ॥ शिशुनागस्ततो भाव्यः काकवर्णस्तु तत्सुतः ॥ क्षेमधर्मा तस्य सुतः क्षेत्रज्ञः क्षेमधर्मजः ॥ ५ ॥ विधिसारः सुतस्तस्याजातशत्रुर्भविष्यति ॥ दर्भकस्तत्सुतो भावी दर्भकस्याजयः स्मृतः ॥ ६ ॥ नन्दिवर्धन आजेयो महानन्दिः सुतस्ततः ॥ शिशुनागा दशैवैते षष्ठ्युत्तरशतत्रयम् ॥ ७ ॥ समा भोक्ष्यन्ति पृथिवीं कुरुश्रेष्ठ कलौ नृपाः ॥ महानन्दिसुतो राजन् शूद्रीगर्भोद्भवो बली ॥ ८ ॥ महापद्मपतिः कश्चिन्नन्दः क्षत्रविनाशकृत् ॥ ततो नृपा भविष्यन्ति शूद्रप्रायास्त्वधार्मिकाः ॥ ९ ॥

विजातीयसंकरादिमलीमसो वैराग्यद्वारा श्रीकृष्णैकभक्तिनिगमनायानुवर्ण्यते, तत्र तु सोमवंशशाखासु चिरकालानुवर्तितया मागधवंशोऽनुक्रम्यते, तत्र पूरोर्वंशे उपरिचरो वसुस्तस्य बृहद्रथस्तस्य जरासन्धस्तस्य सहदेवः पुत्रोऽभूदित्युक्तं नवमस्कन्धे । तत्रैव सहदेवान्मार्जारिस्ततः श्रुतश्रवा इत्यादयो रिपुञ्जयान्ता विंशतिर्भाविनो राजानो निरूपिताः । (तत्र राजा पृच्छति—स्वधामेति ॥ १ ॥ इदानीं) तदुपरितनं वंशं संकरादिदोषैः प्रपञ्चयति—योऽन्त्य इति । रिपुञ्जय एव पुरञ्जयः । स्वामिनं पुरञ्जयं हत्वा स्वपुत्रं प्रद्योतसंज्ञं राजानं करिष्यति । यस्य पालको नाम सुतो भविष्यति ॥ २ ॥ ३ ॥ प्रद्योतनाः प्रद्योतसंज्ञाः ॥ ४ ॥ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ नन्दो नाम कश्चिन्महापद्मसंख्याया सेनायाः धनस्य वा पतिर्भविष्यति । अत एव महापद्म इत्यपि तस्य नाम ॥ ९ ॥ ॥

१ अयमधिकः श्लोकः क्वचित् । २ 'यस्य स्मरणमात्रेण' इति पाठः । ३ 'नरः' इति पाठः । ४ दृशो विगताश्चक्षुरगोचरा इत्यर्थः । यद्वा विगता अदृगज्ञानं याभिस्ताः । ५ 'तत्र खिलानि' इति पाठः । ६ 'कर्म' इति पाठः । ७ स्वधामेत्यादिः प्रश्नश्लोको वीरराघवीये एव व्याख्यातः, श्रीधरादिभिरखिलव्याख्याकृद्भिरुपेक्षित एव । ८ 'भाव्यो बार्हद्रथो नृपः' इति पाठः । ९ प्रद्योतेन सह पञ्चेत्यर्थः । १० आजेय इत्येकारमध्यत्वमार्षमिति चक्रवर्ती । ११ भनुश्चिह्नान्तर्गतो भागः केनचित्पूरित इत्यवसीयते ।

एकमेव छत्रं यस्यां तां पृथिवीं शासिष्यति पालयिष्यति । क्षत्रोत्सादने दृष्टान्तः—भार्गवः परशुराम इव ॥ १० ॥ समाः संवत्सरान् ॥ ११ ॥ नव नन्दान्नन्दं च तत्पुत्रांश्चेत्येवं नव । प्रपन्नान्विश्वस्तान्विख्यातान्वा । द्विजः कौटिल्यवात्स्यायनादिपर्यायश्चाणक्य उद्धरिष्यत्युन्मूलयिष्यति । मौर्या मौर्यसंज्ञाः ॥ १२ ॥ कथं भोक्ष्यन्ति तदाह—स एवेति । चन्द्रगुप्तं मौर्यप्रथमम् ॥१३॥ १४॥ तेषां पञ्चमो दशरथः पराशरादिभिरुक्तोऽत्राप्यनुसंधेयः । तेन सह मौर्या दश । सप्तत्रिंशच्छतोत्तरं सप्तत्रिंशदुत्तरं शतं समाः ॥१५॥१६॥१७॥ बृहद्रथस्य सेनापतिः पुष्पमित्रो नाम स्वामिनं बृहद्रथं हत्वा राज्यं करिष्यति । स च शुङ्गानां प्रथमः ।

स एकच्छत्रां पृथिवीमनुल्लङ्घितशासनः ॥ शासिष्यति महापद्मो द्वितीय इव भार्गवः ॥ १० ॥ तस्य चाष्टौ भविष्यन्ति सुमाल्यप्रमुखाः सुताः ॥ य इमां भोक्ष्यन्ति महीं राजानः स्म शतं समाः ॥ ११ ॥ नव नन्दान् द्विजः कश्चित्प्रपन्नानुद्धरिष्यति ॥ तेषामभावे जगतीं मौर्या भोक्ष्यन्ति वै कलौ ॥१२॥ स एव चन्द्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति ॥ तत्सुतो वारिसारस्तु ततश्चाशोकवर्धनः ॥ १३ ॥ सुयशा भविता तस्य सङ्गतः सुयशःसुतः ॥ शालिशूकस्ततस्तस्य सोमशर्मा भविष्यति ॥ १४ ॥ शतधन्वा ततस्तस्य भविता तद्बृहद्रथः ॥ मौर्या ह्येते दश नृपाः सप्तत्रिंशच्छतोत्तरम् ॥ १५ ॥ समा भोक्ष्यन्ति पृथिवीं कलौ कुरुकुलोद्वह ॥ अग्निमित्रस्ततस्तस्मात्सुज्येष्ठोऽथ भविष्यति ॥ १६ ॥ वसुमित्रो भद्रकश्च पुलिन्दो भविता ततः ॥ ततो घोषः सुतस्तस्माद्वज्रमित्रो भविष्यति ॥ १७ ॥ ततो भागवतस्तस्माद्देवभूतिरिति श्रुतः ॥ शुङ्गा दशैते भोक्ष्यन्ति भूमिं वर्षशताधिकम् ॥ १८ ॥ ततः कण्वानियं भूमिर्यास्यत्यल्पगुणान्नृप ॥ शुङ्गं हत्वा देवभूतिं कण्वोऽमात्यस्तु कामिनम् ॥ १९ ॥ स्वयं करिष्यते राज्यं वसुदेवो महामतिः ॥ तस्य पुत्रस्तु भूमित्रस्तस्य नारायणः सुतः ॥ २० ॥ काण्वायना इमे भूमिं चत्वारिंशच्च पञ्च च ॥ शतानि त्रीणि भोक्ष्यन्ति वर्षाणां च कलौ युगे ॥ २१ ॥ हत्वा काण्वं सुशर्माणं तद्भृत्यो वृषलो बली ॥ गां भोक्ष्यत्यन्ध्रजातीयः कंचित्कालमसत्तमः ॥ २२ ॥ ॥

ततोऽग्निमित्रादयो नवेत्येवं शुङ्गा दशवर्षशताधिकं द्वादशाधिकं वर्षशतम् ॥ १८ ॥ कथं कण्वान्यास्यति तदाह—शुङ्गमिति । परस्त्रीकामिनं देवभूतिनामानं शुङ्गं हत्वा तदमात्यो वसुदेवनामा कण्वो राज्यं करिष्यति ॥ १९ ॥ काण्वानां चतुर्थः सुशर्मा ज्ञेयः ॥ २० ॥ इमे वसुदेवादयः काण्वायना वर्षाणां त्रीणि शतानि पञ्चचत्वारिंशद्वर्षाणि च भूमिं भोक्ष्यन्ति ॥ २१ ॥ काण्वानामन्तिमं सुशर्माणं हत्वा बलीनामा तद्भृत्यो गां भोक्ष्यति ॥ २२ ॥ ॥ ॥

१ 'महीं भोक्ष्यन्ति य इमाम्' इति पाठः । २ अत्र 'हत्वा बृहद्रथं मौर्यं तस्य सेनापतिः कलौ । पुष्यमित्रस्तु शुङ्गाह्वः स्वयं राज्यं करिष्यति ॥' इति विज० पाठेऽधिकम् । ३ 'भविता ततः' इति पाठः । ४ 'देवभूतिः कुरूद्वह' इति, 'पारायण इति श्रुतः' इति पाठौ । ५ सुत इत्यनन्तरम् 'सुशर्माख्योऽथ नृपतिः कण्वानां भविता ततः' इति विज० पाठेऽधिकं । क्वचित् 'पारायणस्य भविता सुशर्मा नाम विश्रुतः' इत्यर्धमधिकम् । एतच्च कण्वानां चतुर्थः सुशर्मा ज्ञेय इति व्याख्यानात्र स्वामिसंमतम् । ६ द्वादशाधिकमिति चिन्त्यम् । सिद्धान्तप्रदीपे तु वर्षशताधिकं कतिपयवर्षाधिकं शतं इति व्याख्यातम् । ७ काण्वानामिति बहुत्वं तत्सन्तानस्यापि विवक्षानिबन्धनम् । ८ 'बलिहिकनामा' इत्यपि पाठः । एतन्नामावगतिर्ग्रन्थान्तरतो ज्ञेया । विष्णुपुराणे तु शिप्रकनाम्नोक्तः ।

॥ २३ ॥ २४ ॥ २५ ॥ यत्र येषु बहुसंज्ञेष्वष्टसु चरमः शिवस्वातिनामा भविता ॥ २६ ॥ २७ ॥ २८ ॥ आवभृत्याः अवभृतिर्नगरी तद्राजानः ॥ २९ ॥ ॥ ३० ॥ एते आभीरादयो मौनव्यतिरिक्ताः पञ्चषष्टिनृपा एकोनशताधिकं वर्षसहस्रं पृथिवीं भोक्ष्यन्ति । ततः पूर्वोक्ता एवैकादश मौनास्त्रीण्यब्दशतानि क्षितिं भोक्ष्यन्ति ॥ ३१ ॥ तैः संस्थिते तेषु मृतेषु किलिकिलायां पुर्यां नृपतयो भविष्यन्तीत्युत्तरेणान्वयः ॥ ३२ ॥ अधिकानि षड्वर्षाणि च ॥ ३३ ॥ तेषां भूतनन्दादीनां यथायथं बाह्लिकनामानस्त्रयोदश सुता भविष्यन्ति । अथ पुष्पमित्रो नामान्यो राजन्यः । अस्य च दुर्मित्रो नाम पुत्रः ॥ ३४ ॥ तथा

कृष्णनामाथ तद्भ्राता भविता पृथिवीपतिः ॥ श्रीशान्तकर्णस्तत्पुत्रः पौर्णमासस्तु तत्सुतः ॥ २३ ॥ लम्बोदरस्तु तत्पुत्रस्त[2]स्माच्चिबिलको नृपः ॥ मेघ[3]स्वातिश्चिबिलकादटमानस्तु तस्य च ॥ २४ ॥ अनिष्टकर्मा हालेयस्तलकस्तस्य चात्मजः ॥ पुरीषभीरुस्तत्पुत्रस्ततो राजा सुनन्दनः ॥ २५ ॥ चकोरो ब[4]हवो यत्र शिवस्वातिररिन्दमः ॥ तस्यापि गोमतीपुत्रः पुरीमान्भविता ततः ॥ २६ ॥ मेदशिराः शिवस्कन्दो यज्ञश्रीस्तत्सुतस्ततः ॥ विजयस्तत्सुतो भाव्यश्चन्द्रविज्ञः सलोमधिः॥२७॥एते त्रिंशन्नृपतयश्चत्वार्यब्दशतानि च॥षट्पञ्चाशच्च पृथिवीं भोक्ष्यन्ति कुरुनन्दन॥२८॥ सप्ताभीरा आवभृत्या दश गर्दभिनो नृपाः ॥ कङ्काः षोडश भूपाला भविष्यन्त्यतिलोलुपाः ॥ २९ ॥ ततोऽष्टौ यवना भाव्याश्चतुर्दश तु[5]रुष्ककाः ॥ भू[6]यो दश गुरुण्डाश्च मौना एकादशैव तु ॥ ३० ॥ एते भोक्ष्यन्ति पृथिवीं दशवर्षशतानि च ॥ नवाधिकां च नवतिं मौना एकादश क्षितिम् ॥ ३१ ॥ भोक्ष्यन्त्यब्दशतान्यङ्ग त्रीणि तैः संस्थिते ततः ॥ किलिकिलायां नृपतयो भूतनन्दोऽथ वङ्गिरिः ॥ ३२ ॥ शिशुनन्दिश्च तद्भ्राता यशोनन्दिः प्रवीरकः ॥ इ[7]त्येते वै वर्षशतं भविष्यन्त्यधिकानि षट् ॥ ३३ ॥ तेषां त्रयोदश सुता भवितारश्च बाह्लिकाः ॥ पुष्पमित्रोऽथ राजन्यो दुर्मित्रोऽस्य तथैव च ॥ ३४ ॥ एककाला इमे भूपाः सप्तान्ध्राः सप्त कौशलाः ॥ विदूरपतयो भाव्या निषधास्तत एव हि ॥ ३५ ॥ मागधानां तु भविता विश्वस्फूर्जिः पुरञ्जयः ॥ करिष्यत्यपरो वर्णान्पुलिन्दयदुमद्रकान् ॥ ३६ ॥ ॥

आन्ध्राः कोशला विदूरपतयो निषधाश्च एते च तत्तद्देशनामभिः प्रख्यातास्तुल्यकालाः खण्डमण्डलेषु भूपास्तत एव तेभ्यो बाह्लिकेभ्य एव भाव्या भविष्यन्ति ॥ ३५ ॥ ततश्च मागधानां तु राजा विश्वस्फूर्जिर्नाम भविता । स चापूर्वोक्तात्पुरञ्जयादपरः पुरञ्जय इति प्रसिद्धः सन्वर्णान्ब्राह्मणादीन्पुलिन्दयदुमद्रकसंज्ञान्म्लेच्छप्रायान्करिष्यति । अपरानिति पाठे अन्यान्पुलिन्दादिसंज्ञान्वर्णान्करिष्यतीत्यर्थः ॥ ३६ ॥ ॥ ॥

१ एतद्व्याख्यानं बल्यादिलोमधिपर्यन्तानां राज्ञां त्रिंशत्संख्यापूर्तिप्रदर्शनाय । मूलस्थबहव इत्यस्य बहुसंज्ञा इत्यर्थः । २ 'तस्माद्धि विकलः' इति पाठः । ३ 'मेघस्वातिश्च विकलात्' इति पाठः । ४ 'नवमो यत्र' इति पाठः । ५ 'च पुष्कसाः' इति पाठः । ६ 'त्रयोदश गुरुण्डाश्च' इति पाठः । अत एवोत्तरश्लोकटीकायां पञ्चषष्टिनृपा इत्यत्राष्टषष्टिनृपा इति पाठः । ७ 'युक्ता एते' इति पाठः ।

किंचैवं कृत्वाऽब्रह्मभूयिष्ठा अत्रैवर्ण्यप्रचुराः सतीः प्रजाः स्थापयिष्यति पालयिष्यति । स च पद्मवत्यां पुरि वसन् अनुगङ्गां गङ्गाद्वारमारभ्य प्रयागपर्यन्तं गुप्तां पालितां मेदिनीं भोक्ष्यति ॥ ३७ ॥ तदनन्तरं च सौराष्ट्रादिदेशवर्तिनो द्विजा व्रात्या उपनयनरहिता भविष्यन्ति ॥ ३८ ॥ अब्रह्मवर्चसो वेदाचारशून्याः ॥ ३९ ॥ इमे च म्लेच्छप्राया भूभृतस्तुल्यकाला भविष्यन्ति । किंच, एते सर्वेऽधर्मानृतपरा अधर्मेऽनृते च परिनिष्ठिताः फल्गुदा अल्पदातारः ॥ ४० ॥ उदितास्तमितप्राया हर्षशोकादिबहुलाः ॥ ४१ ॥ असंस्कृता गर्भाधानादिसंस्काररहिताः । प्रजा भक्षयिष्यन्ति धनाद्यपहारादिना पीडयिष्यन्ति ॥ ४२ ॥ किंच, तन्नाथाः ते नाथा येषां ते जनपदा देशवर्तिनो मनुष्यास्तच्छीलाचारवादिनस्तेषामिव शीलमाचारो वादश्च तद्वन्तः ॥ ४३ ॥ ॥ इति श्रीमद्भागवते महा-

प्रजाश्चाब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतिः ॥ वीर्यवान्क्षत्रमुत्साद्य पद्मवत्यां स वै पुरि ॥ अनुगङ्गामाप्रयागं गुप्तां भोक्ष्यति मेदिनीम् ॥ ३७ ॥ सौराष्ट्रावन्त्याभीराश्च शू[1]रा अर्बुदमालवाः ॥ व्रात्या द्विजा भविष्यन्ति शूद्रप्राया जनाधिपाः ॥ ३८ ॥ सिन्धोस्तटं चन्द्रभागां कौ[2]न्तीं काश्मीरमण्डलम् ॥ भोक्ष्यन्ति शूद्रा व्रात्याद्या म्लेच्छाश्चाब्रह्मवर्चसः ॥ ३९ ॥ तुल्यकाला इमे राजन्म्लेच्छप्रायाश्च भूभृतः ॥ एतेऽधर्मानृतपराः फल्गुदास्तीव्रमन्यवः ॥४०॥ स्त्रीबालगोद्विजघ्नाश्च परदारधनादृताः॥ उदितास्तमितप्राया अल्पसत्त्वाल्पकायुषः ॥ ४१ ॥ असंस्कृताः क्रियाहीना रजसा तमसा वृताः ॥ प्रजास्ते भक्षयिष्यन्ति म्लेच्छा राजन्यरूपिणः ॥ ४२ ॥ तन्नाथास्ते जनपदास्तच्छीलाचारवादिनः ॥ अन्योन्यतो राजभिश्च क्षयं यास्यन्ति पीडिताः ॥ ४३ ॥ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे प्रथमोऽध्यायः ॥ १ ॥ ॥ श्रीशुक उवाच ॥ ततश्चानुदिनं धर्मः सत्यं शौचं क्षमा दया ॥ कालेन बलिना राजन्नङ्क्ष्यत्यायुर्बलं स्मृतिः ॥ १ ॥ वित्तमेव कलौ नृणां जन्मा[3]चारगुणोदयः ॥ धर्मन्यायव्यवस्थायां कारणं बलमेव हि ॥ २ ॥ दाम्पत्येऽभिरुचिर्हेतुर्मा[4]यैव व्यावहारिके ॥ स्त्रीत्वे पुंस्त्वे च[5] हि रतिर्विप्रत्वे सूत्रमेव हि ॥३॥ लिङ्गमेवाश्रमख्यातावन्योन्यापत्तिकारणम् ॥ अवृत्त्या न्यायदौर्बल्यं पाण्डित्ये चापलं वचः ॥ ४ ॥ ॥

पुराणे द्वादशस्कन्धे भावार्थदीपिकायां टीकायां प्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥ ॥ द्वितीये तु कलेर्दोषवृद्धौ कल्क्यवतारतः ॥ अधर्मिष्ठे जने नष्टे पुनः कृतयुगागमः ॥ १ ॥ कलिधर्मान्प्रपञ्चयति—ततश्चेत्यादिना ॥ १ ॥ धर्मन्याययोर्व्यवस्थायां बलमेव ॥ २ ॥ दाम्पत्ये भार्यापतिभावेऽभिरुचिरेव हेतुर्न कुलगोत्रादिः । व्यावहारिके क्रयविक्रयादौ । स्त्रीत्वे पुंस्त्वे च तयोः श्रैष्ठ्ये रतिकौशलमेव हेतुर्न कुलमाचारो वा ॥ ३ ॥ आश्रमाणां ख्यातौ ज्ञाने लिङ्गमेव दण्डाजिनादिकं हेतुर्न त्वाचारविशेषः । अन्योन्यापत्तिकारणं चाश्रमादाश्रमान्तरप्राप्तौ च कारणम् । यद्वा बहूदकहंसादीनामन्योन्यापत्तौ नमस्कारादि-

१ शूराः शूराख्यदेशजाः । 'शूद्राः' इति पाठः क्वचित् । २ कौन्तीं पुरीमिति बाल० । ३ जन्माद्युत्कर्षहेतुः । ४ माययैव कपटमेव । ५ 'चाभिरतिः' इति पाठः ।

व्यवहारे कारणम् । अवृत्त्या मुद्रार्पणादिदानासामर्थ्येन न्याये दौर्बल्यं पराजयः । चापलं वचो बहुभाषणम् ॥ ४ ॥ असाधुत्वे चौर्याद्यभियोगे । प्रसाधनमलंकारः ॥ ५ ॥ दूरे वर्तमानं वार्ययनं जलाशयस्तीर्थं, न तु गुर्वादि । स्वार्थः पुरुषार्थः ॥ ६ ॥ ७ ॥ ८ ॥ आच्छिन्ना अपहृता दारा द्रविणानि च यासां ताः । अष्टिर्बीजम् ॥ ९ ॥ १० ॥ ११ ॥ क्षीयमाणेष्वित्यादीनामित्थं कलौ गतप्राय इति पञ्चमेनान्वयः । क्षीयमाणेष्वल्पप्रायेषु ॥ १२ ॥ दस्युप्रायेषु चौरतुल्येषु । चौर्यानृतवृथाहिंसाद्या नानावृत्तयो येषां तेषु ॥ १३ ॥ छागप्रायासु प्रमाणतः क्षीरतश्चाजातुल्यासु ॥ १४ ॥ अणुप्रायासु श्यामाकतुल्यासु । स्थास्नुषु वृक्षेषु ।

अनाढ्यतैवासाधुत्वे साधुत्वे दम्भ एव तु ॥ स्वीकार एव चोद्वाहे स्नानमेव प्रसाधनम् ॥ ५ ॥ दूरे वार्ययनं तीर्थं लावण्यं केशधारणम् ॥ उदरम्भरता स्वार्थः सत्यत्वे धार्ष्ट्यमेव हि ॥ ६ ॥ दाक्ष्यं कुटुम्बभरणं यशोर्थे धर्मसेवनम् ॥ एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमण्डले ॥७॥ ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृपः ॥ प्रजा हि लुब्धै राजन्यैर्निर्घृणैर्दस्युधर्मभिः ॥ ८ ॥ आच्छिन्नदारद्रविणा यास्यन्ति गिरिकाननम् ॥ शाकमूलामिषक्षौद्रफलपुष्पाष्टिभोजनाः ॥ ९ ॥ अनावृष्ट्या विनङ्क्ष्यन्ति दुर्भिक्षकरपीडिताः ॥ शीतवातातपप्रावृड्हिमैरन्योन्यतः प्रजाः ॥१०॥ क्षुत्तृड्भ्यां व्याधिभिश्चैव संतप्स्यन्ते च चिन्तया ॥ त्रिंशद्विंशतिवर्षाणि परमायुः कलौ नृणाम् ॥११॥ क्षीयमाणेषु देहेषु देहिनां कलिदोषतः ॥ वर्णाश्रमवतां धर्मे नष्टे वेदपथे नृणाम् ॥ १२ ॥ पाखण्डप्रचुरे धर्मे दस्युप्रायेषु राजसु ॥ चौर्यानृतवृथाहिंसानानावृत्तिषु वै नृषु ॥१३॥ शूद्रप्रायेषु वर्णेषु छागप्रायासु धेनुषु ॥ गृहप्रायेष्वाश्रमेषु यौनप्रायेषु बन्धुषु ॥१४॥ अणुप्रायास्वोषधीषु शमीप्रायेषु स्थास्नुषु ॥ विद्युत्प्रायेषु मेघेषु शून्यप्रायेषु सद्मसु ॥ १५ ॥ इत्थं कलौ गतप्राये जने तु खरधर्मिणि ॥ धर्मत्राणाय सत्त्वेन भगवानवतरिष्यति ॥ १६ ॥ चराचरगुरोर्विष्णोरीश्वरस्याखिलात्मनः ॥ धर्मत्राणाय साधूनां जन्म कर्मापनुत्तये ॥१७॥ शम्भलग्राममुख्यस्य ब्राह्मणस्य महात्मनः ॥ भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति ॥ १८ ॥

विद्युत्प्रायेषु तडिद्बहुलेषु । शून्यप्रायेषु धर्मादिरहितेषु सद्मसु गृहेषु ॥ १५ ॥ जने तु खरधर्मिणि दुःसहचेष्टिते कलौ गतप्राये समाप्तप्राये ॥ १६ ॥ एतत्प्रपञ्चयति चतुर्भिः—चराचरगुरोरीश्वरस्येति च । धर्मत्राणे हेतुः—गुरुत्वेश्वरत्वयोरुपपादनमखिलस्य विश्वस्यात्मनः कारणस्येति । एवंभूतस्य विष्णोर्जन्म साधूनां धर्मत्राणाय । धर्मत्राणप्रयोजनमाह—कर्मापनुत्तये मोक्षाय ॥ १७ ॥ शम्भलग्रामे मुख्यस्य प्रधानस्य नाम्ना विष्णुयशसो ब्राह्मणस्य । भवने गृहे ॥ १८ ॥ ॥

१ 'लावण्ये' इति सप्तम्यन्तपाठे सौन्दर्ये हेतुरित्यर्थः । लावण्ये निमित्ते केशधारणमेव करिष्यन्ति इति सप्तम्यन्तानामन्वयः । २ हिमं नीहारः । ३ 'सन्तापेन च' इति पाठे विनङ्क्ष्यन्तीति योज्यम् । ४ अत्र तुगभावः । ५ आश्रमेषु संन्यासादिषु परिग्रहादिना गृहस्थाश्रमतुल्येषु । ६ योनिसंबन्धेन संबन्धिनः श्यालादयस्तद्बहुलेषु । ७ छायाद्यभावेन शमीतुल्येषु । ८ 'शाखिषु' इति पाठः । ९ 'जनेषु खरधर्मिषु' इति पाठः । १० 'परावरगुरोः' इति पाठः । ११ कर्मापनुत्तये निःश्रेयसप्रतिबन्धिकर्मनिवर्तनाय ।

धर्मत्राणप्रकारमाह—अश्वमिति । असाधवो दम्यन्ते येन तमश्वमारुह्यासिना दस्यून्कोटिशो निहनिष्यतीत्युत्तरेणान्वयः । असाधुदमन इति पाठे कल्किविशेषणम् । अणिमाद्यष्टैश्वर्याणि गुणाश्च सत्यसंकल्पत्वादयस्तैरन्वितः ॥ १९ ॥ तत्प्रपञ्चः—आशुना शीघ्रगामिना तेन हयेनाश्वेन क्षोण्यां पृथिव्यां विचरन् । नृपलिङ्गच्छदो राजवेषच्छन्नान् ॥ २० ॥ ततश्च पुनः कृतयुगप्रवृत्तिं वक्तुमाह—अथेति सार्धाभ्याम् । तेषां पौरजानपदानां मनांसि विशदानि भविष्यन्ति । तत्र हेतुः—वासुदेवस्याङ्गरागेण चन्दनादिनातिपुण्यगन्धो योऽनिलस्तं स्पृशन्तीति तथा तेषाम् ॥ २१ ॥ स्थविष्ठः स्थूलः ॥ २२ ॥ कृतयुगप्रवृत्तिमाह—यदावतीर्ण इति । प्रजानां सूतिः प्रसूतिः ॥ २३ ॥ तदवतारकालोपलक्षणमाह—यदा चन्द्रश्चेति । तिष्यः पुष्यः । अयमर्थः—चन्द्रसूर्यबृहस्पतीनां यदा पुष्यनक्षत्रे योगस्तदा तत्कृतयुगं भविष्यति । यद्यपि च प्रतिद्वादशाब्दं कर्कराशौ बृहस्पतौ वर्तमाने द्वित्रास्वमावास्यासु तेषां त्रयाणामपि पुष्ययोगः संभवति, तथापि तेषां सह प्रवेशोऽत्र विवक्षितः । तमेष्यन्तीति वचनात् । अतो नातिप्रसङ्गः ॥ २४ ॥ एवं नवमस्कन्धमारभ्यानुक्रान्तं वैवस्वतमनोर्वंशद्वयं निगम-

अश्वमाशुगमारुह्य देवदत्तं जगत्पतिः ॥ असिनाऽसाधुदमनमष्टैश्वर्यगुणान्वितः ॥ १९ ॥ विचरन्नाशुना क्षोण्यां हयेनाप्रतिमद्युतिः ॥ नृपलिङ्गच्छदो दस्यून्कोटिशो निहनिष्यति ॥ २० ॥ अथ तेषां भविष्यन्ति मनांसि विशदानि वै ॥ वासुदेवाङ्गरागातिपुण्यगन्धानिलस्पृशाम् ॥ पौरजानपदानां वै हतेष्वखिलदस्युषु ॥ २१ ॥ तेषां प्रजाविसर्गश्च स्थविष्ठः संभविष्यति ॥ वासुदेवे भगवति सत्त्वमूर्तौ हृदि स्थिते ॥ २२ ॥ यदाऽवतीर्णो भगवान्कल्किर्धर्मपतिर्हरिः ॥ कृतं भविष्यति तदा प्रजासूतिश्च सात्त्विकी ॥ २३ ॥ यदा चन्द्रश्च सूर्यश्च तथा तिष्यबृहस्पती ॥ एकराशौ समेष्यन्ति तदा भवति तत्कृतम् ॥ २४ ॥ येऽतीता वर्तमाना ये भविष्यन्ति च पार्थिवाः ॥ ते त उद्देशतः प्रोक्ता वंशीयाः सोमसूर्ययोः ॥ २५ ॥ आरभ्य भवतो जन्म यावन्नन्दाभिषेचनम् ॥ एतद्वर्षसहस्रं तु शतं पञ्चदशोत्तरम् ॥ २६ ॥ सप्तर्षीणां तु यौ पूर्वौ दृश्येते उदितौ दिवि ॥ तयोस्तु मध्ये नक्षत्रं दृश्यते यत्समं निशि ॥ २७ ॥

यति—येऽतीता इति । उद्देशतः संक्षेपतः ॥ २५ ॥ कलियुगावान्तरविशेषं वक्तुमाह—आरभ्येत्यादिना । वर्षसहस्रं पञ्चदशोत्तरं शतं चेति कयापि विवक्षयावान्तरसंख्येयम् । वस्तुतस्तु परीक्षिन्नन्दयोरन्तरं द्वाभ्यां न्यूनं वर्षाणां सार्धसहस्रं भवति । यतः परीक्षित्समकालं मागधं मार्जारिमारभ्य रिपुञ्जयान्ता विंशतिराजानः सहस्रसंवत्सरं भोक्ष्यन्तीत्युक्तं नवमस्कन्धे—'ये बार्हद्रथभूपाला भाव्याः साहस्रवत्सरम्' इति । ततः परं पञ्च प्रद्योतना अष्टत्रिंशोत्तरं शतम् । शिशुनागाश्च षष्ट्युत्तरशतत्रयं भोक्ष्यन्ति पृथिवीमित्यत्रैवोक्तत्वात् ॥ २६ ॥ कलेः प्रवृत्तिं वृद्धिं च निरूपयितुं कालज्ञानोपलक्षणमाह—सप्तर्षीणां त्विति । अयमर्थः—प्रागग्रशकटाकारं तारासप्तकं सप्तर्षिमण्डलम् । तत्र किंचिदुन्नतेषाग्रस्थानीयो मरीचिः । ततः पश्चादानम्रयुगकन्धराकारो वसिष्ठः सभार्यः । ततः पश्चादीषदुन्नतेषामूलस्थानीयोऽङ्गिराः । ततः पश्चाच्चतुरस्रताराचतुष्के ऐशान्यामत्रिः । ततो दक्षिणतः पुलस्त्यः । पुलस्त्यात्पश्चिमतः पुलहः । तत उत्तरतः

१ नवमे उपक्रान्तः—'श्रूयतां मानवो वंशः प्राचुर्येण परंतप । न शक्यते विस्तरतो वक्तुं वर्षशतैरपि ॥' इत्यादिना ।

क्रतुः । एवं स्थिते तेषां मध्ये यौ पूर्वौ उदयसमये प्रथममुदितौ दृश्येते पुलहक्रतुसंज्ञौ तयोस्तु मध्ये तयोः पूर्वयोस्तु मध्ये यत्समं दक्षिणोत्तररेखायां समदेशावस्थितमश्विन्यादिषु यदन्यतमं नक्षत्रं दृश्यते, तेन तथैव युक्ता ऋषयः नृणामब्दशतं तिष्ठन्ति, ते च द्विजास्त्वदीये कालेऽधुना मघा आश्रिता[1] वर्तन्ते॥२७॥२८॥ तेषु मघासु वर्तमानेषु सत्सु यदा विष्णोर्भानुर्भातीति भानुः शुद्धसत्त्वात्मको देहो दिवं वैकुण्ठं गतस्तदा कलियुगमविशत् । यद्यस्मिन्युगे जनः पापे रमते इति कलियुगस्य लक्षणम् ॥ २९ ॥ ननु श्रीकृष्णे पृथिव्यां वर्तमानेऽपि संध्यारूपेण कलिः प्रविष्ट एवासीत्, सत्यम्, तथापि तावत्तस्य पराक्रमो नाभवदित्याह—यावदिति । पराक्रान्तुमभिभवितुम् ॥ ३० ॥ अतो यथोक्त एव कलिप्रवेशकाल इत्याह—यदा देवर्षय इति । द्वादशाब्दशतात्मक इति । दिव्येन मानेन संध्यासंध्यांशाभ्यां सह यो द्वादशाब्दशतात्मकः स कलिस्तदा संध्यामतिक्रम्य प्रविष्ट इत्यर्थः ॥ ३१ ॥ कलेः प्रवेशकालमुक्त्वा तस्य वृद्धि-

तेनैव ऋषयो युक्तास्तिष्ठन्त्यब्दशतं नृणाम् ॥ ते त्वदीये द्विजाः[2] काले अधुना चाश्रिता मघाः ॥२८॥ विष्णोर्भगवतो भानुः कृष्णाख्योऽसौ दिवं गतः ॥ तदाऽविशत्कलिर्लोकं पापे यद्रमते जनः ॥ २९ ॥ यावत्स पादपद्माभ्यां स्पृशन्नास्ते रमापतिः ॥ तावत्कलिर्वै पृथिवीं पराक्रान्तुं न चाशकत् ॥ ३० ॥ यदा देवर्षयः सप्त मघासु विचरन्ति हि॥ तदा प्रवृत्तस्तु कलिर्द्वादशाब्दशतात्मकः ॥ ३१ ॥ यदा मघाभ्यो यास्यन्ति पूर्वाषाढां महर्षयः ॥ तदा नन्दात्प्रभृत्येष कलिर्वृद्धिं गमिष्यति ॥ ३२ ॥ यस्मिन्कृष्णो दिवं यातस्तस्मिन्नेव[3] तदाहनि ॥ प्रतिपन्नं कलियुगमिति प्राहुः पुराविदः ॥ ३३ ॥ दिव्याब्दानां सहस्रान्ते चतुर्थे तु पुनः कृतम् ॥ भविष्यति यदा[4] नृणां मन आत्मप्रकाशकम् ॥ ३४ ॥ इत्येष मानवो वंशो यथा संख्यायते भुवि ॥ तथा विट्शूद्रविप्राणां तास्ता[6] ज्ञेया युगे युगे ॥ ३५ ॥ एतेषां नामलिङ्गानां पुरुषाणां महात्मनाम् ॥ कथामात्रावशिष्टानां कीर्तिरेव स्थिता भुवि ॥ ३६ ॥

कालमाह—यदेति । तदा प्रद्योतनात्प्रभृति वृद्धिं गच्छन्नन्दात्प्रभृत्यतिवृद्धिं गमिष्यतीत्यर्थः ॥ ३२ ॥ ननु यदा कलेर्लिङ्गमुपलब्धं तदैव प्रविष्ट इति युक्तम्, ततः पूर्वमेव प्रवेशस्ततः परं वृद्धिरित्यत्र किं प्रमाणं तत्राह—यस्मिन्निति । प्रतिपन्नं प्रविष्टमिति ज्ञातम् । पुराविदः पूर्वज्ञातारः ॥ ३३ ॥ कलेरनन्तरं कृतयुगप्रवेशमाह—दिव्याब्दानामिति । चतुर्थे कलौ प्रवेशनाब्दपरिमितेनांशेनापि सहातीते सति[5]त्यर्थः । कृतयुगप्रवेशचिह्नमाह—यदा नृणां मन आत्मप्रकाशकं भविष्यति तदेति ॥ ३४ ॥ राजवंशोक्तां स्थितिं ब्राह्मणादिवंशेष्वप्यतिदिशति—इत्येष इति । यथा याभिरुच्चनीचावस्थाभिः । तास्ता अवस्थाः । वंशा[6] इति वा पाठः ॥ ३५ ॥ एतत्कीर्तनस्य वैराग्योपयोगितामाह—एतेषामिति । नामैव लिङ्गं ज्ञापकं येषां तेषां कथामात्रेणैवावशिष्टानां कीर्तिरेव स्थिता न तु राज्यं पुत्रादयो वा ॥ ३६ ॥ ॥ ॥ ॥ ॥

१ पूर्वयोर्मघानां च साम्यावस्थित्युपक्रमकालः कलियुगारम्भकाल इति सूचितं तच्चाग्रे स्पष्टमेव वदिष्यति । २ द्विजाः सप्तर्षयः । ३ तस्मिन्नेवाहनि तदा तस्मिन्नेव क्षणे । ४ 'तदा' इति पाठः । ५ कलिसंध्यांशे इति यावत् । ६ 'तास्ताः' इत्यस्य स्थाने इति ज्ञेयम् ।

कलावुत्सन्नानां राजवंशानां पुनः प्रवृत्तिप्रकारमाह—देवापिः सोमवंशजः । मरुस्तु सूर्यवंशजः । कलापग्रामो नाम योगिनामावासः प्रसिद्धः ॥ ३७ ॥ ३८ ॥ इममेव प्रकारं प्रतिचतुर्युगं दर्शयति—कृतमिति ॥ ३९ ॥ 'एतेषां नामलिङ्गानाम्' इत्यादि यदुक्तं तत्प्रपञ्चयति—राजन्निति पञ्चभिः ॥ ४० ॥ ममत्वं कृत्वेत्यनेन सूचितां भूतद्रोहप्रवृत्तिं निन्दति—कृमीति । राजनाम्नो राजेति नाम यस्य तस्यापि देहस्यान्ते कृमयो विष्ठा भस्मेति वा संज्ञा भविष्यति । तत्कृते तदर्थं यो भूतध्रुक् भूतेभ्यो द्रुह्यति स किं स्वार्थं वेद । किंतु न वेदैव । कुत इत्यपेक्षायां हेतुत्वेन भूतद्रोहं विशिनष्टि—यतो भूतद्रोहान्निरयो भवति ॥ ४१ ॥ ममत्वप्रकारं प्रपञ्चयति—कथमिति । सेयमखण्डा भूर्मे पूर्वजैर्धृता सती इदानीं मत्पूर्वा च सती मत्पुत्रादेः कथं स्यादित्येवम् ॥ ४२ ॥ उभौ महीं कायं च ।

देवापिः शन्तनोर्भ्राता मरुश्चेक्ष्वाकुवंशजः[1] ॥ कलापग्राम आसाते महायोगबलान्वितौ ॥ ३७॥ ताविहैत्य कलेरन्ते वासुदेवानुशिक्षितौ॥ वर्णाश्रमयुतं धर्मं पूर्ववत्प्रथयिष्यतः॥ ३८॥ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम् ॥ अनेन[2] क्रमयोगेन भुवि प्राणिषु वर्तते ॥ ३९॥ राजन्नेते मया प्रोक्ता नरदेवास्तथापरे ॥ भूमौ ममत्वं कृत्वान्ते हित्वेमां निधनं गताः ॥ ४० ॥ कृमिविड्भस्मसंज्ञान्ते राजनाम्नोऽपि यस्य च ॥ भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः ॥ ४१ ॥ कथं सेयमखण्डा भूः पूर्वैर्मे पुरुषैर्धृता ॥ मत्पुत्रस्य च पौत्रस्य मत्पूर्वा वंशजस्य वा ॥ ४२ ॥ तेजोबन्नमयं कायं गृहीत्वात्मतयाऽबुधाः ॥ महीं[3] ममतया चोभौ हित्वान्तेऽदर्शनं गताः ॥ ४३ ॥ ये ये भूपतयो राजन्भुञ्जते भुवमोजसा॥ कालेन ते कृताः सर्वे कथामात्राः कथासु च ॥ ४४ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥ ॥ छ ॥ ॥ श्रीशुक उवाच ॥ दृष्ट्वात्मनि जये व्यग्रान्नृपान्हसति भूरियम् ॥ अहो मा विजिगीषन्ति मृत्योः क्रीडनका नृपाः ॥ १ ॥ काम एष नरेन्द्राणां मोघः स्याद्विदुषामपि ॥ येन फेनोपमे पिण्डे येऽतिविश्रम्भिता नृपाः ॥ २ ॥ ॥ ॥

अदर्शनं मृत्युम् ॥ ४३ ॥ उपसंहरति—ये ये इति । ते सर्वे च कथासु क्रियमाणासु । कथामात्राः कालेन कृताः ॥ ४४ ॥ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे भावार्थदीपिकायां टीकायां द्वितीयोऽध्यायः ॥ २ ॥ ॥ छ ॥ ॥ तृतीये भूमिगीतैश्च राज्यदोषादि वर्ण्यते ॥ कलौ च दोषभूयिष्ठे दोषहन्त्री हरेर्नतिः ॥ १ ॥ देहेऽहंतां भूमौ च ममतां कुर्वन्त्यतोऽबुधा इत्युक्तं तदेव भूमिगीतैः प्रपञ्चयति—दृष्ट्वेत्यादि । आत्मनि पृथिव्या जये व्यग्रानुद्युक्तान् । हासप्रकारमेवाह—अहो इति । मा माम् ॥ १ ॥ येन कामेन । फेनोपमे पिण्डे देहेऽतिविश्रम्भिता विश्वासं नीता ये तेषां नरेन्द्राणामेष कामो मोघ एव स्यात् ॥ २ ॥ ॥ ॥ ॥ ॥ ॥

१ 'मरुदिक्ष्वाकुवंशजः' इति मूलटीकयोः पाठः । स एव युक्तः, नवमस्कन्धे मरुदित्येव कथनात् । २ यद्यप्यत्र त्रेताद्वापरयोः प्रकारो नोक्त इत्यनेन क्रमयोगेनेत्यसंगतं तथाप्याद्यन्तयुगयो रीतिनिरूपणे मध्ययोरपि निरूपितप्रायैवेत्यभिप्रायेण तथोक्तम् । ३ महीं च ममतया गृहीत्वेत्यन्वयः ।

काममेव दर्शयति द्वाभ्याम्—पूर्वमिति। इन्द्रियार्थलम्पटस्य न राज्यप्राप्तिः स्यादिति प्रथममिन्द्रियषड्वर्गं निर्जित्य राजमन्त्रिणो जेष्यामो वशीकरिष्यामः। सचिवा अमात्याः करीन्द्रा हस्तिपास्तांश्च जेष्यामः। कण्टकान्प्रतिपक्षान्। अस्य अपास्य। 'अथ कण्टकान्' इति वा पाठः॥ ३॥ ४॥ एवं केचिदाशाबद्धा एव केचिन्मां पुनर्जित्वाप्यतितृष्णयाब्धिं विशन्ति। तदेवमिन्द्रियजयेन ये राज्यं साधयितुमिच्छन्ति तेऽतिमन्दा इत्याह—कियदिति॥५॥ 'अन्तकं न पश्यन्ति' इत्युक्तं तदेवाह—यामिति। कुरूद्वहेति भूमिगीतं कथयन् शुकः संबोधयति। 'कुलोद्वहाः' इति तु पाठः सुगमः॥ ६॥ 'अबुद्धयः' इत्युक्तं

पूर्वं निर्जित्य षड्वर्गं जेष्यामो राजमन्त्रिणः॥ ततः सचिवपौराप्तकरीन्द्रानस्य कण्टकान्॥ ३॥ एवं क्रमेण
जेष्यामः पृथ्वीं सागरमेखलाम्॥ इत्याशाबद्धहृदया न पश्यन्त्यन्तिकेऽन्तकम्॥ ४॥ समुद्रावरणां जित्वा मां
विशन्त्यब्धिमोजसा॥ कियदात्मजयस्यैतन्मुक्तिरात्मजये फलम्॥ ५॥ यां विसृज्यैव मनवस्तत्सुताश्च कुरू-
द्वह॥ गता यथागतं युद्धे तां मां जेष्यन्त्यबुद्धयः॥ ६॥ मत्कृते पितृपुत्राणां भ्रातॄणां चापि विग्रहः॥ जायते
ह्यसतां राज्ये ममताबद्धचेतसाम्॥ ७॥ ममैवेयं मही कृत्स्ना न ते मूढेति वादिनः॥ स्पर्धमाना मिथो घ्नन्ति
म्रियन्ते मत्कृते नृपाः॥ ८॥ पृथुः पुरूरवा गाधिर्नहुषो भरतोऽर्जुनः॥ मान्धाता सगरो रामः खट्वाङ्गो धुन्धुहा
रघुः॥ ९॥ तृणबिन्दुर्ययातिश्च शर्यातिः शन्तनुर्गयः॥ भगीरथः कुवलयाश्वः ककुत्स्थो नैषधो नृगः॥ १०॥
हिरण्यकशिपुर्वृत्रो रावणो लोकरावणः॥ नमुचिः शम्बरो भौमो हिरण्याक्षोऽथ तारकः॥ ११॥ अन्ये च बहवो
दैत्या राजानो ये महेश्वराः॥ सर्वे सर्वविदः शूराः सर्वे सर्वजितोऽजिताः॥ १२॥ ममतां मय्यवर्तन्त कृत्वोच्चै-
र्मर्त्यधर्मिणः॥ कथावशेषाः कालेन ह्यकृतार्थाः कृता विभो॥ १३॥ कथा इमास्ते कथिता महीयसां विताय लोकेषु
यशः परेयुषाम्॥ विज्ञानवैराग्यविवक्षया विभो वचोविभूतीर्न तु पारमार्थ्यम्॥ १४॥ ॥

तत्प्रपञ्चयति—मत्कृत इति॥ ७॥ ८॥ रामो नाम कश्चिद्राजा। यद्वा, लोकदृष्ट्या दाशरथिरेव निर्दिष्टः॥ ९॥ १०॥ लोकं रावयति रोदयतीति लोकरावणः॥ ११॥ १२॥ मयि उच्चैर्ममतां कृत्वा येऽवर्तन्त ते कालेन कथावशेषाः कृताः। विभो इति संबोधनं कुरूद्वहेतिवत्॥ १३॥ राजवंशानुकथनस्य तात्पर्यमाह—कथा इमा इति। विज्ञानं विषयासारताज्ञानं ततो वैराग्यं तयोर्विवक्षया परेयुषां मृतानां वचोविभूतीर्वाग्विलासमात्ररूपा न तु पारमार्थ्यं परमार्थं युक्तं कथनं न भवतीत्यर्थः॥ १४॥ ॥ ॥ ॥ ॥

१ छान्दसो ल्यप्। २ अब्धिं विशन्ति द्वीपान्तरानभिजयन्ति। ३ धुन्धुमारः। ४ 'कुवलयः' इति कचित्पाठः, तत्रापि नामैकदेश इति न्यायेन कुवलयाश्व एव। ५ सर्वजितः स्वयमजिताश्च। सर्वशब्दावृत्तिरतिहर्षेणातिदार्ढ्यविवक्षया च। ६ महीयसां भगवदवतारभागवतेभ्य इतरेषां महाराजानाम्। ७ न तु पारमार्थ्यं न पुरुषार्थभूयस्त्वमित्यर्थः।

कस्तर्हि पुरुषाणामुपादेयः परमार्थस्तमाह—यस्त्विति। नित्यं प्रत्यहम्। तत्राप्यभीक्ष्णम्॥ १५॥ कलिदोषोपचये सति भक्तेरसंभवं मन्यमानः पृच्छति—केनोपायेनेति। विधमिष्यन्ति नाशयिष्यन्ति। यथा यथावत्॥ १६॥ कलियुगे कः परो धर्म इति बुभुत्सया पृच्छति—युगानीति। ब्रूहीत्यनुषङ्गः। आत्यन्तिकप्रलयजिज्ञासया पुनः पृच्छति—प्रलयकल्पयोः संहारस्थितिकालयोः। न चायं बहिर्मुखः प्रश्न इत्याह—कालस्येति॥ १७॥ तत्र युगधर्मांस्तावदाह—कृत इति। तज्जनैस्तत्कालीनैर्जनैः। दानमरागद्वेषतयाऽभयदानम्। तदेव प्रथमस्कन्धे शौचशब्देनोक्तम्। विभोः संपूर्णस्य धर्मस्य॥ १८॥

यस्तूत्तमश्लोकगुणानुवादः संगीयतेऽभीक्ष्णममङ्गलघ्नः॥ तमेव नित्यं शृणुयादभीक्ष्णं कृष्णेऽमलां भक्तिमभीप्स-
मानः॥ १५॥ ॥ राजोवाच॥ केनोपायेन भगवन्कलेर्दोषान्कलौ जनाः॥ विधमिष्यन्त्युपचितांस्तन्मे ब्रूहि यथा
मुने॥ १६॥ युगानि युगधर्मांश्च मानं प्रलयकल्पयोः॥ कालस्येश्वररूपस्य गतिं विष्णोर्महात्मनः॥ १७॥ ॥ श्रीशुक
उवाच॥ कृते प्रवर्तते धर्मश्चतुष्पात्तज्जनैर्धृतः॥ सत्यं दया तपो दानमिति पादा विभोर्नृप॥ १८॥ संतुष्टाः करुणा
मैत्राः शान्ता दान्तास्तितिक्षवः॥ आत्मारामाः समदृशः प्रायशः श्रमणा जनाः॥ १९॥ त्रेतायां धर्मपादानां
तुर्यांशो हीयते शनैः॥ अधर्मपादैरनृतहिंसाऽसंतोषविग्रहैः॥ २०॥ तदा क्रियातपोनिष्ठा नातिहिंस्रा न लम्पटाः॥
त्रैवर्गिकास्त्रयीवृद्धा वर्णा ब्रह्मोत्तरा नृप॥ २१॥ तपःसत्यदयादानेष्वर्धं ह्रसति द्वापरे॥ हिंसातुष्ट्यनृतद्वेषैर्धर्मस्या-
धर्मलक्षणैः॥ २२॥ यशस्विनो महाशीलाः स्वाध्यायाध्ययने रताः॥ आढ्याः कुटुम्बिनो हृष्टा वर्णाः क्षत्रद्विजो-
त्तराः॥ २३॥ कलौ तु धर्महेतूनां तुर्यांशोऽधर्महेतुभिः॥ एधमानैः क्षीयमाणो ह्यन्ते सोऽपि विनङ्क्ष्यति॥ २४॥
तस्मिँल्लुब्धा दुराचारा निर्दयाः शुष्कवैरिणः॥ दुर्भगा भूरितर्षाश्च शूद्रदाशोत्तराः प्रजाः॥ २५॥ सत्त्वं रजस्तम
इति दृश्यन्ते पुरुषे गुणाः॥ कालसंचोदितास्ते वै परिवर्तन्त आत्मनि॥ २६॥ ॥ ॥

तदानीन्तनजनानाह—संतुष्टा इति। मैत्रा भूतमैत्रीयुक्ताः। श्रमणा आत्माभ्यासवन्तः॥ १९॥ अनृतेन सत्यं, हिंसया दया, असंतोषेण तपः, विग्रहेण दानमिति यथासंख्यं योज्यम्॥ २०॥ ब्रह्मोत्तरा ब्राह्मणाधिकाः॥ २१॥ हिंसाऽतुष्ट्यनृतद्वेषैरित्ययं क्रमो न विवक्षितः। धर्मस्यार्धं ह्रसति क्षीयते। अधर्मस्य लक्षणैश्चिह्नैः, पादैरित्यर्थः॥ २२॥ यशस्विनः कीर्तिप्रियाः। क्षत्रद्विजोत्तराः क्षत्रियब्राह्मणप्रधानाः॥ २३॥ कलौ धर्मपादानां तुर्यांशश्चतुर्थांशोऽवशिष्यते॥ २४॥ शूद्रदाशोत्तराः शूद्रकैवर्तादिप्रधानाः॥ २५॥ युगानामेवंभूतवैषम्ये कारणमाह—सत्त्वमिति पञ्चभिः॥ २६॥ ॥ ॥ ॥

१ उत्तमश्लोकानां भगवदवताराणां भागवतानां च गुणानुवादः। २ त्रेतायामित्यादिकं प्रथमस्कन्धसंदर्भानुसारेण सम्यग्ज्ञेयम्। ३ त्रयीवृद्धा वैदिककर्मवृद्धाः। ४ महाशीलाः महायज्ञानुष्ठानशीलाः। 'महाशाला' इति पाठस्तत्रापि यज्ञकर्तार इत्येवार्थः। ५ धर्महेतूनां सत्यादीनाम्। 'धर्मपादानाम्' इति पाठः। ६ आत्मन्यन्तःकरणे परिवर्तन्ते यातायातं कुर्वन्ति।

मनश्च बुद्धिश्चेन्द्रियाणि च सत्त्वे यदा प्रभवन्त्यतिशयेन वर्तन्ते ॥ २७ ॥ यदा धर्मादिषु भक्तिः प्रीतिस्तदा रजोवृत्तिप्रधानं त्रेतायुगमिति जानीहि ॥ २८ ॥ काम्यानां कर्मणां विषये यदा प्रीतिस्तत्तदा रजस्तमःप्रधानं द्वापरं जानीहीति पूर्वेणानुषङ्गः ॥२९॥ विषादनं दुःखम् ॥३०॥ कलिदोषान्प्रपञ्चयति—यस्मादित्यादिना । यस्मात्कलेर्हेतोः । क्षुद्रदृशो मन्दमतयः। क्षुद्रभाग्या अल्पभाग्याः । महाशना बह्वाहाराः। वित्तहीना अपि कामिनश्च । स्वैरिण्यः पुंश्चल्यः । असतीरसत्यः ॥३१॥ दस्यव उत्कृष्टाः प्रचुरा येषु ते ॥३२॥ अव्रता विहिताचारशून्याः । अशौचाः शौचशून्याश्च बटवो ब्रह्मचारिणो भविष्यन्ति। कुटुम्बिनश्च गृहस्थाः स्वयं भिक्षाटनपरा भविष्यन्ति, न तु भिक्षां दास्यन्ति। तपस्विनो वनस्था वनं हित्वा ग्रामवासा भविष्यन्ति। न्यासिनो यतयोऽतीवार्थलोलुपा भविष्यन्ति ॥३३॥ पुनरपि

प्रभवन्ति यदा सत्त्वे मनोबुद्धीन्द्रियाणि च ॥ तदा कृतयुगं विद्याज्ज्ञाने तपसि यद्रुचिः ॥ २७ ॥ यदा[2] धर्मार्थकामेषु भक्तिर्भवति देहिनाम् ॥ तदा त्रेता रजोवृत्तिरिति जानीहि बुद्धिमन् ॥ २८ ॥ यदा लोभस्त्वसंतोषो मानो दम्भोऽथ मत्सरः ॥ कर्मणां चापि काम्यानां द्वापरं तद्रजस्तमः ॥ २९ ॥ यदा मायानृतं तन्द्रा निद्रा हिंसा विषादनम् ॥ शोको मोहो भयं दैन्यं स कलिस्तामसः स्मृतः ॥ ३० ॥ यस्मात्क्षुद्रदृशो मर्त्याः क्षुद्रभाग्या महाशनाः ॥ कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोऽसतीः ॥ ३१ ॥ दस्यूत्कृष्टा[1] जनपदा वेदाः पाखण्डदूषिताः ॥ राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः ॥३२॥ अव्रता बटवोऽशौचा भिक्षवश्च कुटुम्बिनः ॥ तपस्विनो ग्रामवासा न्यासिनोऽत्यर्थलोलुपाः ॥ ३३ ॥ ह्रस्वकाया महाहारा भूर्यपत्या गतह्रियः ॥ शश्वत्कटुकभाषिण्यश्चौर्यमायोरुसाहसाः ॥ ३४ ॥ पणयिष्यन्ति वै क्षुद्राः किराटाः कूटकारिणः ॥ अनापद्यपि मंस्यन्ते वार्तां साधु जुगुप्सिताम् ॥ ३५ ॥ पतिं त्यक्ष्यन्ति निर्द्रव्यं भृत्या अप्यखिलोत्तमम् ॥ भृत्यं विपन्नं[3] पतयः कौलं गाश्चापयस्विनीः[4] ॥ ३६ ॥ पितृभ्रातृसुहृज्ज्ञातीन्हित्वा सौरतसौहृदाः ॥ ननान्दृ[5]स्यालसंवादा दीनाः स्त्रैणाः कलौ नराः ॥ ३७ ॥ ॥

स्त्रीणां स्वभावमाह—ह्रस्वकाया इति । कटुकभाषिण्योऽप्रियवादिन्यः। चौर्यं च माया कपटमुरु च साहसं यासां ताः ॥३४॥ किंच, किराटा वणिजः। पणयिष्यन्ति क्रयविक्रयादिव्यवहारं प्रवर्तयिष्यन्ति । किंच, सर्वे जना अनापद्यपि जुगुप्सितां निन्दितां वार्तां वृत्तिं साधु मंस्यन्ते ॥ ३५ ॥ सर्वोत्तममपि पतिं द्रव्यहीनं भृत्यास्त्यक्ष्यन्ति । पतयश्च विपन्नं[3] रोगादिभिर्व्यापाराक्षमं कौलं कुलपरम्परायातं त्यक्ष्यन्ति । अपयस्विनीर्दु[4]र्धदोहाः ॥ ३६ ॥ सौरतं सुरतनिमित्तं सौहृदं येषां ते । अत एव ननान्दरोऽत्र भार्याभगिन्यः, स्याला भार्याभ्रातरस्तैः संवादो मन्त्रालोचनं येषां ते । [5]ननन्द इति वा पाठः ॥ ३७ ॥ ॥

१ दस्यूत्कृष्टा दस्यूपद्रुताः इति विज० । २ 'यदा कर्मसु काम्येषु भक्तिर्यशसि देहिनाम्' इति मूलपाठो यदा च कर्मादिषु भक्तिरित्यादिष्टीकापाठश्च क्वचित्। तत्र काम्येषु सकामधर्मेष्विति पृथक्कोटिः। ३ विपन्नं वृद्धत्वादिना कार्यानर्हम् । ४ दुग्धो दोहो यासां ताः इतःपरं दोह्यं यासु न विद्यते तथाविधाः वृद्धा इत्यर्थः। ५ ननन्दृपर्यायो ननान्दृशब्दोऽप्यस्ति। 'ननन्दुः' इति वा पाठः।

॥ ३८ ॥ ३९ ॥ पिशाचसंदर्शाः पिशाचसदृशाः ॥ ४० ॥ काकिणिके विंशतिवराटकामात्रेऽप्यर्थे विषयभूते । विगृह्य वैरं कृत्वा ॥ ४१ ॥ ४२ ॥ महान्तमनर्थमाह द्वाभ्याम्—कलाविति । त्रिलोकनाथैरानतं नमस्कृतं पादपङ्कजं यस्य तम् । न यक्ष्यन्ति न पूजयिष्यन्ति । पाखण्डैर्विभिन्नमन्यथा कृतं चेतो येषां ते ॥ ४३ ॥ विवशो गृणन्सन् । विमुक्ताः कर्मरूपा अर्गलाः प्रतिबन्धा यस्य सः ॥ ४४ ॥ तदेवं कलिदोषान्प्रपञ्च्य प्रस्तुतं तन्निस्तारोपायमाह—पुंसामिति

शूद्राः प्रतिग्रहीष्यन्ति तपोवेषोपजीविनः ॥ धर्मं वक्ष्यन्त्यधर्मज्ञा अधिरुह्योत्तमासनम् ॥ ३८ ॥ नित्यमुद्विग्नमनसो दुर्भिक्षकरकर्शिताः ॥ निरन्ने भूतले राजन्ननावृष्टिभयातुराः ॥ ३९ ॥ वासोऽन्नपानशयनव्यवायस्नानभूषणैः ॥ हीनाः पिशाचसंदर्शा[1] भविष्यन्ति कलौ प्रजाः ॥४०॥ कलौ काकिणिकेऽप्यर्थे विगृह्य त्यक्तसौहृदाः ॥ त्यक्ष्यन्ति च प्रियान्प्राणान् हनिष्यन्ति स्वकानपि ॥ ४१ ॥ न रक्षिष्यन्ति मनुजाः स्थविरौ पितरावपि ॥ [3]पुत्रान्सर्वार्थकुशलान्क्षुद्राः शिश्नोदरंभराः ॥ ४२ ॥ कलौ न राजन् जगतां परं गुरुं त्रिलोकनाथानतपादपङ्कजम् ॥ प्रायेण मर्त्या भगवन्तमच्युतं यक्ष्यन्ति पाखण्डविभिन्नचेतसः ॥ ४३ ॥ यन्नामधेयं म्रियमाण आतुरः पतन्स्खलन्वा विवशो गृणन्पुमान् ॥ वि[4]मुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति यक्ष्यन्ति न तं कलौ जनाः ॥ ४४ ॥ पुंसां कलिकृतान्दोषान् द्रव्यदेशात्मसंभवान् ॥ सर्वान्हरति चित्तस्थो भगवान्पुरुषोत्तमः ॥ ४५ ॥ श्रुतः संकीर्तितो ध्यातः पूजितश्चादृतोऽपि वा ॥ नृणां धुनोति भगवान् हृत्स्थो जन्मायुताशुभम् ॥ ४६ ॥ यथा हेम्नि स्थितो वह्निर्दुर्वर्णं हन्ति धातुजम् ॥ एवमात्मगतो विष्णुर्योगिनामशुभाशयम् ॥ ४७ ॥ विद्यातपःप्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजप्यैः ॥ नात्यन्तशुद्धिं लभतेऽन्तरात्मा यथा हृदिस्थे भगवत्यनन्ते ॥ ४८ ॥ तस्मात्सर्वात्मना राजन् हृदिस्थं कुरु केशवम् ॥ म्रियमाणो ह्यवहितस्ततो [5]यासि परां गतिम् ॥ ४९ ॥ म्रियमाणै[6]रभिध्येयो भगवान्परमेश्वरः ॥ आत्मभावं नयत्यङ्ग सर्वात्मा सर्वसंश्रयः ॥ ५० ॥ कलेर्दोषनिधे राजन्नस्ति ह्येको महान्गुणः ॥ कीर्तनादेव कृष्णस्य मुक्तसङ्गः परं व्रजेत् ॥ ५१ ॥ ॥

षड्भिः । [7]द्रव्यदेशात्मभिः संभवो येषां तान् । चित्तस्थश्चित्ते स्फुरितः ॥४५॥४६॥ अयमेवोपायो नान्य इति सदृष्टान्तमाह—यथेति । धातुजं ताम्रादिसंश्लेषजातं हेम्नो दुर्वर्णं मालिन्यं तत्र स्थितो वह्निरेव हन्ति हरति, न तु तोयादि । एवं योगिनामपि विष्णुरेव, न तु योगादिकमित्यर्थः ॥ ४७ ॥ एतदेव विवृणोति—विद्येति । विद्या देवतोपासना ॥४८॥४९॥ आत्मभावं स्वस्वरूपम् ॥५०॥ इदानीं कलिं स्तौति द्वाभ्याम्—कलेर्दोषनिधे राजन्निति ॥ ५१ ॥

१ पिशाचानामिव सम्यक् दर्शः दर्शनं यासां ताः । २ अन्यायमाहेति पाठः । ३ 'पुत्रान्भार्यां च कुलजाम्' इति पाठः । ४ 'विमुक्तकर्माशयः' इति पाठे त्यक्तकर्मवासन इत्यर्थः । ५ 'याहि' इति पाठः । ६ म्रियमाणैरवश्यं चिन्तनीयो यत आत्मभवनं नयतीत्यन्वयः । ७ द्रव्यमन्नादि, देशः कीकटादिः, आत्मान इन्द्रियाणि तैः ।

तत्सर्वं हरिकीर्तनादेव कलौ भवति नान्यस्मिन्युगे । उक्तं च—'ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ॥ यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ॥' इति ॥ ५२ ॥ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे भावार्थदीपिकायां टीकायां तृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ चतुर्थे तु चतुर्धोक्ता लया नैमित्तिकादयः ॥ तत्र संसारनिस्तारो हरिकीर्त्यैव वर्ण्यते ॥ १ ॥ कलिदोषनिवर्तकं हरिनामसंकीर्तनादिकं स एव च कलौ परमो धर्म इति प्रश्नद्वयस्योत्तरमुक्तम्, यच्चान्यत्पृष्टं प्रलयकल्पयोर्मानं ब्रूहीति तदिदानीं तृतीयस्कन्धोक्तकालमानानुवादपूर्वकं निरूपयति—काल इति । 'स कालः परमाणुर्वै यो भुङ्क्ते परमाणुताम्' इत्यादिना कालः कथितः । 'चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम् ॥ संख्यातानि सहस्राणि द्विगुणानि शतानि च ॥' इति युगमानं कथितम् ॥१॥ तत्र कल्पमानमाह—चतुर्युगेति । यत्र चतुर्दश मनवः क्रमेण भवन्ति ॥२॥ प्रलयस्तु चतुर्विधः—नैमित्तिकः, प्राकृतिकः, आत्यन्तिकः, नित्यश्चेति । तत्र नैमि-

कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः ॥ द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात् ॥ ५२ ॥ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥ ॥ श्रीशुक उवाच ॥ कालस्ते परमाण्वादिर्द्विपरार्धावधिर्नृप ॥ कथितो युगमानं च शृणु कल्पलयावपि ॥ १ ॥ चतुर्युगसहस्रं च ब्रह्मणो दिनमुच्यते ॥ स कल्पो यत्र मनवश्चतुर्दश विशांपते ॥ २ ॥ तदन्ते प्रलयस्तावान्ब्राह्मी रात्रिरुदाहृता ॥ त्रयो लोका इमे तत्र कल्पन्ते प्रलयाय हि ॥ ३ ॥ एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक् ॥ शेतेऽनन्तासनो विश्वमात्मसात्कृत्य चात्मभूः ॥ ४ ॥ द्विपरार्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः ॥ तदा प्रकृतयः सप्त कल्पन्ते प्रलयाय वै ॥५॥ एष प्राकृतिको राजन्प्रलयो यत्र लीयते ॥ आण्डकोशस्तु संघातो विघात उपसादिते ॥ ६ ॥ पर्जन्यः शतवर्षाणि भूमौ राजन्न वर्षति ॥ तदा निरन्ने ह्यन्योन्यं भक्षमाणाः क्षुधार्दिताः ॥ ७ ॥ क्षयं यास्यन्ति शनकैः कालेनोपद्रुताः प्रजाः ॥ सामुद्रं दैहिकं भौमं रसं सांवर्तको रविः ॥ ८ ॥ रश्मिभिः पिबते घोरैः सर्वं नैव विमुञ्चति ॥ ततः संवर्तको वह्निः संकर्षणमुखोत्थितः ॥ ९ ॥ ॥

त्तिकं प्रलयं मानसहितमाह—तदन्त इति द्वाभ्याम् । तावान् चतुर्युगसहस्रप्रमाणः । सैव ब्राह्मी रात्रिः ॥ ३ ॥ नैमित्तिकत्वं दर्शयति—यत्र यदा विश्वसृक् श्रीनारायणो विश्वमात्मसात्कृत्य स्वस्मिन्नुपसंहृत्य शेते । आत्मभूर्ब्रह्मा च तस्मिन् शेते तयोरभेदविवक्षया वा ब्रह्मण एवानन्तासनत्वमुक्तम् । ब्रह्मणो निद्रां निमित्तीकृत्य प्रवर्तमानो लोकत्रयप्रलयो नैमित्तिक इत्यर्थः ॥ ४ ॥ प्राकृतिकं प्रलयमाह द्वाभ्याम्—द्विपरार्धे तु ब्रह्मण आयुषि । सप्तप्रकृतयो महदहंकारपञ्चतन्मात्राणि ॥ ५ ॥ संघातो महदादिकार्यभूतः, प्रकृतीनां तत्कार्यब्रह्माण्डस्य च प्रलयात्प्राकृतिक इत्यर्थः । विघाते विघातकारणे उपसादिते सति ॥ ६ ॥ तदेवाह—पर्जन्य इत्यादिना बुद्धीन्द्रियार्थरूपेणेत्यतः प्राक्तनेन ग्रन्थेन ॥ ७ ॥ सामुद्रादिकं सर्वं रसं रविः पिबते आकर्षति ॥ ८ ॥ ९ ॥ ॥ ॥

१ एष नैमित्तिक इत्युपलक्षणं मन्वन्तरनिमित्तत्वमपि तदन्तर्भूतं ज्ञेयमिति क्रम० । २ यत्र प्रलये । ३ विघाते शैथिल्ये । ४ उपसादिते कालेन प्रापिते सति ।

अनिलवेगोत्थो वायुवेगोद्भूतः । 'अनिलवेगो वा' इति पाठे अनिलेन वेगो यस्य सः, वाः रविणा रश्मिभिः पीतमुदकं च दहतीत्यर्थः । 'अनिलवेगो वै' इति तु पाठः सुगमः । भूविवरान्पातालादीन् शून्यान् रविणा दैहिकरसाकर्षणात्प्राणिरहितान् । शिखाभिर्ज्वालाभिः ॥ १० ॥ किंचिदधिकं वर्षाणां शतम् । सांवर्तकः प्रलयहेतुः परो वायुर्वाति तदा रजसावृतं खं धूम्रं भवति ॥ ११ ॥ १२ ॥ रभसस्वनैस्तीव्रगर्जितैः । ब्रह्माण्डविवरमध्यगतं विश्वमेकोदकमेकार्णवोदकव्याप्तं भवति ॥ १३ ॥ उदप्लवे उदकेनाप्लवे सति । प्रलयत्वायाभावाय ॥ १४ ॥ १५ ॥ १६ ॥ भूतादिस्तामसोऽहंकारः । गुणैर्वृत्तिभिः सह ॥ १७ ॥ अव्या-

दहत्यनिलवेगोत्थः शून्यान्भूविवरानथ ॥ उपर्यधः समन्ताच्च शिखाभिर्वह्निसूर्ययोः ॥ १० ॥ दह्यमानं विभात्यण्डं दग्धगोमयपिण्डवत् ॥ ततः प्रचण्डपवनो वर्षाणामधिकं शतम् ॥ ११ ॥ परः सांवर्तको वाति धूम्रं खं रजसावृतम् ॥ ततो मेघकुलान्यङ्ग चित्रवर्णान्यनेकशः ॥ १२ ॥ शतं वर्षाणि वर्षन्ति नदन्ति रभसस्वनैः ॥ तत एकोदकं विश्वं ब्रह्माण्डविवरान्तरम् ॥ १३ ॥ तदा भूमेर्गन्धगुणं ग्रसन्त्याप उदप्लवे ॥ ग्रस्तगन्धा तु पृथिवी प्रलयत्वाय कल्पते ॥ १४ ॥ अपां रसमथो तेजस्ता लीयन्तेऽथ नीरसाः ॥ ग्रसते तेजसो रूपं वायुस्तद्रहितं तदा ॥ १५ ॥ लीयते चानिले तेजो वायोः खं ग्रसते गुणम् ॥ स वै विशति खं राजंस्ततश्च नभसो गुणम् ॥ १६ ॥ शब्दं ग्रसति भूतादिर्नभस्तमनुलीयते ॥ तैजसश्चेन्द्रियाण्यङ्ग देवान्वैकारिको गुणैः ॥ १७ ॥ महान् ग्रसत्यहंकारं गुणाः सत्त्वादयश्च तम् ॥ ग्रसतेऽव्याकृतं राजन् गुणान्कालेन चोदितम् ॥ १८ ॥ न तस्य कालावयवैः परिणामादयो गुणाः ॥ अनाद्यनन्तमव्यक्तं नित्यं कारणमव्ययम् ॥ १९ ॥ न यत्र वाचो न मनो न सत्त्वं तमो रजो वा महदादयोऽमी ॥ न प्राणबुद्धीन्द्रियदेवता वा न संनिवेशः खलु लोककल्पः ॥ २० ॥ न स्वप्नजाग्रन्न च तत्सुषुप्तं न खं जलं भूरनिलोऽग्निरर्कः ॥ संसुप्तवच्छून्यवदप्रतर्क्यं तन्मूलभूतं पदमामनन्ति ॥ २१ ॥ लयः प्राकृतिको ह्येष पुरुषाव्यक्तयोर्यदा ॥ शक्तयः संप्रलीयन्ते विवशाः कालविद्रुताः ॥ २२ ॥ ॥

कृतं प्रधानम् ॥ १८ ॥ तस्य तु लयो नास्तीत्याह—न तस्येति । कालावयवैरहोरात्रादिभिः । गुणा भावविकाराः । परिणामो विपरिणामः । अव्यक्तमस्तित्वविकारशून्यम् । नित्यं सर्वदैकरूपं, ह्रासवृद्धिरहितमित्यर्थः । अव्ययमपक्षयशून्यम् । सर्वत्र हेतुः—कारणमिति ॥ १९ ॥ किंच, वागादिगोचरस्य सविशेषस्य विकारा भवन्ति, इदं तु न तथेत्याह—न यत्रेति द्वाभ्याम् । लोककल्पो लोकरूपः संनिवेशो रचनाविशेषो नास्ति ॥ २० ॥ स्वप्नजाग्रत्स्वप्नजागरावस्थायुक्तम् । संसुप्तवदिन्द्रियाभावात् । शून्यसादृश्ये हेतुः—अप्रतर्क्यम् । न पुनः शून्यमेवेत्याह—तदिति ॥ २१ ॥ उपसंहरति—लय इति । शक्तयः सत्त्वादयः ॥ २२ ॥

१ 'सुषुप्तवत्' इति पाठः ।

आत्यन्तिकं लयमाह—बुद्धीन्द्रियेति द्वादशभिः । आत्यन्तिकलयो मोक्षः स च ब्रह्मज्ञानेन सर्वप्रपञ्चलयात्मकः । न च प्रपञ्चस्यात्मवत्सत्यत्वे लयः संभवतीति ज्ञानरूपाद्ब्रह्मणः पृथग्भूतस्य तस्यासत्त्वमुपपादयति—बुद्धिश्चेन्द्रियाणि चार्थाश्चेत्येवं ग्राहककरणग्राह्यरूपेण तेषामा[1]श्रयभूतं ज्ञानमेव भाति न पृथक् । तत्र हेतुमाह—दृश्यत्वाव्यतिरेकाभ्यामिति । अतो यदाद्यन्तवत्तदवस्तु । अत्रैवं प्रयोगः—विमतं सन्न भवति । दृश्यत्वात् कारणाव्यतिरेकादाद्यन्तवत्त्वाच्च, रज्जु-सर्पादिवदिति ॥ २३ ॥ तत्राव्यतिरेकं दृष्टान्तेन प्रपञ्चयति—दीप इति । दीपचक्षुरूपाणां तेजोविशेषाणां तेजसो यथा न व्यतिरेकस्तथा धीः कर्त्री खानि करणानि मात्रा विषयाः ऋताद्ब्रह्मणः पृथक् न स्युर्ब्रह्मकार्यत्वात् । नन्वेवं कार्यकारणयोरभेदे कार्यासत्त्वे कारणस्याप्यसत्त्वं प्रसज्जेत तत्राह—अन्यतमा-दिति । कार्यादत्यन्तव्यतिरिक्ताद्ब्रह्मणः । प्रपञ्चाद्ब्रह्मणोऽस्ति व्यतिरेकः, प्रपञ्चस्य तु ततो नास्ति व्यतिरेक इत्यर्थः ॥ २४ ॥ यदा तु बुद्धेरसत्त्वं तदा तदव-स्थानां सुतरामसत्त्वमित्याशयेनाह—बुद्धेरिति । ननु विश्वतैजसप्राज्ञानामेता अवस्था न बुद्धेरित्याशङ्क्याह—मायामात्रमिति । इदं विश्वतैजसप्राज्ञरूपम् ॥ २५ ॥ आद्यन्तवत्त्वादित्यस्य हेतोरसिद्धिमाशङ्क्य सावयवत्वेन साधयति—यथेति । अवयवीति । यत्सावयवं तदाद्यन्तवद्घटादिवदित्यर्थः । अत उदया-

बुद्धीन्द्रियार्थरूपेण ज्ञानं भाति तदाश्रयम् ॥ दृश्यत्वाव्यतिरेकाभ्यामाद्यन्तवदवस्तु यत् ॥ २३ ॥ दीपश्चक्षुश्च रूपं च ज्योतिषो न पृथग्भवेत् ॥ एवं धीः खानि मात्राश्च न स्युरन्यतमादृतात् ॥ २४ ॥ बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति चोच्यते ॥ मायामात्रमिदं राजन्नानात्वं प्रत्यगात्मनि ॥ २५ ॥ यथा जलधरा व्योम्नि भवन्ति न भवन्ति च ॥ ब्रह्मणीदं तथा विश्वमवयव्युदयाप्ययात् ॥ २६ ॥ सत्यं ह्यवयवः प्रोक्तः सर्वावय-विनामिह ॥ विनार्थेन प्रतीयेरन्पटस्येवाङ्ग तन्तवः ॥ २७ ॥ यत्सामान्यविशेषाभ्यामुपलभ्येत स भ्रमः ॥ अन्योन्यापाश्रयात्सर्वमाद्यन्तवदवस्तु यत् ॥ २८ ॥ ॥ ॥

प्ययादाद्यन्तवत्त्वाद्विश्वं सन्न भवतीत्यर्थः । यद्वा, पृथगेवागमापायित्वाद्विश्वं मिथ्या । ब्रह्म तु तदवधित्वात्सत्यमित्यनेन साध्यते । दृष्टान्तस्तु पूर्वोक्त एव । यथा जलधरा व्योम्नीति दृष्टान्तस्त्वागमापायितदवधित्वमात्रे, न तु मिथ्यात्वे ॥ २६ ॥ 'अन्यतमादृतात्' इति प्रतिज्ञातकारणस्य सत्यत्वमुपपादयति—सत्य-मिति । अवयवः कारणं प्रोक्तः—'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इत्यादिश्रुतिभिः । अत्र युक्तिमपि दर्शयति—विनेति । अङ्ग हे राजन्, हि यस्मादर्थेनावयविना पृथगेवावयवाः प्रतीयेरन् । यथा पटस्यावयवास्तन्तवः पटात् पृथक्प्रतीयन्ते तद्वदिति ॥ २७ ॥ ननु कार्याभावे कारणत्वं ब्रह्मणः कुतो घटेत, सत्यम्, तदपि नातीव सत्यमित्याह—यदिति । सामान्यं कारणं, विशेषः कार्यं, तद्रूपेणान्योन्यापाश्रयात्परस्परापेक्षत्वेन निरूपणासहत्वादित्यर्थः । अतः कारणत्वमवधित्वं व्यापकत्वमित्यादिकमपि यत्परापेक्षत्वादाद्यन्तवत्तत्सर्वमवस्त्वित्यर्थः । यद्वा, तत्रैव हेत्वन्तरमेतत् । यदुपलभ्येत स भ्रमः सामान्य-विशेषरूपत्वात्स्वप्नवत् । 'अन्योन्यापाश्रयात्' इतीदमपि हेत्वन्तरं गुणगुणिविशेषणविशेष्यव्याप्यव्यापकत्वादिरूपेण परस्पराधीनसिद्धित्वात् । तथाभूत-स्वप्नवदिति निगमनम् । अतो यदाद्यन्तवत्तत्सर्वमवस्त्विति ॥ २८ ॥ ॥ ॥ ॥

१ आश्रयमात्मस्वरूपं ज्ञानमेवेति पाठः । २ रज्जुसर्पवदिति ।

तदेवमनेकैर्हेतुभिः प्रपञ्चस्यासत्त्वं साधितम् । तत्र शङ्का,—ननु प्रपञ्चस्यापि प्रकाशमानत्वादात्मवत्सत्त्वं किं न स्यादिति तत्राह—विकार इति । ख्यायमानः प्रकाशमानोऽपि विकारः प्रपञ्चः प्रत्यगात्मप्रकाशं विनाऽणुमात्रोऽपि न निरूप्योऽस्ति । तं विना निरूप्यः स्याच्चेत्तर्हि सोऽपि चित्समः स्याच्चिद्रूपेणात्मना समः स्वप्रकाशो भवेत् । तथा च सति सोऽप्यात्मवत्स्यात् । एकरूपः स्यादित्यर्थः ॥ २९ ॥ कुत इत्यत आह—नहीति । ननु सत्यस्याप्यात्मनो जीवब्रह्मरूपं नानात्वमस्त्येव तत्राह—यद्येवं नानात्वं मन्यते तर्ह्यविद्वान् । कथं तर्हि तयोर्भेदव्यवहारः, उपाधिकृत इत्याह—नानात्वमिति । तत्र छिद्रयोर्घटाकाश-महाकाशयोरिवेति परिच्छेदापरिच्छेदे दृष्टान्तः । ज्योतिषोराकाशजलस्थयोः सू[1]र्ययोरिवेत्युपाधिकृतविकारसदसद्भावे । वातयोर्बाह्यशरीरस्थवाय्वोरिवेति क्रियाभेदे ॥ ३० ॥ ब्रह्मण एव प्रपञ्चव्यवहारालम्बनत्वं दृष्टान्तेन स्पष्टयति—यथेति । क्रियाभिस्तत्तद्रचनाभेदैर्बहुधा कटककुण्डलादिरूपेण । लौकिक-वैदिकैर्वचोभिः । जनैरहंकारोपहितैः ॥ ३१ ॥ नन्वहंकारस्य कथं ब्रह्मस्वरूपावरणेन भेदव्यवहारहेतुत्वम्, तस्य स्वकारणभूतब्रह्मावरकत्वासंभवादावरणे वा

विकारः ख्यायमानोऽपि प्रत्यगात्मानमन्तरा ॥ न निरूप्योऽस्त्यणुरपि स्याच्चेच्चित्सम आत्मवत् ॥ २९ ॥ नहि सत्यस्य नानात्वमविद्वान्यदि मन्यते ॥ नानात्वं छिद्रयोर्यद्वज्ज्योतिषोर्वातयोरिव ॥ ३० ॥ यथा हिरण्यं बहुधा समीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु ॥ एवं वचोभिर्भगवानधोक्षजो व्याख्यायते लौकिकवैदिकै-र्जनैः ॥ ३१ ॥ यथा घनोऽर्कप्रभवोऽर्कदर्शितो ह्यर्कांशभूतस्य च चक्षुषस्तमः ॥ एवं त्वहं ब्रह्मगुणस्तदी-क्षितो ब्रह्मांशकस्यात्मन [2]आत्मबन्धनः ॥ ३२ ॥ घनो यदाऽर्कप्रभवो विदीर्यते चक्षुः स्वरूपं रविमीक्षते तदा ॥ यदा ह्यहंकार उपाधिरात्मनो जिज्ञासया नश्यति तर्ह्यनुस्मरेत् ॥ ३३ ॥ यदैवमेतेन विवेकहेतिना मायामयाहंकरणात्मबन्धनम् ॥ छित्त्वाऽच्युतात्मानुभवोऽवतिष्ठते तमाहुरात्यन्तिकमङ्ग संप्लवम् ॥ ३४ ॥ नित्यदा सर्वभूतानां ब्रह्मादीनां परंतप ॥ उत्पत्तिप्रलयावेके सूक्ष्मज्ञाः संप्रचक्षते ॥ ३५ ॥ ॥

स्वस्यापि प्रकाशासंभवादित्याशङ्क्य सदृष्टान्तमाह—यथेति । अर्करश्मय एव मेघरूपेण परिणता वर्षन्ति । 'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ॥ आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥' इत्यादिवचनात्तस्मादर्कप्रभवः, अर्केणैव दर्शितः प्रकाशितश्च तमःस्वरूपभूतार्कदर्शनप्रतिबन्धको भवति । अहमहं-कारो ब्रह्मगुणो ब्रह्मकार्यभूतस्तदीक्षितस्तेनैव प्रकाशितश्चात्मनो जीवस्यात्मबन्धनो ब्रह्मस्वरूपदर्शनप्रतिबन्धको भवति ॥ ३२ ॥ अत एवाहंकारनाशे स्वरूपदर्शनं भवतीति तेनैव दृष्टान्तेनाह—घन इति । आत्मन उपाधिः । जिज्ञासया विचारेण । तर्हि तदाऽनुस्मरेत् । ब्रह्माहमिति पश्यतीत्यर्थः ॥ ३३ ॥ सोऽयमात्यन्तिकः प्रलय इत्युपसंहरति—यदैवमिति । विवेकहेतिना ज्ञानशस्त्रेण । [3]अहंकरणमेवात्मबन्धनम् । अच्युतं परिपूर्णमात्मानमनुभवतीति तथा ॥ ३४ ॥ नित्यप्रलयमाह—नित्यदेति ॥ ३५ ॥ ॥ ॥ ॥

१ स्वरूपभूतमाकाशस्थम् । २ 'आत्मवस्तुनः' इति पाठः । ३ आत्मावरकमहंकारमित्यर्थः ।

कुत इत्यत आह—कालेति । परिणामिनां नदीप्रवाहप्रदीपज्वालादीपज्वालादीनां या उच्चनीचावस्थास्ताः कालरूपस्रोतसो वेगेनाशु ह्रियमाणस्य देहादेर्दृश्यमानास्ता एव नित्यदा जन्मप्रलयहेतवो भवन्ति । देहः प्रतिक्षणं प्रध्वंसी, प्रतिक्षणमवस्थाभेदास्पदत्वात्, प्रदीपादिवदित्यनुमानम् ॥ ३६ ॥ ननु यदि प्रतिक्षणमवस्था भवन्ति तर्हि किं न दृश्यन्ते, अतो हेतुरसिद्ध इत्याशङ्क्याह—अनाद्यन्तवता कालेन जायमाना अवस्था नैव लक्ष्यन्ते । आकाशे गच्छतां ज्योतिषां चन्द्रादीनां गमनावस्थाविशेषा यथा नैव लक्ष्यन्ते तद्वत् । अतो यथा तेषां प्रदेशान्तरप्राप्त्या प्रतिक्षणं गत्यवस्थाः कल्प्यन्ते तद्वदत्रापि बाल्यतारुण्यादिदर्शनेन मध्यवर्तिन्योऽवस्थाः कल्प्यन्त इति न हेतुरसिद्ध इत्यर्थः ॥ ३७ ॥ उपसंहरति—नित्य इति ॥ ३८ ॥ पुराणार्थमुपसंहरति—एता इति । लीलाविषयाः कथा अजो ब्रह्मापि कार्त्स्न्येनाभिधातुं नेशः ॥ ३९ ॥ ननु यदि साकल्येनाभिधातुं न शक्यन्ते तर्हि किं तदभिधानेन तत्राह—संसारेति । विविधं दुःखमेव दवो दावानलस्तेनार्दितस्य पीडितस्यात उत्तितीर्षोः पुंसो भगवतो या लीलास्तासां कथास्तासां रसस्तन्निषेवणमन्तरेणान्यः प्लवस्तरणसाधनं

कालस्रोतोजवेनाशु ह्रियमाणस्य नित्यदा ॥ परिणामिनामवस्थास्ता जन्मप्रलयहेतवः ॥ ३६ ॥ अनाद्यन्तवताऽनेन
कालेनेश्वरमूर्तिना ॥ अवस्था नैव दृश्यन्ते वियति ज्योतिषामिव ॥३७॥ नित्यो नैमित्तिकश्चैव तथा प्राकृतिको लयः ॥
आत्यन्तिकश्च कथितः कालस्य गतिरीदृशी ॥ ३८ ॥ एताः कुरुश्रेष्ठ जगद्विधातुर्नारायणस्याखिलसत्त्वधाम्नः ॥ लीला-
कथास्ते कथिताः समासतः कार्त्स्न्येन नाजोऽप्यभिधातुमीशः ॥ ३९ ॥ संसारसिन्धुमतिदुस्तरमुत्तितीर्षोर्नान्यः प्लवो
भगवतः पुरुषोत्तमस्य ॥ लीलाकथारसनिषेवणमन्तरेण पुंसो भवेद्विविधदुःखदवार्दितस्य ॥४०॥ पुराणसंहितामेता-
मृषिर्नारायणोऽव्ययः ॥ नारदाय पुरा प्राह कृष्णद्वैपायनाय सः ॥ ४१ ॥ स वै मह्यं महाराज भगवान्बादरायणः ॥ इमां
भागवतीं प्रीतः संहितां वेदसंमिताम् ॥ ४२ ॥ एतां वक्ष्यत्यसौ सूत ऋषिभ्यो नैमिषालये ॥ दीर्घसत्रे कुरुश्रेष्ठ संपृष्टः
शौनकादिभिः ॥ ४३ ॥ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे चतुर्थोऽध्यायः ॥४॥ ॥ छ ॥ ॥ श्रीशुक
उवाच ॥ अत्रानुवर्ण्यतेऽभीक्ष्णं विश्वात्मा भगवान्हरिः ॥ यस्य प्रसादजो ब्रह्मा रुद्रः क्रोधसमुद्भवः ॥ १ ॥ ॥

न भवेत् । उपायान्तरासंभवात्तत्कथाश्रवणमेव यथाशक्ति निषेव्यमित्यर्थः ॥४०॥ श्रोतुरादरदार्ढ्याय संप्रदायप्रवृत्तिमाह—पुराणसंहितामिति त्रिभिः ॥ ४१ ॥ स वै बादरायणः प्रीतः सन् मह्यमिमां संहितां प्राहेति पूर्वेणान्वयः ॥ ४२ ॥ असौ सूत इति पुरतः स्थितमङ्गुल्या निर्दिश्याह—नैमिषालये नैमिषारण्यस्थाने ॥ ४३ ॥ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे भावार्थदीपिकायां टीकायां चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ पञ्चमे तु समासेन परब्रह्मोपदेशतः ॥ राज्ञस्तक्षकसंदंशान्मृत्युभीतिनिवारणम् ॥ १ ॥ एतत्पुराणं शृण्वन्नभयं प्राप्नोतीत्यभिप्रेत्य पुराणार्थमनुस्मारयति—अत्रेति । अयं भावः—जगतः कर्ता ब्रह्मापि यस्य प्रसादजः । प्रसादोऽत्र रजोवृत्तिर्हर्षः । ततो जातत्वात्परतन्त्रः । सर्वसंहर्ता रुद्रश्च यस्य क्रोधसंभवो न तु स्वतन्त्रः स विश्वस्यात्मा नियन्ता भगवानत्रानुवर्ण्यते । अत एवंभूतं भगवन्तं शृण्वतः कुतोऽन्यस्माद्भयशङ्केति ॥ १ ॥ ॥ ॥

त्वं पुनः कृतार्थ एवेत्यनुस्मारयति—त्वं त्विति । पशुबुद्धिमविवेकम् । यस्मान्न नङ्क्ष्यसि । कुत इत्यत आह—न जात इति । यथा देहः प्रागभूत एवाद्य जातो नङ्क्ष्यति । नचैवं त्वं पूर्वं नाभूर्न चाद्य जातोऽस्यतो न नङ्क्ष्यसि ॥ २ ॥ ननु बीजादङ्कुरवत्स्वस्मात्पुत्ररूपेणापि स्वयमेव भवति । यथाह श्रुतिः—'अङ्गादङ्गात्संभवसि हृदयादभिजायसे ॥ आत्मा वै पुत्रनामासि स जीव शरदः शतम् ॥' इति । ततः पुनरङ्कुराद्बीजमिव पौत्रादिरूपेणापि स्वयमेव भवति । 'पिता पुत्रेण पितृमान्योनियोनौ' इति श्रुतेः । अतस्तेषु नश्यत्सु कथं न नङ्क्ष्यामीति चेत्तत्राह—न भविष्यसीति । भूत्वा पुत्रपौत्रादिरूपवान्बीजाङ्कुरवन्न भविष्यसि । यस्माद्देहादेर्व्यतिरिक्तस्त्वं यथाऽनलः काष्ठात् । देहाद्देहो जायते नात्मेति भावः ॥ ३ ॥ जन्मादीनां देहधर्मत्वं दृष्टान्तेन प्रपञ्चयति—स्वप्ने यथात्मनः शिरश्छेदं स्वयं पश्यति, एवं जागरणेऽपि । यस्माद्देहस्य पञ्चत्वादिकं पश्यति ततस्तद्वदेवात्मन इदं भ्रममात्रम् । वस्तुतश्चात्माऽजोऽमरश्चेत्यर्थः । तदुक्तम्—'आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ ॥ न भवाप्ययवस्तूनामभिज्ञोऽद्वयलक्षणः ॥' इत्यादि ॥ ४ ॥ यस्माद्देहोपाधिकोऽयमात्मनो जन्मादिसंसारभ्रमस्तस्मादुपाधिनिवृत्तौ

त्वं तु राजन्मरिष्येति[1] पशुबुद्धिमिमां जहि ॥ न जातः प्रागभूतोऽद्य देहवत्त्वं न नङ्क्ष्यसि ॥ २ ॥ न भविष्यसि
भूत्वा त्वं पुत्रपौत्रादिरूपवान् ॥ बीजाङ्कुरवद्देहादेर्व्यतिरिक्तो यथाऽनलः ॥ ३ ॥ स्वप्ने यथा शिरश्छेदं पञ्चत्वा-
द्यात्मनः स्वयम् ॥ यस्मात्पश्यति देहस्य तत आत्मा ह्यजोऽमरः ॥ ४ ॥ घटे भिन्ने यथाकाश आकाशः स्याद्यथा
पुरा ॥ एवं देहे मृते जीवो ब्रह्म संपद्यते पुनः ॥५॥ मनः सृजति वै देहान्गुणान्कर्माणि चात्मनः ॥ तन्मनः सृजते
माया ततो जीवस्य संसृतिः ॥ ६ ॥ स्नेहाधिष्ठानवर्त्यग्निसंयोगो यावदीयते ॥ ततो दीपस्य दीपत्वमेवं देहकृतो
भवः ॥ रजःसत्त्वतमोवृत्त्या जायतेऽथ विनश्यति ॥ ७ ॥ न तत्रात्मा स्वयंज्योतिर्यो व्यक्ताव्यक्तयोः परः ॥ आकाश
इव चाधारो ध्रुवोऽनन्तोपमस्ततः ॥ ८ ॥ ॥ ॥ ॥

मुच्यत इति सदृष्टान्तमाह—घट इति । यथा पुरा घटोपाधेः पूर्वमिव पुनर्घटे भिन्ने तदन्तर्वर्त्यवकाश आकाश एव स्याद्यथा । एवं देहे मृते तत्त्वज्ञानेन लीने सति ॥ ५ ॥ ज्ञानेन लयं भावयितुं मायाकृतमात्मनो देहाद्युपाधिसंबन्धप्रकारमाह—मन इति । [2]मन आत्मनो देहादीन्सृजति । तच्च मनो माया सृजति । ततो मायाद्युपाधिसमुदायाज्जीवस्य संसृतिः, न स्वतः ॥ ६ ॥ यस्मादुपाधिनिबन्धनो जीवस्य संसारोऽतस्तन्नाशे जीवत्वं गच्छतीत्येतदेव सदृष्टान्तमाह सार्धेन—स्नेहेति । दीपस्य ज्योतिषो दीपत्वं ज्वालारूपः परिणामः । तत्र तैलस्थानीयं कर्म, तदधिष्ठानस्थानीयं मनः, वर्तिस्थानीयो देहः, अग्निसंयोगस्थानीयश्चैतन्याध्यासः, दीपस्थानीयः संसार इति योज्यम् । देहकृतो देहनिबन्धनः । यद्वा देहकृतो मनसो न त्वात्मनः ॥ ७ ॥ अतो दीपवत्संसार एव नश्यति, न त्वात्मा ज्योतिर्वदित्याह—नेति । न तु तत्र प्रतीयमान आत्मा । कुत इत्यत आह—य इति । व्यक्ताव्यक्तयोः स्थूलसूक्ष्मदेहयोः परोऽन्यः । यतः स्वयंज्योतिः । परत्वं प्रपञ्चयति—आकाश इवेति । आधारो देहादेः प्रपञ्चस्य । ध्रुवो निर्विकारः । नास्त्यन्त उपमा च यस्य सोऽनन्तोपमः । ततो विभुः ॥८॥

१ मरिष्येतीत्यत्र मरिष्ये इति इति छेदः । सन्धिरार्षः । क्वचित्–'मरिष्येऽहम्' इति पाठः, तत्र इतीत्यध्याहार्यम् । २ मनः पूर्वकर्मप्रेरितं सद्गुणान्सत्त्वादीन्सृजति पर्यायेण विभावयति ततो गुणमयानि विविधानि कर्माणि सृजति ततः कर्मानुरूपान्देहान्सृजतीति भावः ।

अतस्त्वमेवं चिन्तयेत्याह—एवमिति । आत्मस्थं देहाद्युपाधिस्थितम् । आमृश विचारय । अनुमानगर्भिण्या द्रष्टृदृश्यान्वयव्यतिरेकयुक्तया ॥ ९ ॥ एवं च सति त्वां तक्षको न दहेदित्याह—चोदित इति । तत्र हेतवः—मृत्यव इति । मृत्युहेतवः ॥ १० ॥ विमर्शप्रकारं दर्शयंस्तक्षकादर्शनं दर्शयति द्वाभ्याम्—योऽहं स ब्रह्मैव यद्ब्रह्म तदहमेवेति समीक्षन् । तत्राहं ब्रह्मेति भावनया जीवस्य शोकादिनिवृत्तिः । ब्रह्माहमिति भावनया च ब्रह्मणः पारोक्ष्यनिवृत्तिर्भवतीति व्यतिहारो दर्शितः । निष्कले निरुपाधौ । आत्मनि ब्रह्मणि ॥ ११ ॥ विषयुक्तैराननैर्दशन्तं ग्रसन्तं तक्षकम् । लेलिहानं सर्पम् । यद्वा, लेलिहानं जिह्वाभिरोष्ठप्रान्तान्सनिष्पेषमास्वादयन्तम् । आत्मनः पृथक् ॥ १२ ॥ हरेश्चेष्टामात्मा त्वं यत्पृष्टवांस्तदेतत्ते कथितम् । शिष्यस्य कृतार्थतापरीक्षणाय पृच्छति—किमिति

एवमात्मानमात्मस्थमात्मनैवाऽऽमृश प्रभो ॥ बुद्ध्यानुमानगर्भिण्या वासुदेवानुचिन्तया ॥ ९ ॥ चोदितो विप्रवाक्येन
न त्वां धक्ष्यति तक्षकः ॥ मृत्यवो नोपधक्ष्यन्ति मृत्यूनां मृत्युमीश्वरम् ॥ १० ॥ अहं ब्रह्म परं धाम ब्रह्माहं परमं
पदम् ॥ एवं समीक्षन्नात्मानमात्मन्याधाय निष्फले ॥ ११ ॥ दशन्तं तक्षकं पादे लेलिहानं विषाननैः ॥ न द्रक्ष्यसि
शरीरं च विश्वं च पृथगात्मनः ॥ १२ ॥ एतत्ते कथितं तात यथात्मा पृष्टवान्नृप ॥ हरेर्विश्वात्मनश्चेष्टां किं भूयः
श्रोतुमिच्छसि ॥ १३ ॥ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे ब्रह्मोपदेशो नाम पञ्चमोऽध्यायः ॥ ५ ॥
सूत उवाच ॥ एतन्निशम्य मुनिनाभिहितं परीक्षिद्व्यासात्मजेन निखिलात्मदृशा समेन ॥ तत्पादमूलमुपसृत्य नतेन
मूर्ध्ना बद्धाञ्जलिस्तमिदमाह स विष्णुरातः ॥ १ ॥ ॥ राजोवाच ॥ सिद्धोऽस्म्यनुगृहीतोऽस्मि भवता करुणात्मना ॥
श्रावितो यच्च मे साक्षादनादिनिधनो हरिः ॥ २ ॥ नात्यद्भुतमहं मन्ये महतामच्युतात्मनाम् ॥ अज्ञेषु तापतप्तेषु
भूतेषु यदनुग्रहः ॥ ३ ॥ पुराणसंहितामेतामश्रौष्म भवतो वयम् ॥ यस्यां खलूत्तमश्लोको भगवाननुवर्ण्यते ॥ ४ ॥
भगवंस्तक्षकादिभ्यो मृत्युभ्यो न बिभेम्यहम् ॥ प्रविष्टो ब्रह्मनिर्वाणमभयं दर्शितं त्वया ॥ ५ ॥ ॥

॥ १३ ॥ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे भावार्थदीपिकायां टीकायां पञ्चमोऽध्यायः ॥ ५ ॥ ॥ षष्ठे परीक्षितो मोक्षः सर्पहोमादि तत्सुतात् ॥ वेदशाखाविभागोक्तौ त्रिवेदिव्यासवर्णनम् ॥ १ ॥ एतत्पुराणं निशम्य निखिलात्मा हरिस्तं पश्यति निखिलं वात्मनि पश्यतीति तथा तेन । अतः समेन । नतेनावनतेन मूर्ध्ना तत्पादतलमुपसृत्य । तत्पादौ शिरसि निधायेत्यर्थः । सिद्धः कृतार्थोऽस्मि । यतोऽनुगृहीतोऽस्मि । अनुग्रहमेवाह—यद्यस्माच्छ्रावितः । चशब्दात्प्राप्तिसाधनं च श्रावितम् ॥ २ ॥ करुणात्मतामभिनन्दति द्वाभ्याम्—नात्यद्भुतमिति ॥ ३ ॥ अश्रौष्म श्रुतवन्तः । भवतः सकाशात् ॥ ४ ॥ 'सिद्धोऽस्मि' इत्युक्तं तदेवाविष्करोति—भगवन्निति । यतस्त्वया दर्शितं ब्रह्म प्रविष्टः । कथंभूतम् । अभयम् । यतो निर्वाणं कैवल्यरूपम् ॥ ५ ॥ ॥

१ वासुदेवस्यानुचिन्ता यस्यां तया बुद्ध्या । २ 'समीक्ष्य चात्मानम्' इति मूलटीकयोः पाठः क्वचित् । ३ 'यत्त्वं मां पृष्टवान्' इति, 'यथा त्वं पृष्टवान्' इति च पाठः । टीकानुरोधेन यदात्मेति पाठ आवश्यकः । ४ 'प्रमाणलक्षणं नाम' इति क्वचित् । ५ पादतलमिति मूलस्थमूलपदस्यार्थः । क्वचित् 'पादतलं' इति पाठः । क्वचिच्च 'तत्पादपद्मम्' इति पाठः, स च टीकाननुगुणः ।

'किं भूयः श्रोतुमिच्छसि' इति यदुक्तं तत्र सिद्धोऽहं न किंचिच्छ्रोतुमिच्छामि । केवलमनुज्ञां देहीत्याह—अनुजानीहीति । वाचमित्युपलक्षणं सर्वेन्द्रियाणाम् । वाचं नियम्य किं करिष्यसि तदाह—मुक्ताः कामाशयास्तद्वासना येन तच्चेतोऽधोक्षजे प्रवेश्यासून्विसृजामि ॥ ६ ॥ ननु किं प्राणत्यागेन किंचित्कालं ज्ञाननिष्ठो भवेति चेत्तत्राह—अज्ञानं चेति । चकारात्तत्संस्कारश्च तच्च त्वत्कृपयैवेत्याह—भवतेति ॥ ७ ॥ ८ ॥ आत्मना बुद्ध्या आत्मानं मन आत्मनि प्रत्यक्प्रकाशे समाधाय परमात्मानं दध्यौ । अस्पन्दासुः लीनप्राणः । यथा तरुः स्थाणुः ॥ ९ ॥ तमेव विशिनष्टि—प्राक्कूले प्रागग्रे । बर्हिषि दर्भे ॥ १० ॥ तदेवं ब्रह्मभूते तस्मिंस्तक्षकागमनादिकं पिष्टपेषणमिवाभवदिति दर्शयति—तक्षक इति त्रिभिः । हे विप्राः ॥ ११ ॥ तं विषचिकित्सया परीक्षिद्रक्षणेन

अनुजानीहि मां ब्रह्मन् वाचं यच्छाम्यधोक्षजे ॥ मुक्तकामाशयं चेतः प्रवेश्य विसृजाम्यसून् ॥ ६ ॥ अज्ञानं च निरस्तं
मे ज्ञानविज्ञाननिष्ठया ॥ भवता दर्शितं क्षेमं परं भगवतः पदम् ॥ ७ ॥ ॥ सूत उवाच ॥ इत्युक्तस्तमनुज्ञाप्य भग-
वान्बादरायणिः ॥ जगाम भिक्षुभिः साकं नरदेवेन पूजितः ॥ ८ ॥ परीक्षिदपि राजर्षिरात्मन्यात्मानमात्मना ॥
समाधाय परं दध्यावस्पन्दासुर्यथा तरुः ॥ ९ ॥ प्राक्कूले बर्हिष्यासीनो गङ्गाकूल उदङ्मुखः ॥ ब्रह्मभूतो महायोगी
निःसङ्गश्छिन्नसंशयः ॥ १० ॥ तक्षकः प्रहितो विप्राः क्रुद्धेन द्विजसूनुना ॥ हन्तुकामो नृपं गच्छन्ददर्श पथि कश्य-
पम् ॥ ११ ॥ तं तर्पयित्वा द्रविणैर्निवर्त्य विषहारिणम् ॥ द्विजरूपप्रतिच्छन्नः कामरूपोऽदशन्नृपम् ॥ १२ ॥ ब्रह्मभू-
तस्य राजर्षेर्देहोऽहिगरलाग्निना ॥ बभूव भस्मसात्सद्यः पश्यतां सर्वदेहिनाम् ॥ १३ ॥ हाहाकारो महानासीद्भुवि खे
दिक्षु सर्वतः ॥ विस्मिता ह्यभवन्सर्वे देवासुरनरादयः ॥ १४ ॥ देवदुन्दुभयो नेदुर्गन्धर्वाप्सरसो जगुः ॥ ववृषुः पुष्प-
वर्षाणि विबुधाः साधुवादिनः ॥ १५ ॥ जन्मेजयः स्वपितरं श्रुत्वा तक्षकभक्षितम् ॥ यथाजुहाव संक्रुद्धो नागा-
न्सत्रे सह द्विजैः ॥ १६ ॥ सर्पसत्रे समिद्धाग्नौ दह्यमानान्महोरगान् ॥ दृष्ट्वेन्द्रं भयसंविग्नस्तक्षकः शरणं ययौ ॥ १७ ॥
अपश्यंस्तक्षकं तत्र राजा पारीक्षितो द्विजान् ॥ उवाच तक्षकः कस्मान्न दह्येतोरगाधमः ॥ १८ ॥ ॥

द्रव्यार्जनायागच्छन्तम् । तत्र स्वालीढवटवृक्षस्य भस्मीभूतस्य पुनरङ्कुरादिक्रमेणोत्थापनाद्विषहारिणं तदपेक्षितद्रविणैः संतर्प्य ततो निवर्त्य द्विजरूपेण तिरोहितः सन्नदशत् ॥ १२ ॥ तच्च पुत्रकृत्यमिव जातमित्याह—ब्रह्मभूतस्येति ॥ १३ ॥ तत्र क्षणं सर्वेषां दुःखं च ततः परमुत्सवं चाह द्वाभ्याम्—हाहाकार इति ॥ १४ ॥ १५ ॥ प्रासङ्गिकमाह—जन्मेजय इत्यादि । सर्पाभिचारसत्रे द्विजैः सह वर्तमानो यथावदाजुहाव जुहावेति वा । सर्वसर्पाह्वाने कारणमाह—संक्रुद्ध इति ॥ १६ ॥ १७ ॥ १८ ॥ ॥ ॥ ॥ ॥ ॥

१ आत्मानं श्रीकृष्ण आत्मनि मनसि इति चक्र० । २ ब्रह्म भूतं प्राधान्येन प्राप्तं येन सः ।

कस्मात्तक्षको न दह्येतेत्युक्ताः सन्तो द्विजा ऊचुः—तमिति । तेनेन्द्रेण । असौ सर्पः ॥ १९ ॥ ऋत्विजः प्रत्याह—सहेन्द्रः इन्द्रसहितः किमिति न पात्यते
॥ २० ॥ तद्राज्ञो वचः श्रुत्वा आजुहुवुः । साक्षेपमाह्वानं दर्शयति—तक्षकेति इहाग्नावाशु पतस्व मरुत्वता मरुद्गणवतेन्द्रेण सह ॥ २१ ॥ ब्राह्मणैरुक्तै-
राक्षेपैः परुषवाक्यैः ॥ २२ ॥ तं तक्षकम् । अङ्गिरसः पुत्रो बृहस्पतिः प्राह ॥ २३ ॥ २४ ॥ भवतु नामाऽजरामरस्तथापि पितृमारकं धक्ष्यामीति चेत्त-
त्राह—जीवितमिति । गतिः परलोकः । अतो दुर्मरणनिमित्ता पितुर्दुर्गतिरनेन कृतेत्यपि न शङ्कनीयमित्यर्थः ॥ २५ ॥ कथमन्यः सुखदुःखप्रदाता नास्ति
सर्पादीनामुपलभ्यमानत्वादिति चेत्तत्राह—सर्पादिना जन्तुः पञ्चत्वं मृत्युमृच्छति प्राप्नोतीति यत्तदारब्धं कर्मैव भुङ्क्ते, स्वकर्मप्रयुक्ता एव सर्पादयो न

तं गोपायति राजेन्द्र शक्रः शरणमागतम् ॥ तेन संस्तम्भितः सर्पस्तस्मान्नाग्नौ पतत्यसौ ॥ १९ ॥ पारीक्षित इति
श्रुत्वा प्राहर्त्विज उदारधीः ॥ सहेन्द्रस्तक्षको विप्रा नाग्नौ किमिति पात्यते ॥ २० ॥ तच्छ्रुत्वाजुहुवुर्विप्राः सहेन्द्रं
तक्षकं मखे ॥ तक्षकाशु पतस्वेह सहेन्द्रेण मरुत्वता ॥ २१ ॥ इति ब्रह्मोदिताक्षेपैः स्थानादिन्द्रः प्रचालितः ॥
बभूव संभ्रान्तमतिः[1] सविमानः सतक्षकः ॥ २२ ॥ तं पतन्तं विमानेन सहतक्षकमम्बरात्[2] ॥ विलोक्याङ्गिरसः
प्राह राजानं तं बृहस्पतिः ॥ २३ ॥ नैष त्वया मनुष्येन्द्र वधमर्हति सर्पराट् ॥ अनेन पीतममृतमथवा[3] अजरा-
मरः ॥ २४ ॥ जीवितं मरणं जन्तोर्गतिः स्वेनैव कर्मणा ॥ राजंस्ततोऽन्यो नान्यस्य[4] प्रदाता सुखदुःखयोः ॥ २५ ॥
सर्पचौराग्निविद्युद्भ्यः क्षुत्तृड्व्याध्यादिभिर्नृप ॥ पञ्चत्वमृच्छते जन्तुर्भुङ्क्त आरब्धकर्म तत् ॥ २६ ॥ तस्मात्सत्रमिदं
राजन्संस्थीयेताभिचारिकम् ॥ सर्पा अनागसो दग्धा जनैर्दिष्टं हि भुज्यते ॥ २७ ॥ ॥ सूत उवाच ॥ इत्युक्तः
स तथेत्याह महर्षेर्मानयन्वचः ॥ सर्पसत्रादुपरतः पूजयामास वाक्पतिम् ॥ २८ ॥ सैषा विष्णोर्महामायाऽबा-
ध्ययाऽलक्षणा यया ॥ मुह्यन्त्यस्यैवात्मभूता भूतेषु गुणवृत्तिभिः ॥ २९ ॥ ॥ ॥

स्वतन्त्रा इति भावः ॥ २६ ॥ संस्थीयेत समाप्यताम् । आभिचारिकं हिंसाफलम् । दिष्टं प्राचीनं कर्म । अतः सर्पादष्टप्रयुक्तस्य तवाप्ययं नापराध इति
भावः ॥ २७ ॥ वाक्पतिं बृहस्पतिम् ॥ २८ ॥ ननु कथं विदुषामप्येवं संमोहो यतो ब्रह्मकोपात्परीक्षितो मृत्युर्जनमेजयकोपात्सर्पाणामित्यादि तत्रा-
ह—सैषेति । तस्या महत्त्वं दर्शयति—अलक्षणा न लक्ष्यत इत्यलक्षणा, अप्रतर्क्येत्यर्थः । कासावित्यत आह—ययाऽस्य विष्णोरेवात्मभूता आत्मांशभूताः
प्राणिनो गुणवृत्तिभिः क्रोधादिभिः सह भूतेषु देहेषु मुह्यन्ति । बाध्यबाधकतां व्रजन्तीत्यर्थः । ननु श्रवणादिना बाधितया तया कुतो मोहः स्यात्तत्राह—
अबाध्यया बाधितुमशक्यया ॥ २९ ॥ ॥ ॥ ॥ ॥

१ संभ्रान्ता व्याकुला मतिर्यस्य । २ विमानेन सहाम्बरात्पतन्तं तक्षकमित्यन्वयः । ३ अथ अत एव । वै निश्चितम् । 'जातस्तेनाजरामरः' इति पाठः । ४ 'नास्त्यस्य' इति पाठः ।

कथं तर्हि मायातत्कार्यनिवृत्तिरित्याशङ्क्य श्रीविष्णुस्वरूपनिरूपणपूर्वकं तद्भजनात्सर्वानर्थनिवृत्तिरिति शास्त्रार्थमुपसंहरति—न यत्रेति पञ्चभिः । दम्भीति ।
माया, कपटवानयं पुमानित्येवंभूतायां बुद्धावसकृदुल्लिख्यमाना या मायेत्यर्थः । साऽऽत्मवादे क्रियमाणे आत्मवादिभिर्यत्राभया न विराजिता न प्रकाशिता
किंतु भीतेव स्वकार्यं मोहादिकमकुर्वती कथंचिद्वर्तत इति प्रतिपादितेत्यर्थः । तदुक्तम्—'तस्मै नमो भगवते वासुदेवाय धीमहि । यन्मायया दुर्जयया मां
ब्रुवन्ति जगद्गुरुम् ॥ विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया । विमोहिता विकत्थन्ते ममाहमिति दुर्धियः ॥' इति । किंच, यद्यस्मिंस्तदाश्रयो मायाश्रयो
विविधो विवादोऽपि नास्ति । विशेषविषयत्वाद्विवादानां तस्य विशेषातीतत्वादिति भावः । संकल्पविकल्पा वृत्तयो यस्य तन्मनोऽपि यत्र नास्ति । संकल्प-
विकल्पानामपि विशेषविषयत्वात् ॥ ३० ॥ किंच, सृज्यं कर्म सृजता कारकवर्गेण सहोभयोः सृज्यस्रष्ट्रोः परं साध्यं श्रेयः फलमपि । अतस्त्रिभिः सृज्यस्रष्टृ-
फलैरन्वितो जीवश्चाहंकारात्मको यत्र नास्ति । अत एवोत्सादितौ निरस्तौ बाध्यबाधकौ यस्मिंस्तदेतत्स्वयमात्मस्वरूपमित्यर्थः । तत्तस्मिन्नूर्मीनहंकारादीन्नि-

न यत्र दम्भीत्यभया[1] विराजिता मायात्मवादेऽसकृदात्मवादिभिः ॥ न यद्विवादो[2] विविधस्तदाश्रयो मनश्च संकल्प-
विकल्पवृत्ति यत् ॥ ३० ॥ न यत्र सृज्यं सृजतोभयोः परं श्रेयश्च[3] जीवस्त्रिभिरन्वितस्त्वहम् ॥ तदेतदुत्सादितबाध्य-
बाधकं निषिध्य चोर्मीन्विरमेत्स्वयं मुनिः[4] ॥ ३१ ॥ परं पदं वैष्णवमामनन्ति तद्यन्नेति नेतीत्यतदुत्सिसृक्षवः ॥ विसृज्य
दौरात्म्यमनन्यसौहृदा हृदोपगुह्यावसितं समाहितैः ॥ ३२ ॥ त एतदधिगच्छन्ति विष्णोर्यत्परमं पदम् ॥ अहं ममेति
दौर्जन्यं न येषां देहगेहजम् ॥ ३३ ॥ अतिवादांस्तितिक्षेत नावमन्येत कंचन ॥ न चेमं देहमाश्रित्य वैरं कुर्वीत केन-
चित् ॥ ३४ ॥ नमो भगवते तस्मै कृष्णायाकुण्ठमेधसे ॥ यत्पादाम्बुरुहध्यानात्संहितामध्यगामिमाम् ॥ ३५ ॥
॥ शौनक उवाच ॥ पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैर्महात्मभिः ॥ वेदाश्च कतिधा व्यस्ता एतत्सौम्याभिधेहि नः ॥ ३६ ॥

षिध्य विरमेत् । विशेषेण क्रीडेदित्यर्थः ॥ ३१ ॥ यतस्तद्वैष्णवं पदमामनन्तीत्याह—परमिति । यदेतत्तदेव परं वैष्णवं पदं स्वरूपमामनन्ति । के । अतत्
आत्मव्यतिरिक्तमुत्सिसृक्षवस्त्यक्तुमिच्छवः । यतोऽनन्यसौहृदाः नास्त्यन्यस्मिन्सौहृदं येषां ते । कुतः । दौरात्म्यं देहाद्यहंभावं विसृज्य । देहेऽहंकाराभावा-
दन्यत्र सौहृदं नास्त्यतस्त्यक्तुमिच्छव इत्यर्थः । कथम् । नेति नेतीत्येवम् । अत्र विद्वदनुभवमपि प्रमाणयति—हृदोपगुह्य ध्यानादिना । ततः समाहितैरवसितं
निश्चितम् । यद्वा, अवसितमवबद्धमात्मतया गृहीतमित्यर्थः ॥ ३२ ॥ एतत्प्राप्तावधिकारिणो दर्शयति—त एतदिति । देहजमहमिति । गेहजं ममेति ॥ ३३ ॥
तत्प्राप्त्युपायमाह—अतिवादानिति ॥ ३४ ॥ शास्त्रसमाप्तौ गुरुं प्रणमति—नम इति । कृष्णाय व्यासाय । अध्यगामधिगतवानस्मि ॥ ३५ ॥ 'इमां संहि-
तामध्यगाम्' इत्युक्तं तत्र पुराणसंहिताविभागं विशेषतो बुभुत्सुर्वेदविभागमपि प्रसङ्गात्पृथक् पृच्छति—पैलादिभिरिति । हे सौम्य ॥ ३६ ॥ ॥

१ 'गम्भीरया' इति शुक० संमतः पाठः । 'दुर्भाव्य लया' इति वीर० पाठः । २ 'यद्विकारः' इति वीर० पाठः । ३ 'वचश्च' इति पाठः । ४ 'विरमेन्मुनिः स्वयम्' इति पाठः ।

तत्र प्रथमं वेदाविर्भावप्रकारमाह—समाहितात्मन इत्यष्टभिः । ब्रह्मणो हृदि य आकाशस्तस्मान्नादोऽभूत् । यः कर्णपुटपिधानेन श्रोत्रवृत्तिनिरोधादस्मदादिष्वपि विभाव्यते वितर्क्यते ॥ ३७ ॥ प्रसङ्गान्नादोपासकानां मोक्षफलमाह—यस्य नादस्योपासनयात्मनो मलं धूत्वाऽपोह्य । कथंभूतं मलं तमाह—द्रव्यमधिभूतम्, क्रिया अध्यात्मम्, कारकमधिदैवम्, एवं त्रिधाभूता आख्या यस्येति तथा तम् ॥ ३८ ॥ त्रिवृत् त्रिमात्रः कण्ठोष्ठादिभिरुच्चार्यमाणस्योङ्कारस्याक्षरसमाम्नायान्तर्भावात्सूक्ष्मतया तं विशिनष्टि—अव्यक्तः प्रभवो यस्य सः । तदेवाह—स्वराट् स्वत एव हृदि प्रकाशमानः । तमेव कार्येण लक्षयति—यत्तदिति । नपुंसकत्वं लिङ्गशब्दविशेषणत्वात् । लिङ्गं [1]गमकम् ॥ ३९ ॥ कोऽसौ परमात्मा तमाह—शृणोतीति । इमं स्फोटमव्यक्तमोङ्कारम् । ननु जीव एव तं शृणोतु, नेत्याह—सुप्तश्रोत्रे कर्णपिधानादिनाऽवृत्तिकेऽपि श्रोत्रे सति । जीवस्तु करणाधीनज्ञानत्वान्न तदा श्रोता । तदुपलब्धिस्तु तस्य परमात्मद्वारिकैवेति भावः । ईश्वरस्तु नैवम्, यतः शून्यदृक् । शून्येऽपीन्द्रियवर्गे दृक् ज्ञानं यस्य । तथा हि—सुप्तो यदा शब्दं श्रुत्वा प्रबुध्यते न तदा जीवः श्रोता, लीनेन्द्रियत्वात् । अतो यस्तदा शब्दं श्रुत्वा जीवं प्रबोध-

॥ सूत उवाच ॥ समाहितात्मनो ब्रह्मन्ब्रह्मणः परमेष्ठिनः ॥ [2]हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ॥ ३७ ॥
यदुपासनया ब्रह्मन् योगिनो मलमात्मनः ॥ द्रव्यक्रियाकारकाख्यं धूत्वा यान्त्यपुनर्भवम् ॥ ३८ ॥ ततोऽभूत्त्रिवृदोङ्कारो योऽव्यक्तप्रभवः स्वराट् ॥ यत्तल्लिङ्गं भगवतो ब्रह्मणः परमात्मनः ॥ ३९ ॥ शृणोति य इमं स्फोटं सुप्तश्रोत्रे च शून्यदृक् ॥ येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः ॥४०॥ स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः ॥ स सर्वमन्त्रोपनिषद्वेदबीजं सनातनम् ॥ ४१ ॥ तस्य ह्यासंस्त्रयो वर्णा अकाराद्या भृगूद्वह ॥ धार्यन्ते [3]यैस्त्रयो भावा गुणनामार्थवृत्तयः ॥ ४२ ॥ ततोऽक्षरसमाम्नायमसृजद्भगवानजः ॥ अन्तस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणम् ॥ ४३ ॥ [4]तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैर्विभुः ॥ [5]सव्याहृतिकान्सोङ्कारांश्चातुर्होत्रविवक्षया ॥ ४४ ॥ ॥

यति स यथा परमात्मैव तद्वत् । कोऽसावोङ्कारस्तं विशिनष्टि सार्धेन—येन वाग्बृहती व्यज्यते । यस्य च हृदयाकाशे आत्मनः सकाशाद्व्यक्तिरभिव्यक्तिः ॥ ४० ॥ किंच, स्वधाम्नः स्वस्याश्रयः कारणं यद्ब्रह्म तस्य । किंच, परमात्मांशभूतसमस्तदेवतावाचकोऽपीत्याशयेनाह—स इति । सर्वमन्त्राणामुपनिषद्रहस्यसूक्ष्मरूपमित्यर्थः । तत्र हेतुः—वेदानां बीजं कारणम् । बीजत्वेऽप्यविकारितामाह—सनातनं सदैकरूपम्, तस्य ब्रह्मरूपत्वात् ॥ ४१ ॥ इदानीं ततः सर्वप्रपञ्चोत्पत्तिप्रकारमाह—तस्य हीति । त्रयस्त्रिसंख्यायुक्ता भावा यैरकारोकारमकारैर्धार्यन्ते तत्कारणत्वात् । तानेवाह—गुणाः सत्त्वादयः । नामानि ऋग्यजुःसामानि । अर्था भूर्भुवःस्वर्लोकाः । वृत्तयो जाग्रदाद्याः ॥ ४२ ॥ ततस्तेभ्यो वर्णेभ्यः । अक्षराणां समाम्नायं समाहारम् । तमेवाह—अन्तस्था यरलवाः । ऊष्माणः शषसहाः । स्वरा अकाराद्याः । स्पर्शाः [6]कादयः । ह्रस्वदीर्घाश्च । आदिशब्दाज्जिह्वामूलीयादयः । त एव लक्षणं स्वरूपं यस्य तम् ॥ ४३ ॥ विभुश्चतुर्मुखस्वरूपो भगवान् । असृजदिति पूर्वस्यैवानुषङ्गः । चातुर्होत्रविवक्षया चत्वारो होत्रोपलक्षिता ऋत्विजश्चतुर्होतारस्तैरनुष्ठेयं हौत्राध्वर्यवादिकं कर्म चातुर्होत्रं तद्विवक्षया ॥ ४४ ॥ ॥

१ ज्ञापकम् । २ 'हृदाकाशात्' इति पाठः । तत्र परमेष्ठिन इत्यस्यैकदेशान्वयः । ३ यैरकारादिभिः त्रयो भावाः सृष्ट्यादयः तेन गुणत्रयव्यापारभूताः । ४ तेनाक्षरसमाम्नायेन । ५ व्यक्तोङ्कारसहितान् । ६ कादयो मावसानाश्च वर्णाः ।

पुत्रान्मरीच्यादीन् । तान्वेदान् । ब्रह्मकोविदान्वेदोच्चारणादिनिपुणान् ॥ ४५ ॥ एवं चतुर्युगेषु प्राप्ताः । द्वापरादौ द्वापरमादिर्यस्य तदन्त्यांशलक्षणस्य कालस्य तस्मिन्, द्वापरान्ते वेदविभागप्रसिद्धेः, शन्तनुसमकालं व्यासावतारप्रसिद्धेश्च । व्यस्ता विभक्ताः ॥ ४६ ॥ तत्र हेतुः—क्षीणायुषो जनान् । तर्हि पुरुषबुद्धिप्रभवत्वादनादरणीयत्वं स्यादित्याशङ्क्याह—हृदिस्थेति ॥ ४७ ॥ एवं सामान्यतो वेदविभागक्रममुक्त्वा वैवस्वतमन्वन्तरे विशेषतो निरूपयितुमाह—अस्मिन्नपीति ॥ ४८ ॥ अंशो माया तस्या अंशः सत्त्वं तस्य कलयांऽशेनावतीर्णः सन् ॥ ४९ ॥ चातुर्विध्यमेवाह—ऋगिति । ऋगादिमन्त्राणां राशीन्वर्गशस्तत्तत्प्रकरणभेदैरुद्धृत्य यथाऽनेकविधमणिराशेर्मणिगणाः पद्मरागादयो विविच्योद्ध्रियन्ते तद्वदुद्धृत्य तैर्मन्त्रैश्चतस्र ऋगादिसंहिताश्चक्रे ॥ ५० ॥ तासां

पुत्रानध्यापयत्तांस्तु ब्रह्मर्षीन्ब्रह्मकोविदान् ॥ ते तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन् ॥ ४५ ॥ ते परम्परया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः ॥ चतुर्युगेष्वथ व्यस्ता द्वापरादौ महर्षिभिः ॥ ४६ ॥ क्षीणायुषः क्षीणसत्त्वान्दुर्मेधान्वीक्ष्य कालतः ॥ वेदान्ब्रह्मर्षयो व्यस्यन्हृदिस्थाच्युतचोदिताः ॥ ४७ ॥ अस्मिन्नप्यन्तरे ब्रह्मन् भगवाँल्लोकभावनः ॥ ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्मगुप्तये ॥ ४८ ॥ पराशरात्सत्यवत्यामंशांशकलया विभुः ॥ अवतीर्णो महाभाग वेदं चक्रे चतुर्विधम् ॥ ४९ ॥ ऋगथर्वयजुःसाम्नां राशीनुद्धृत्य वर्गशः ॥ चतस्रः संहिताश्चक्रे मन्त्रैर्मणिगणा इव ॥ ५० ॥ तासां स चतुरः शिष्यानुपाहूय महामतिः ॥ एकैकां संहितां ब्रह्मन्नेकैकस्मै ददौ विभुः ॥ ५१ ॥ पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह ॥ वैशंपायनसंज्ञाय निगदाख्यं यजुर्गणम् ॥ ५२ ॥ साम्नां जैमिनये प्राह तथा छन्दोगसंहिताम् ॥ अथर्वाङ्गिरसीं नाम स्वशिष्याय सुमन्तवे ॥ ५३ ॥ पैलः स्वसंहितामूच इन्द्रप्रमितये मुनिः ॥ बाष्कलाय च सोऽप्याह शिष्येभ्यः संहितां स्वकाम् ॥ ५४ ॥ चतुर्धा व्यस्य बोध्याय याज्ञवल्क्याय भार्गव ॥ पराशरायाग्निमित्रे इन्द्रप्रमितिरात्मवान् ॥ ५५ ॥ अध्यापयत्संहितां स्वां माण्डूकेयमृषिं कविम् ॥ तस्य शिष्यो देवमित्रः सौभर्यादिभ्य ऊचिवान् ॥ ५६ ॥ शाकल्यस्तत्सुतः स्वां तु पञ्चधा व्यस्य संहिताम् ॥ वात्स्यमुद्गलशालीयगोखल्यशिशिरेष्वधात् ॥ ५७ ॥

संहितानां मध्ये एकैकाम् ॥ ५१ ॥ ऋक्समुदायरूपत्वाद्बह्वृचाख्याम् । नितरां प्रश्लेषेण गद्यमानत्वान्निगदाख्यम् ॥ ५२ ॥ छन्दःसु गीयमानत्वाच्छन्दोगाख्यां संहिताम् ॥ ५३ ॥ तत्र ऋग्वेदशाखाविभागमाह—पैल इति । स्वसंहितां द्विधा विभज्य इन्द्रप्रमितये बाष्कलाय च ऊचे । स बाष्कलोऽपि स्वकां संहितां चतुर्धा व्यस्य बोध्यादिभ्यः शिष्येभ्य आह—हे भार्गव, इन्द्रप्रमितिरपि स्वां संहितां स्वसुतं माण्डूकेयमध्यापयामास । तस्य माण्डूकेयस्य शिष्यो देवमित्रः ॥ ५४ ॥ ५५ ॥ ५६ ॥ तत्सुतो माण्डूकेयसुतः शाकल्यो वात्स्यादिषु पञ्चस्व धात् । तानध्यापयामासेत्यर्थः ॥ ५७ ॥ ॥ ॥

तच्छिष्यः शाकल्यशिष्यः स्वसंहितां त्रेधा विभज्य चतुर्थं वैदिकपदार्थव्याख्यानरूपं निरुक्तं च कृत्वा बलाकादिभ्यश्चतुर्भ्यो ददौ ॥ ५८ ॥ बाष्कलिः पूर्वोक्तस्य बाष्कलस्य पुत्रः । प्रतिशाखाभ्य उक्तसर्वशाखाभ्यः । बालायन्यादयस्तामादधुरधीतवन्तः ॥ ५९ ॥ ऋक्शाखोपसंहारपूर्वकं तच्छ्रवणफलमाह—बह्वृचा इति । एतच्छन्दसामेतेषां छन्दसाम् ॥ ६० ॥ यजुर्वेदे तैत्तिरीयशाखोत्पत्तिप्रस्तावमाह—वैशंपायनशिष्या इत्यादिना । चरकनामनिरुक्तिमाह—यचेरुरिति । यद्यस्मा- द्ब्रह्महत्यारूपमंहः क्षपयतीति तथा तत्स्वगुरोरनुष्ठेयं व्रतं तच्चरणाच्चरका इत्यर्थः ॥६१॥ तच्छिष्यो वैशंपायनशिष्यः । अल्पसाराणामेतेषां चरितेन कियत्, सुदु- श्चरमहं चरिष्यामीति ॥६२॥ विप्राणामवमन्त्राऽवज्ञाकर्त्रा । मत्तोऽधीतमाशु त्यजेति ॥ ६३ ॥ देवरातसुतो याज्ञवल्क्यः ॥ ६४ ॥ छर्दितस्यादानं विप्ररूपेणा-

जातूकर्ण्यश्च तच्छिष्यः सनिरुक्तां स्वसंहिताम् ॥ बलाकपैजवैतालविरजेभ्यो ददौ मुनिः ॥ ५८ ॥ बाष्कलिः प्रतिशाखाभ्यो वालखिल्याख्यसंहिताम् ॥ चक्रे बालायनिर्भज्यः[1] कासारश्चैव तां दधुः ॥५९॥ बह्वृचाः संहिता ह्येता एभिर्ब्रह्मर्षिभिर्धृताः ॥ श्रुत्वैतच्छन्दसां व्यासं सर्वपापैः प्रमुच्यते ॥ ६० ॥ वैशंपायनशिष्या वै चरकाध्वर्यवोऽभवन् ॥ यच्चेरुर्ब्रह्महत्यांहः[2]क्ष- पणं स्वगुरोर्व्रतम् ॥ ६१ ॥ याज्ञवल्क्यश्च तच्छिष्य आहाहो भगवन्कियत् ॥ चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरम् ॥६२॥ इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया ॥ विप्रावमन्त्रा शिष्येण मदधीतं त्यजाश्विति ॥६३॥ देवरातसुतः सोऽपि च्छर्दित्वा यजुषां गणम् ॥ ततो गतोऽथ मुनयो ददृशुस्तान्यजुर्गणान् ॥६४॥ यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाऽऽददुः ॥ तैत्तिरीया इति यजुःशाखा आसन्सुपेशलाः ॥ ६५ ॥ याज्ञवल्क्यस्ततो ब्रह्मंश्छन्दांस्यधिगवेषयन् ॥ गुरोरविद्यमानानि सूपतस्थेऽर्कमीश्वरम् ॥६६॥ ॥ याज्ञवल्क्य उवाच ॥ ॐ नमो भगवते आदित्यायाखिलजगतामात्मस्वरूपेण कालस्वरू- पेण चतुर्विधभूतनिकायानां ब्रह्मादिस्तम्बपर्यन्तानामन्तर्हृदयेषु बहिरपि चाकाश इवोपाधिनाऽव्यवधीयमानो भवा- नेक एव क्षणलवनिमेषावयवोपचितसंवत्सरगणेनापामादानविसर्गाभ्यामिमां लोकयात्रामनुवहति ॥ ६७ ॥ ॥

नुचितमिति तित्तिराः पक्षिविशेषा भूत्वा आददुः । ततश्च तैत्तिरीया इति प्रसिद्धाः । सुपेशला अतिरम्याः । बहुवचनमवान्तरभेदविवक्षया ॥६५॥ काण्वमाध्यन्दि- नादिशाखाप्रसङ्गमाह—याज्ञवल्क्य इत्यादिना । गुरोर्वैशंपायनस्य व्यासेन विभज्यानुक्तत्वादविद्यमानान्यधिकानि गवेषयन्मृगयन्सूपतस्थे सम्यक् तुष्टाव । ईश्वर- मृगादिवेदानाम् । तथा च श्रुतिः—'ऋग्भिः पूर्वाह्णे दिवि देव ईयते । यजुर्वेदे तिष्ठति मध्ये अह्नः ॥ सामवेदेनास्तमये महीयते । वेदैरशून्यस्त्रिभिरेति सूर्यः' इति ॥ ६६ ॥ नमो भगवते तुभ्यमादित्याय । यो भवानेक एवेमां लोकयात्रामनुवहतीत्यन्वयः । तदेव दर्शयति—अखिलजगतामात्मस्वरूपेणान्तर्हृदयेषु काल-

[1] अत्र 'भज्यः' इति 'गार्ग्यः' इति 'भार्ग्यः' इति कासार इत्यत्र काश्मार इति साकार इति च नानाविधाः पाठा दृश्यन्ते । तत्र सदसद्विचारः सुधीभिः कर्तव्यः । [2] ब्रह्महत्याहेतुरुक्तो विष्णुपुराणे—'ऋषिर्योऽद्य महामेरौ समाजेनागमिष्यति ॥ तस्य वै सप्तरात्रात्तु ब्रह्महत्या भविष्यति ॥ पूर्वमेवं मुनिगणैः समयोऽभूत्कृतो द्विज ॥ वैशंपायन एकस्तु तं व्यतिक्रान्तवांस्तदा ॥ स्वस्रीयं बालकं सोऽथ पदा स्पृष्टमघातयत् ॥ शिष्यानाह च भोः शिष्या ब्रह्महत्यापहं व्रतम् ॥ चरध्वं मत्कृते सर्वे न विचार्यमिदं तथा ॥' इति ।

स्वरूपेण च बहिरपि वर्तमान इति । अखिलजगतामित्यस्य प्रपञ्चः—चतुर्विधेति । हृदयान्तर्वर्तित्वेऽपि जीववत्तेनोपाधिनाऽव्यवधीयमानोऽनाच्छाद्यमानः । कालस्वरूपेण चेत्यस्य प्रपञ्चः—क्षणेति । क्षणलवादयो येऽवयवास्तैरुपचिताः संवत्सरास्तेषां गणेन प्रत्यब्दमपामादानं शोषणं विसर्गो वृष्टिस्ताभ्याम् । अनेन गायत्रीप्रथमपादोक्तवरेण्यतानुवर्णिता ॥ ६७ ॥ द्वितीयपादार्थानुवर्णनेन स्तौति—यदु हेति । हे विबुधर्षभ हे सवितः, यदप्यदो भगवतस्तव मण्डलं तपति तत्समभिधीमहीति सम्यगाभिमुख्येन ध्यायेम । पुनस्तस्यैव संबोधनम् । प्रत्यहं त्रिषवणं वैदिककर्ममार्गेण स्तुवतां भक्तानां यान्यखिलानि दुरितानि तत्फ- लानि च वृजिनानि दुःखानि तेषां बीजमज्ञानं च तेषामवभर्जन विनाशक हे तपनेति ॥ ६८ ॥ तृतीयपादेन स्तौति—य इहेति । भवान् स्थावरजङ्गम- समूहानां स्वाश्रयाणां जीवानां मनइन्द्रियप्राणगणाननात्मनो जडान्स्वयमात्मैवान्तर्यामी सन्प्रचोदयति प्रवर्तयति ॥ ६९ ॥ तृतीयपादमेव मण्डलस्थपरतया

यदु ह वाव विबुधर्षभ सवितरदस्तपत्यनुसवनमहरहराम्नायविधिनोपतिष्ठमानानामखिलदुरितवृजिनबीजा- वभर्जन भगवतः समभिधीमहि तपनमण्डलम् ॥ ६८ ॥ य इह वाव स्थिरचरनिकराणां निजनिकेतनानां मन- इन्द्रियासुगणाननात्मनः स्वयमात्मान्तर्यामी प्रचोदयति ॥ ६९ ॥ य एवेमं लोकमतिकरालवदनान्धकारसंज्ञाजगर- ग्रहगिलितं मृतकमिव विचेतनमवलोक्यानुकम्पया परमकारुणिक ईक्षयैवोत्थाप्याहरहरनुसवनं श्रेयसि स्वध- र्माख्यात्मावस्थाने प्रवर्तयत्यवनिपतिरिवासाधूनां भयमुदीरयन्नटति ॥ ७० ॥ परित आशापालैस्तत्र तत्र कमलको- शाञ्जलिभिरुपहृतार्हणः ॥ ७१ ॥ अथ ह भगवंस्तव चरणनलिनयुगलं त्रिभुवनगुरुभिर्वन्दितमहमयातयामयजुःकाम उपसरामीति ॥ ७२ ॥ ॥ सूत उवाच ॥ एवं स्तुतः स भगवान्वाजिरूपधरो हरिः ॥ यजूंष्ययातयामानि मुनयेऽदात्प्र- सादितः ॥ ७३ ॥ यजुर्भिरकरोच्छाखा दश पञ्चशतैर्विभुः ॥ जगृहुर्वाजसन्यस्ताः[1] काण्वमाध्यन्दिनादयः ॥ ७४ ॥ जैमिनेः सामगस्यासीत्सुमन्तुस्तनयो मुनिः ॥ सुन्वांस्तु[2] तत्सुतस्ताभ्यामेकैकां प्राह संहिताम् ॥ ७५ ॥ ॥

व्याचक्षाणः स्तौति—य एवेति । य एक एव भगवानतिकरालवदनो योऽन्धकारसंज्ञोऽजगरग्रहस्तेन गिलितमत एव मृतकमिव विचेतनं स्वधर्माख्यं यदा- त्मावस्थानं प्रत्यक्प्रवणत्वं तदेव श्रेयस्तस्मिन्प्रवर्तयति । किंच, यो भवानवनिपतिरिवाटति गच्छति ॥ ७० ॥ आशापालैरिन्द्रादिभिः । कमलकोशयुक्तैस्त- त्तुल्यैर्वाऽञ्जलिभिरुपहृतार्हणो दत्तार्घः ॥ ७१ ॥ यत एवंभूतस्त्वमथातः ह स्फुटमयातयामान्यन्यैर्यथावदविज्ञातानि यजूंषि तत्कामोऽहमुपसरामि भजामि ॥ ७२ ॥ एवं स्तुतः प्रसादितश्च ॥ ७३ ॥ पञ्चदश शाखाः याः शतैरपरिमितैर्यजुर्भिरकरोत् । स तैरिति पाठे स एष याज्ञवल्क्यस्तैर्यजुर्भिरकरोदिति । जगृहुरधीतवन्तः । रविणाश्वरूपेण वाजेभ्यः केसरेभ्यो वाजेन वेगेन वा संन्यस्तास्त्यक्ताः शाखा वाजसनीसंज्ञास्ताः शाखा इति वा ॥ ७४ ॥ सामशाखा- विभागमाह—जैमिनेरिति । तत्सुतः सुमन्तुसुतः । ताभ्यां पुत्रपौत्राभ्यां क्रमेणैकैकां प्राह ॥ ७५ ॥ ॥ ॥

[1] 'वाजिसन्यः' इति पाठः । [2] 'सुतन्वांस्तत्सुतः' इति वीर० संमतः पाठः । 'क्षुमन्वान्' इति च पाठः ।

तच्छिष्यो जैमिनेः शिष्यः । महानतिमेधावी । सहस्रसंहितारूपं भेदं चक्रे । साम्नां तं संहिताभेदम् । ततस्तदनन्तरम् । सुकर्मणः शिष्य एकः कौशल्यो हिरण्यनाभः पौष्यञ्जिर्नामैकस्तौ जगृहतुः । आवन्त्यश्चान्यस्तस्यैव शिष्यः सोऽपि जग्राह ॥ ७६ ॥ ७७ ॥ पौष्यञ्ज्यावन्त्ययोरपि चकाराद्धिरण्यनाभस्यापि पञ्चशतानि शिष्या आसन् । ते तावतीः शाखा यथायथं जगृहुः । तानुदीच्यान्सतः कालतः कांश्चित्प्राच्यांश्च प्रचक्षत इत्यर्थः । यथैवोक्तं वैष्णवे—'उदीच्यसामगाः शिष्यास्तस्य पञ्चशतं स्मृताः ॥ हिरण्यनाभात्तावत्यः संहिता यैर्द्विजोत्तमैः ॥ गृहीतास्तेऽपि चोच्यन्ते पण्डितैः प्राच्यसामगाः ॥' इति ॥ ७८ ॥ पुनरप्येतेषां त्रयाणां सुकर्मणः शिष्याणां शिष्यान्तरैः शाखाबाहुल्यं दर्शयति—लौगाक्षिरिति द्वाभ्याम् ॥ ७९ ॥ कृतो नाम हिरण्यनाभस्य शिष्यः स्वशिष्येभ्य ऊचे । शेषा अन्या अपि याः प्रसिद्धाः शाखास्ता आवन्त्यः स्वशिष्येभ्य ऊच इति ॥८०॥ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे भावार्थदीपिकायां

सुकर्मा चापि तच्छिष्यः सामवेदतरोर्महान् ॥ सहस्रसंहिताभेदं चक्रे साम्नां ततो द्विजः ॥ ७६ ॥ हिरण्यनाभः कौशल्यः पौष्यञ्जिश्च सुकर्मणः ॥ शिष्यो जगृहतुश्चान्य आवन्त्यो ब्रह्मवित्तमः ॥ ७७ ॥ उदीच्याः सामगाः शिष्या आसन्पञ्चशतानि वै ॥ पौष्यञ्ज्यावन्त्ययोश्चापि तांश्च प्राच्यान्प्रचक्षते ॥ ७८ ॥ लौगाक्षिर्माङ्गलिः कुल्यः कुशीदः कुक्षिरेव च ॥ पौष्यञ्जिशिष्या जगृहुः संहितास्ते शतं शतम् ॥ ७९ ॥ कृतो हिरण्यनाभस्य चतुर्विंशतिसंहिताः ॥ शिष्य ऊचे स्वशिष्येभ्यः शेषा आवन्त्य आत्मवान् ॥ ८० ॥ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे वेदशाखाप्रणयनं नाम षष्ठोऽध्यायः॥ ६॥ ॥ छ॥ ॥ सूत उवाच ॥ अथर्ववित्सुमन्तुश्च शिष्यमध्यापयत्स्वकाम् ॥ संहितां सोऽपि पथ्याय वेददर्शाय चोक्तवान् ॥ १ ॥ शौक्लायनिर्ब्रह्मबलिर्मोदोषः पिप्पलायनिः ॥ वेददर्शस्य शिष्यास्ते पथ्यशिष्यानथो शृणु ॥ कुमुदः शुनको ब्रह्मञ्जाजलिश्चाप्यथर्ववित् ॥ २॥ बभ्रुः शिष्योऽथाङ्गिरसः सैन्धवायन एव च ॥ अधीयेतां संहिते द्वे सावर्ण्याद्यास्तथापरे ॥ ३ ॥ ॥

टीकायां षष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥ ॥ सप्तमेऽथर्वविस्तारः पुराणव्यसनं ततः ॥ पुराणलक्षणादीनि फलं भागवतश्रुतेः ॥ १ ॥ क्रमप्राप्तमथर्ववेदविभागमाह—अथर्वविदिति । शिष्यं कबन्धनामानम् । स्वकां स्वकीयां संहिताम् । सोऽपि शिष्योऽपि तां द्विधा विभज्य । तदुक्तं वैष्णवे—'अथर्ववेदं स मुनिः सुमन्तुरमितद्युतिः ॥ शिष्यमध्यापयामास कबन्धं सोऽपि च द्विधा । कृत्वा तु वेददर्शाय तथा पथ्याय दत्तवान् ॥' इति ॥ १ ॥ तत्र वेददर्शः स्वसंहितां चतुर्धा विभज्य चतुरः शिष्यानध्यापयामास । पथ्यश्च त्रिधा विभज्य त्रीनित्याह सार्धेन—शौक्लायनिरिति ॥ २ ॥ अङ्गिरसः शुनकस्य शिष्यो बभ्रुः सैन्धवायनश्च । तदुक्तम्—'शुनकस्तु द्विधा कृत्वा ददावेकां तु बभ्रवे ॥ द्वितीयां संहितां प्रादात्सैन्धवायनसंज्ञिने ॥' इति । सावर्ण्याद्याः सैन्धवायनादीनां शिष्याः ॥ ३ ॥

१ 'द्विजाः' इति पाठः । २ 'तांश्चोदीच्यान्' इति पाठः । ३ 'लोकाक्षिर्लौङ्गलिः कल्पः' इति पाठः । ४ 'कुसीदः' इति पाठः । ५ 'स्विकाम्' इति पाठः ।

नक्षत्रकल्पः शान्तिकल्पश्चेति द्वौ । तदुक्तम्—'नक्षत्रकल्पो वेदानां संहितानां तथैव च ॥ चतुर्थः स्यादाङ्गिरसः शान्तिकल्पश्च पञ्चमः ॥' इति । नक्षत्रकल्पादीनां कर्तारस्तत्तन्नामभिरुच्यन्ते ॥ ४ ॥ ५ ॥ मत्पितुर्मुखादिति । प्रथमं व्यासः षट्संहिताः कृत्वा मत्पित्रे रोमहर्षणाय प्रादात् । तस्य च मुखादेते त्रय्यारुण्यादय एकैकां संहितामधीयन्त । एतेषां षण्णां शिष्योऽहं ताः सर्वाः समधीतवान् ॥ ६ ॥ रामशिष्योऽकृतव्रणः । एवं चत्वारो वयम् । मूलसंहिता इत्यनेन ततः संहिताबाहुल्यं सूचितम् ॥ ७ ॥ शुकपरीक्षित्संवादे निरूपितमपि पुराणलक्षणं तद्भेदकथनाय दर्शयति—पुराणेति ॥ ८ ॥ अस्य विश्वस्य 'अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ॥ मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥' इत्यत्रोक्ते स्थानपोषणे वृत्तिरक्षाशब्दाभ्यामुच्येते । अन्तराणि मन्वन्तराणि वंशो वंश्यानुचरितमितीशानुकथाः । संस्था निरोधः । अनेनैवात्यन्तिकलयरूपा मुक्तिरप्युक्ता । हेतुशब्देन जीवाश्रयवासनाशब्दवाच्या ऊतयो गृहीताः ॥ ९ ॥ दशभिरेतैर्लक्षणैरर्थैर्युक्तं महापुराणं विदुः ।

नक्षत्रकल्पः शान्तिश्च कश्यपाङ्गिरसादयः ॥ एते आथर्वणाचार्याः शृणु पौराणिकान्मुने ॥ ४ ॥ त्रय्यारुणिः कश्यपश्च सावर्णिरकृतव्रणः ॥ वैशंपायनहारीतौ षड्वै पौराणिका इमे ॥ ५ ॥ अधीयन्त व्यासशिष्यात्संहितां मत्पितुर्मुखात् ॥ एकैकामहमेतेषां शिष्यः सर्वाः समध्यगाम् ॥ ६ ॥ कश्यपोऽहं च सावर्णी रामशिष्योऽकृतव्रणः ॥ अधीमहि व्यासशिष्याच्चतस्रो मूलसंहिताः ॥ ७ ॥ पुराणलक्षणं ब्रह्मन्ब्रह्मर्षिभिर्निरूपितम् ॥ शृणुष्व बुद्धिमाश्रित्य वेदशास्त्रानुसारतः ॥८॥ सर्गोऽस्याथ विसर्गश्च वृत्तिरक्षान्तराणि च ॥ वंशो वंश्यानुचरितं संस्था हेतुरपाश्रयः ॥ ९ ॥ दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः ॥ केचित्पञ्चविधं ब्रह्मन्महदल्पव्यवस्थया ॥ १० ॥ अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽहमः ॥ भूतमात्रेन्द्रियार्थानां संभवः सर्ग उच्यते ॥ ११ ॥ पुरुषानुगृहीतानामेतेषां वासनामयः ॥ विसर्गोऽयं समाहारो बीजाद्बीजं चराचरम् ॥ १२ ॥ ॥ ॥

केचित्पञ्चविधम्—'सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ॥ वंशानुचरितं चेति पुराणं पञ्चलक्षणम् ॥' इति । महत्पुराणमल्पं चेति व्यवस्थया यत्र दशापि लक्षणानि पृथक् पृथङ्निरूप्यन्ते तन्महापुराणम् । यत्र त्वन्येषां पंचस्वेवान्तर्भावस्य विवक्षा तदल्पमिति व्यवस्थयेत्यर्थः ॥१०॥ सर्गादिलक्षणानि व्याचष्टे—अव्याकृतेत्यादिना । अव्याकृतस्य प्रधानस्य गुणानां क्षोभाद्यो महांस्तस्माद्यस्त्रिवृदहंकारस्तस्माद्भूतमात्राणां सूक्ष्माणामिन्द्रियाणां च तदर्थानां च स्थूलानां देवतानां च संभवः सर्गः कारणसृष्टिसर्ग इत्यर्थः । उच्यत इति यथाऽपेक्षमुत्तरत्राप्यनुषङ्गः ॥ ११ ॥ विसर्गं व्याचष्टे—पुरुषेणेश्वरेणानुगृहीतानामेतेषां महदादीनाम् । पूर्वकर्मवासनाप्रधानोऽयं समाहारः कार्यभूतश्चराचरप्राणिरूपो बीजाद्बीजमिव प्रवाहापन्नो विसर्ग उच्यत इत्यर्थः ॥ १२ ॥ ॥

१ विष्णुपुराणवाक्यमिदम् । तद्व्याख्या चेत्थम्—कल्पशब्दस्य प्रत्येकं संबन्धः । वेदकल्पः संहिताकल्प आङ्गिरसकल्प इति । नक्षत्रकल्पो नक्षत्रादिपूजाविधिः । वेदकल्पो वैतानिकब्रह्मत्वादिविधिः । संहिताकल्पः संहिताविधिः । अङ्गिरसकल्पोऽभिचारादिविधिः । शान्तिकल्पोऽश्वगजाद्यष्टादशमहाशान्त्यादिविधिरिति । २ अथर्ववेदशाखाविभाजनेन तत्प्रवर्तका इत्यर्थः । ३ 'शांशपायन', 'शिंशपायन' इति पाठौ । ४ ब्रह्मर्षिभिः शुकचरणैरुपक्रमे यदुक्तं प्रायेण तदेवोपसंहारेऽप्युच्यते । ५ 'सर्गश्चैव विसर्गश्च' इति विज० संमतः पाठः । ६ 'भूतसूक्ष्मेन्द्रिय' इति वीर० संमतः पाठः । ७ 'यः समाहारः' इति पाठः । ८ 'जीवो जीवश्चराचरः' इति विज० संमतः पाठः ।

चराणां भूतानां सामान्यतोऽचराणि चकाराच्चराणि च वृत्तिः। तत्र नृणा स्वेन स्वभावेन कामाच्चोदनयापि वा या नियता वृत्तिर्जीविका कृता सा वृत्ति-रुच्यत इत्यर्थः ॥ १३ ॥ तिर्यङ्मर्त्यर्षिदेवेषु येऽच्युतावतारास्तेषामीहा लीला सा विश्वस्य रक्षोच्यत इत्यर्थः । यैरवतारैरिति समासान्निष्कृष्य कथंचित्सं-बन्धः । त्रयीद्विषो दैत्याः ॥ १४ ॥ षड्विधं मन्वन्तरमुच्यते । षड्विधत्वमेवाह—मनुरिति । मन्वादयः षडेते वर्गाः स्वस्वाधिकारेण यदा प्रवर्तन्ते तन्मन्व-न्तरमित्यर्थः ॥ १५ ॥ वंशमाह—राज्ञामिति । ब्रह्मणः सकाशात्प्रसूतिर्येषां शुद्धानामित्यर्थः । तेषामन्वयो वंशः । तेषां वृत्तम् । ये च तद्वंशधरास्तेषां च वृत्तं वंशानुचरितमुच्यते ॥ १६ ॥ अस्य विश्वस्य । स्वभावतो मायातो निष्पन्नस्य । यद्वा, मायातो यश्चतुर्विधो लय इति ॥ १७ ॥ अस्य जगतः सर्गादेर्हेतुर्नि-मित्तं जीवः सोऽत्र हेतुरुच्यत इत्यर्थः । तस्य निमित्ततामाह—अविद्यया कर्मकारकः कर्मकर्ता । जीवादृष्टप्रयुक्तत्वाद्विश्वसर्गादेः स तु तत्र हेतुरित्यर्थः । नन्वनुशयी निमित्तमिति केचित्, अव्याकृतमित्यपरे, तत्राह—यमिति । चैतन्यप्राधान्येनानुशयिनमुपाधिप्राधान्यविवक्षयाऽव्याकृतम् ॥ १८ ॥ अपाश्रय-

वृत्तिर्भूतानि भूतानां चराणामचराणि च ॥ कृतां[3] स्वेन नृणां तत्र कामाच्चोदनयापि वा ॥१३॥ रक्षाच्युतावतारेहा विश्व-
स्यानुयुगे युगे ॥ तिर्यङ्मर्त्यर्षिदेवेषु हन्यन्ते यैस्त्रयीद्विषः ॥१४॥ मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वराः ॥ ऋषयोंऽशा-
वतारश्च हरेः षड्विधमुच्यते ॥१५॥ राज्ञां ब्रह्म[4]प्रसूतानां वंशस्त्रैकालिकोऽन्वयः ॥ वंशानु[5]चरितं तेषां वृत्तं वंशधराश्च ये
॥ १६ ॥ नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः ॥ संस्थेति कविभिः प्रोक्ता चतुर्धास्य स्वभावतः ॥ १७ ॥ हेतु-
र्जीवोऽस्य सर्गादेरविद्याकर्मकारकः ॥ यं[6] चानुशयिनं प्राहुरव्याकृतमुतापरे ॥१८॥ व्यतिरेका[7]न्वयो यस्य जाग्रत्स्वप्नसुषु-
प्तिषु ॥ माया[8]मयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः ॥१९॥ पदार्थेषु यथा द्रव्यं सन्[9]मात्रं रूपनामसु ॥ बीजादिपञ्चतान्तासु
ह्यवस्थासु युतायुतम् ॥२०॥ विरमेत यदा चित्तं हित्वा वृत्ति[10]त्रयं स्वयम् ॥ योगेन वा तदात्मानं वेदे[11]हाया निवर्तते ॥२१॥

माह—व्यतिरेकेति । जाग्रदादिष्ववस्थासु जीवतया वर्तन्त इति जीववृत्तयो विश्व-तैजस-प्राज्ञास्तेषु मायामयेषु साक्षितयान्वयः समाध्यादौ च व्यतिरेको यस्य तद्ब्रह्म संसारप्रतीतिबाधयोरधिष्ठानावधिभूतमपाश्रय उच्यत इत्यर्थः ॥ १९ ॥ एतदेव सदृष्टान्तं प्रपञ्चयति—पदार्थेषु घटादिषु द्रव्यं मृदादि यथा युतमन्वितमयुतं च बहिरप्यवस्थानात् । रूपनामसु च सन्मात्रं सत्तामात्रं यथा । एवं बीजं गर्भाधानमादिर्यासां पञ्चताऽन्तो यासां तासु देहावस्थासु नव-स्वप्यधिष्ठानत्वेन साक्षित्वेन च युतमयुतं च यत्तदपाश्रय इति ॥ २० ॥ एवं दशापि लक्षणानि व्याख्याय 'दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम् ॥ वर्णयन्ति महात्मानः' इति यदुक्तं तदाह—विरमेतेति । यदा सर्गादीनां मायामयत्वानुसंधानेन वामदेवादेरिव स्वयमेव चित्तं विरमेत । इहैवानुष्ठितेन योगेन वा देवहूत्यादिवत् । तदा विक्षेपाभावादात्मानं वेद । तदा चाविद्यानिवृत्तेरीहायाः संसाररूपाया निवर्तेत इत्यर्थः ॥ २१ ॥ ॥ ॥

१ तेषां शुद्धानां राज्ञाम् । इदं च चकारेण लभ्यम् । २ प्रियव्रतध्रुवपृथ्वादयः । ३ 'कृतेशेन' इति पाठः । ४ 'मनुप्रसूतानां' इति पाठः । ५ 'वंश्यानुचरितं' इति पाठः । ६ 'यं वानु-शयिनं' इति पाठः । ७ 'व्यतिरेकान्वयौ' इति पाठः । ८ 'मायामयासु' इति पाठः । ९ 'तन्मात्रं' इति पाठः । १० 'वृत्तित्रयाश्रयम्' इति पाठः । ११ 'वेदात्मा तन्निवर्तते', 'वैदेहाय निवर्तते', 'वेदनात्मा निवर्तते' इति पाठाः ।

पुराणविभागप्रस्तावेन तल्लक्षणादिप्रासङ्गिकमुक्त्वा प्रस्तुतमाह—एवंविधैर्लक्षणैर्लक्ष्याणि ॥ २२ ॥ २३ ॥ त्रिषडष्टादश ॥ २४ ॥ उपसंहरति—ब्रह्मन्निति । मुनेर्व्यासस्य शिष्यादीनां च । ब्रह्मतेजो ब्रह्मवर्चसं तद्विवर्धनम् । श्रोतॄणामिति शेषः ॥ २५ ॥ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे भावार्थ-दीपिकायां टीकायां सप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ अष्टमे तु तपश्चर्या मार्कण्डेयस्य मोहकैः ॥ कामादिभिरसंमोहो नरनारायणस्तुतिः ॥ १ ॥ पुराणविभागप्रसङ्गेन पुराणकर्तुर्मार्कण्डेयस्य चरितप्रश्नमाह—सूतेति । त्वमेव वक्तुं योग्य इत्याह—तमसि संसारे भ्रमतां पारदर्शनस्तन्निवर्तकः ॥ १ ॥ वक्तव्यमाह—आहुरिति । उर्वरितोऽवशिष्टः । येन कल्पान्तेन । एतत्कथं घटत इत्येकः प्रश्नः ॥ २ ॥ प्रलयाभावादप्येतन्न घटत इत्याह—स वा इति ।

एवंलक्षणलक्ष्याणि पुराणानि पुराविदः ॥ मुनयोऽष्टादश प्राहुः क्षुल्लकानि महान्ति च ॥२२॥ ब्राह्मं पाद्मं वैष्णवं
च शैवं लैङ्गं सगारुडम् ॥ नारदीयं भागवतमाग्नेयं स्कान्दसंज्ञितम् ॥२३॥ भविष्यं ब्रह्मवैवर्तं मार्कण्डेयं सवामनम् ॥
वाराहं मात्स्यं कौर्मं च ब्रह्माण्डाख्यमिति त्रिषट् ॥२४॥ ब्रह्मन्निदं समाख्यातं शाखाप्रणयनं मुनेः ॥ शिष्यशिष्य-
प्रशिष्याणां ब्रह्मतेजोविवर्धनम् ॥२५॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे सप्तमोऽध्यायः ॥७॥ ॥छ॥
॥ शौनक उवाच ॥ सूत जीव चिरं साधो वद नो वदतां वर ॥ तमस्यपारे भ्रमतां नृणां त्वं पारदर्शनः ॥१॥ आहुश्चि-
रायुषमृषिं मृकण्डतनयं जनाः ॥ यः कल्पान्ते उर्वरितो येन ग्रस्तमिदं जगत् ॥२॥ स वा अस्मत्कुलोत्पन्नः कल्पेऽ-
स्मिन्भार्गवर्षभः ॥ नैवाधुनापि भूतानां संप्लवः कोऽपि जायते ॥ ३ ॥ एक एवार्णवे भ्राम्यन्ददर्श पुरुषं किल ॥
वटपत्रपुटे तोकं शयानं त्वेकमद्भुतम् ॥ ४ ॥ एष नः संशयो भूयान्सूत कौतूहलं यतः ॥ तं नश्छिन्धि महायोगि-
न्पुराणेष्वपि संमतः ॥५॥ ॥ सूत उवाच ॥ प्रश्नस्त्वया महर्षेऽयं कृतो लोकभ्रमापहः ॥ नारायणकथा यत्र गीता कलि-
मलापहा ॥६॥ प्राप्तद्विजातिसंस्कारो मार्कण्डेयः पितुः क्रमात् ॥ छन्दांस्यधीत्य धर्मेण तपःस्वाध्यायसंयुतः ॥ ७ ॥

यतो भार्गवर्षभः । कोऽपि प्राकृतिको नैमित्तिको वा ॥ ३ ॥ अन्यदप्यघटितमेवेत्याह—एक एवेति । तोकं बालकम् ॥ ४ ॥ कौतूहलमौत्सुक्यम् । तं संशयम् । न केवलं त्वं महायोगी किंतु पुराणेष्वपि ज्ञातृत्वेन संमतः ॥ ५ ॥ प्रश्नमभिनन्दति—हे महर्षे । अयं प्रश्नः । तत्र हेतुः—नारायणेति । यत्र प्रश्नविषये ॥ ६ ॥ तत्र मार्कण्डेयस्तपसा भगवन्तमाराध्य मायाप्रदर्शनं वव्रे । ततश्च तेनैव भगवन्मायया सप्तकल्पा दृष्टा नान्यैरित्युत्तरं वक्तुमादित आरभ्य तस्य चरितमाह—प्राप्त इत्यादिना । मार्कण्डेयो मृत्युं जिग्ये इति पञ्चमश्लोकेनान्वयः । मध्यमग्रन्थेन तस्य धर्मः कथ्यते । प्राप्तो द्विजातिसंस्कार उपनयनाख्यो येन सः । पितुः सकाशाद्गर्भाधानादिक्रमात् । छन्दांसि वेदान् ॥ ७ ॥ ॥ ॥

१ 'तपसि संशये' इति पाठः । २ 'ब्रह्मणैतत्' इति पाठः । ३ 'विदीपनम्' इति पाठः । ४ पुरुषं पुरुषाकारम् । ५ 'अर्भकम्' इति पाठः । ६ 'महत्कौतूहलं यतः', 'जातं कौतूहलं' इति पाठौ । ७ 'लोकमलापहः' इति पाठः ।

बृहद्व्रतधरो नैष्ठिको ब्रह्मचारी सन् ॥ ८ ॥ नियमर्द्धये धर्मवृद्धये अग्न्यादिषु पञ्चसु हरिमर्चयन् ॥ ९ ॥ भैक्ष्यं गुर्वर्थमाहृत्य तेनानुज्ञातश्चेत्तर्हि बुभुजे नो चेत्सकृत्कदाचिदुपोषितो भवति ॥१०॥११॥ तेन मृत्युजयेन ॥ १२ ॥ ध्वस्ताः क्लेशा रागादयो यस्य तेनान्तरात्मना प्रत्याहृतमनसा ॥१३॥१४॥ तस्य तपोनिष्ठामितिहासेन वर्णयति—एतदित्यादिना । अस्मिन्सप्तमे मन्वन्तरे । तपसा मत्पदं ग्रहीष्यतीति विशङ्कितः ॥ १५ ॥ मुनये मुनिं भ्रंशयितुम् । रजसस्तोकमतिप्रियमपत्यं लोभो मदश्च तौ ॥१६॥१७॥ तदाश्रमपदं प्रविष्टो वायुर्ववाविति तृतीयेनान्वयः । पुण्यैर्द्रुमैर्लताभिश्चाञ्चितं पूजितम् । पुण्यद्विजानामृषीणां कुलैराकीर्णम् ।

बृहद्व्रतधरः शान्तो जटिलो वल्कलाम्बरः ॥ बिभ्रत्कमण्डलुं दण्डमुपवीतं समेखलम् ॥ ८ ॥ कृष्णाजिनं साक्षसूत्रं
कुशांश्च नियमर्द्धये[1] ॥ अग्न्यर्कगुरुविप्रात्मस्वर्चयन्संध्ययोर्हरिम् ॥ ९ ॥ सायं प्रातः स गुरवे भैक्ष्यमाहृत्य वाग्यतः ॥
बुभुजे गुर्वनुज्ञातः सकृन्नो चेदुपोषितः ॥ १० ॥ एवं तपःस्वाध्यायपरो वर्षाणामयुतायुतम् ॥ आराधयन्हृषीकेशं
जिग्ये मृत्युं सुदुर्जयम् ॥ ११ ॥ ब्रह्मा भृगुर्भवो दक्षो ब्रह्मपुत्राश्च येऽपरे ॥ नृदेवपितृभूतानि तेनासन्नतिविस्मिताः
॥ १२ ॥ इत्थं बृहद्व्रतधरस्तपःस्वाध्यायसंयमैः ॥ दध्यावधोक्षजं योगी[2] ध्वस्तक्लेशान्तरात्मना ॥ १३ ॥ तस्यैवं युञ्जतश्चित्तं महायोगेन[3] योगिनः ॥ व्यतीयाय महान्कालो मन्वन्तरषडात्मकः[4] ॥ १४ ॥ एतत्पुरन्दरो ज्ञात्वा सप्तमेऽस्मिन्किलान्तरे ॥ तपोविशङ्कितो ब्रह्मन्नारेभे तद्विघातनम् ॥ १५ ॥ गन्धर्वाप्सरसः कामं वसन्तमलयानिलौ ॥ मुनये
प्रेषयामास रजस्तोकमदौ[5] तथा ॥ १६ ॥ ते वै तदाश्रमं जग्मुर्हिमाद्रेः पार्श्व उत्तरे ॥ पुष्पभद्रा नदी यत्र चित्राख्या
च शिला विभो ॥ १७ ॥ तदाश्रमपदं पुण्यं पुण्यद्रुमलताञ्चितम् ॥ पुण्यद्विजकुलाकीर्णं पुण्यामलजलाशयम् ॥ १८ ॥
मत्तभ्रमरसंगीतं मत्तकोकिलकूजितम् ॥ मत्तबर्हिनटाटोपं मत्तद्विजकुलाकुलम् ॥ १९ ॥ वायुः प्रविष्ट आदाय हिम-
निर्झरशीकरान् ॥ सुमनोभिः परिष्वक्तो ववावुत्तम्भयन्स्मरम् ॥ २० ॥ उद्यच्चन्द्रनिशावक्त्रः प्रवालस्तबकालिभिः ॥
गोप[6]द्रुमलताजालैस्तत्रासीत्कुसुमाकरः ॥ २१ ॥ ॥ ॥ ॥

पुण्या अमला जलाशया यस्मिन् ॥ १८ ॥ मत्तभ्रमराणां सङ्गीतं यस्मिन् । मत्तकोकिलानां कूजितं यस्मिन् । मत्ता बर्हिण एव नटास्तेषामाटोपो नृत्यसंभ्रमो यस्मिन् । मत्तानां द्विजानां पक्षिणां कुलैराकुलं व्याप्तम् ॥ १९ ॥ एवंभूतं तदाश्रमपदं प्रविष्टः सन् वायुर्मलयानिलो ववौ प्रससार । उत्तम्भयन्नुद्दीपयन् । तत्र वृक्षेषु प्रवेशान्मान्द्यं हिमनिर्झरकणानामादानाच्छैत्यं पुष्पपरिष्वङ्गात्सौगन्ध्यं चोक्तम् ॥२०॥ किंच, उद्यंश्चन्द्रो यस्मिंस्तन्निशावक्त्रं रजनीमुखं यस्मिन्सः । प्रवालस्तबकानामालयः श्रेणयो येषु तैः । गुप्यन्ति विटपैः संश्लिष्यन्तीति गोपा द्रुमा लताश्च तेषां जालैः समूहैरुपलक्षित आविर्बभूव ॥ २१ ॥ ॥

१ 'नियमैर्युतः' इति पाठः । २ 'योगात्' इति पाठः । ३ 'ज्ञानयोगेन' इति पाठः । ४ षडित्यस्य पूर्वनिपाताभावो विशेषणविशेष्यभावव्यत्यासात् । ५ 'स्तोममदौ' इति पाठः । ६ 'गायन् द्रुमलता' इति पाठः ।

किंच, तदा गीतवादित्रयूथकैर्गायकादिसमुदायिभिर्गन्धर्वैरन्वीयमानः । तथा स्वःस्त्रियोऽप्सरसस्तासां यूथस्य पतिः । आत्तं चापमिषुश्च येन स स्मरश्च तत्रादृश्यत ॥ २२ ॥ दुराधर्षमभिभवितुमशक्यम् ॥ २३ ॥ २४ ॥ शोषणदीपनसंमोहनतापनोन्मादनाख्यानि पञ्च मुखानि यस्य तदस्त्रं संदधे । तदैव मधुर्वसन्तः । रजस्तोकश्च । पुंस्त्वमार्षम् । अन्ये चेन्द्रभृत्यास्तस्य मनो व्यकम्पयन् ॥ २५ ॥ २६ ॥ किंच, वायुर्मलयानिलः पुञ्जिकस्थल्यास्तत्सूक्ष्मं वासो जहार ॥ २७ ॥ सर्वं तेषां कर्म । तत्र तस्मिन् । मोघं व्यर्थम् । अनीशस्य निर्दैवस्य ॥ २८ ॥ मुनेरपकुर्वन्तः प्रतिकूलमाचरन्तः । हे मुने

अन्वीयमानो गन्धर्वैर्गीतवादित्रयूथकैः ॥ अदृश्यतात्तचापेषुः स्वःस्त्रीयूथपतिः स्मरः ॥ २२ ॥ हुत्वाग्निं समुपासीनं
ददृशुः शक्रकिङ्कराः ॥ मीलिताक्षं दुराधर्षं मूर्तिमन्तमिवानलम् ॥ २३ ॥ ननृतुस्तस्य पुरतः स्त्रियोऽथो गायका
जगुः ॥ मृदङ्गवीणापणवैर्वाद्यं चक्रुर्मनोरमम् ॥ २४ ॥ संदधेऽस्त्रं स्वधनुषि कामः पञ्चमुखं तदा ॥ मधुर्मनो[1] रजस्तोक इन्द्रभृत्या व्यकम्पयन् ॥ २५ ॥ क्रीडन्त्याः पुञ्जिकस्थल्याः कन्दुकैः स्तनगौरवात् ॥ भृशमुद्विग्नमध्यायाः
केशविस्रंसितस्रजः ॥ २६ ॥ इतस्ततो भ्रमद्दृष्टेश्चलन्त्या अनुकन्दुकम् ॥ वायुर्जहार तद्वासः सूक्ष्मं त्रुटितमेखलम्
॥ २७ ॥ विससर्ज तदा बाणं[2] मत्वा तं स्वजितं स्मरः ॥ सर्वं तत्राभवन्मोघमनीशस्य यथोद्यमः ॥ २८ ॥ त इत्थमपकुर्वन्तो मुनेस्तत्तेजसा मुने ॥ दह्यमाना निववृतुः प्रबोध्याहिमिवार्भकाः ॥ २९ ॥ इतीन्द्रानुचरैर्ब्रह्मन्धर्षितोऽपि
महामुनिः ॥ यन्नागादहमो भावं न तच्चित्रं महत्सु हि ॥ ३० ॥ दृष्ट्वा निस्तेजसं कामं सगणं भगवान्स्वराट् ॥
श्रुत्वानुभावं ब्रह्मर्षेर्विस्मयं समगात्परम् ॥ ३१ ॥ तस्यैवं युञ्जतश्चित्तं तपःस्वाध्यायसंयमैः ॥ अनुग्रहायाविरासीन्नरनारायणो हरिः ॥ ३२ ॥ तौ शुक्लकृष्णौ नवकञ्जलोचनौ चतुर्भुजौ रौरववल्कलाम्बरौ ॥ पवित्रपाणी उपवीतकं
त्रिवृत्कमण्डलुं दण्डमृजुं च वैणवम् ॥ ३३ ॥ पद्माक्षमालामुत जन्तुमार्जनं[3] वेदं च साक्षात्तप एवं[4] रूपिणौ ॥ तप-
त्तडिद्वर्णपिशङ्गरोचिषा प्रांशू[5] दधानौ विबुधर्षभार्चितौ ॥ ३४ ॥ ॥ ॥

॥ २९ ॥ अहमोऽहंकारस्य । भावं विकारम् ॥ ३० ॥ निस्तेजसं म्लानवदनम् । स्वराडिन्द्रः ॥ ३१ ॥ नरनारायणरूपो हरिः ॥ ३२ ॥ तावनुवर्णयति द्वाभ्याम्—ताविति । रौरवं कृष्णाजिनं वल्कलं चाम्बरं ययोस्तौ । पवित्रे पाण्योर्ययोस्तौ । त्रिवृत्त्रिगुणं नवतन्तुकमिति वा त्रिवृद्बहिः पवमानमित्यादौ नवके प्रयोगात् । उपवीतकादीन्दधानौ ॥ ३३ ॥ वेदं दर्भमुष्टिं । किंच, साक्षात्तप एव तौ । तत्र हेतुः—तपत्तडिद्वर्णं देदीप्यमानविद्युत्संकाशं यत्पिशङ्गं रोचिस्तेन रूपिणौ मूर्तिमन्तौ । तादृक्तेजोयुक्तमूर्तिभ्यां तपोमयत्वेन प्रकाशमानावित्यर्थः । प्रांशू उन्नतौ ॥ ३४ ॥ ॥ ॥

१ 'मधुर्मदः' इति पाठः । २ 'ततो बाणं' इति पाठः । ३ सूक्ष्मकीटपिपीलिकादिमार्जनम् । तच्च नानातन्तुखण्डनिर्मितश्चामरविशेष इति केचित्, अपरे तु वस्त्रखण्डमिति, अन्ये तु जन्तूनां मार्जनं येन तथाविधं वेदं चेति वेदविशेषणतया व्याचख्युः । ४ 'एकरूपिणौ' इति पाठः । ५ प्रांशू प्रगता व्याप्ता अंशवो ययोस्तौ ।

उच्चैर्महतादरेण ॥ ३५ ॥ तयोः संदर्शनेन य आनन्दस्तेन निर्वृता उपशान्ता आत्मेन्द्रियाशया देहेन्द्रियमनांसि यस्य सः । न सेहे नाशक्नोत् ॥ ३६ ॥ आश्लिषन्नालिङ्गन्निव ॥ ३७ ॥ पादयोरवनिज्य पादौ प्रक्षाल्य । अर्हणेनार्घ्येण ॥ ३८ ॥ पादाभ्यां पादावानम्य । गरिष्ठौ पूज्यतमौ तौ प्रति ॥ ३९ ॥ अन्तर्यामिणस्तस्यैव प्राणादिप्रवर्तकत्वादात्मनः स्तुतावस्वातन्त्र्यं पश्यन्नाह—किमिति । तव त्वां किमहं वर्णये कथं स्तौमि । यद्येन त्वयैवोदीरितः प्रेरितोऽसुः प्राणः संस्पन्दते प्रवर्तते तमनु च वागादयः स्पन्दन्ति । अत्र हेतुः—वै अन्वयव्यतिरेकाभ्यां 'श्रोत्रस्य श्रोत्रम्' इत्यादिश्रुतिभिश्चैतत्प्रसिद्धमित्यर्थः । न केवलं प्राकृतानां तनुभृतां किंत्वजशर्वयोश्चातः स्वस्य ममापि तथैव । एवं यद्यपि न कस्यापि स्वातन्त्र्यमथापि दारुयन्त्रवत्त्वत्प्रवर्तितैरपि वागादिभिर्भजतां पुंसां भावबन्धुरात्मबन्धुरसि, नतु पित्रादिवद्देहमात्रबन्धुः । अहो कृपालुता तवेत्यर्थः ॥ ४० ॥ ननु कथमावां प्राणादिप्रवर्तकौ धर्मपुत्रत्वादावयोरिति चेत्त-

ते वै भगवतो रूपे नरनारायणावृषी ॥ दृष्ट्वोत्थायादरेणोच्चैर्ननामाङ्गेन दण्डवत् ॥ ३५ ॥ स तत्संदर्शनानन्द-
निर्वृतात्मेन्द्रियाशयः ॥ हृष्टरोमाऽश्रुपूर्णाक्षो न सेहे तावुदीक्षितुम् ॥ ३६ ॥ उत्थाय प्राञ्जलिः प्रह्व औत्सुक्या-
दाश्लिषन्निव ॥ नमो नम इतीशानौ बभाषे गद्गदाक्षरः ॥ ३७ ॥ तयोरासनमादाय पादयोरवनिज्य च ॥ अर्ह-
णेनानुलेपेन धूपमाल्यैरपूजयत् ॥ ३८ ॥ सुखमासनमासीनौ प्रसादाभिमुखौ मुनी ॥ पुनरानम्य पादाभ्यां
गरिष्ठाविदमब्रवीत् ॥ ३९ ॥ ॥ मार्कण्डेय उवाच ॥ किं वर्णये तव विभो यदुदीरितोऽसुः संस्पन्दते तमनु
वाङ्मनइन्द्रियाणि ॥ स्पन्दन्ति वै तनुभृतामजशर्वयोश्च स्वस्याप्यथापि भजतामसि भावबन्धुः ॥ ४० ॥ मूर्ती
इमे भगवतो भगवंस्त्रिलोक्याः क्षेमाय तापविरमाय च मृत्युजित्यै ॥ नाना बिभर्ष्यवितुमन्यतनूर्यथेदं सृष्ट्वा पुन-
र्ग्रससि सर्वमिवोर्णनाभिः ॥ ४१ ॥ तस्यावितुः स्थिरचरेशितुरङ्घ्रिमूलं यत्स्थं न कर्मगुणकालरजः स्पृशन्ति ॥
यद्वै स्तुवन्ति निनमन्ति यजन्त्यभीक्ष्णं ध्यायन्ति वेदहृदया मुनयस्तदाप्त्यै ॥ ४२ ॥ ॥

त्राह—मूर्ती इति । हे भगवन्, भगवतस्तव इमे मूर्ती त्रिलोक्याः क्षेमाय पालनाय तापविरमाय च दुःखनिवृत्त्यै मृत्युजित्यै मोक्षाय, नतु त्वं कस्यापि पुत्र इत्यर्थः । अत्र दृष्टान्तः—यथेदं विश्वमवितुमन्यास्तनूर्मत्स्यकूर्मादिलक्षणा नाना अनेकप्रकारा बिभर्षि तद्वत् । न केवलं पालनमात्रं तव कर्म किंतु सृष्टिलयावपीत्याह—सृष्ट्वेति । तत्राप्यन्यनिरपेक्षत्वे दृष्टान्तः—ऊर्णनाभिरिवेति ॥ ४१ ॥ यस्मादेवंभूतस्त्वं तस्मात्तवाङ्घ्रिमूलं भजामीत्याह—तस्येति । तस्यावितुः पालकस्य स्थावरजङ्गमानामीश्वरस्याङ्घ्रिमूलं भजामीति तृतीयश्लोकस्थस्यानुषङ्गः । कथंभूतमङ्घ्रिमूलम् । यत्स्थं यत्र स्थितम् । कर्मगुणकालानां रजो मलम् । अन्ये च पूर्वोक्तास्तापादयो न स्पृशन्ति । 'रुजः' इति वा पाठः । यतो वेदो हृदये येषां ते वेदतात्पर्यविदो मुनयो यदेव स्तुवन्ति नितरां नमन्ति तदाप्त्यै तत्प्राप्तये एव स्तवनादि कुर्वन्ति ॥ ४२ ॥ ॥ ॥ ॥

१ भावेन भक्त्या बन्धुः स्निग्धोऽस्ति । २ इदं च बहुवचनोपपत्तये पूरितम् ।

यतोऽन्यः पुरुषार्थो नास्तीत्याह—नान्यमिति । अङ्घ्र्युपनयाच्छ्रीमच्चरणप्राप्तेरन्यं क्षेमं न विद्मः । परितः सर्वेष्वपि लोकेषु भीर्यस्य तस्य जनस्य । तदेवाह—द्विपरार्धं धिष्ण्यं स्थानं यस्य स ब्रह्मापि ते कालस्य त्वद्भ्रूविजृम्भरूपात्कालादलं बिभेति । अतः किमुत वक्तव्यं तेन ब्रह्मणा कृतानां भौतिकानां प्राणिनां भयमिति ॥४३॥ यस्मादेवं तत्तस्मात्तव पादमूलं भजामि । कथंभूतस्य । ऋतधियः सत्यज्ञानस्वरूपस्य । यद्वा, सत्या धीर्यस्य यस्मिन्वा तस्यात्मगुरोर्जीवनियन्तुरतः कारणात्परस्य । किं कृत्वा । आत्मच्छदि स्वात्मावरकमपार्थं च निष्फलमसच्च तुच्छमन्त्यं च नश्वरमिदं देहादि हित्वा देहादिभजनं त्यक्त्वा । असच्चेत्कथं प्रतीयेत तत्राह—अभिज्ञमात्रम् । नह्यत्यन्तमसत्, किंत्वात्ममात्रम् । न ततः पृथगस्तीत्यर्थः । नन्वपवर्गाय भवतु मद्भजनम्, फलान्तरार्थं त्वन्यभजनं कार्यमेव तत्राह—तर्हीति । यदि त्वां भजति पुरुषस्तर्हि ते त्वत्त एव सर्वं मनीषितमर्थं विन्देतेति ॥ ४४ ॥ ननु ब्रह्मरुद्रावपि ममैव मूर्ती, अतो मामेव

नान्यं तवाङ्घ्र्युपनयादपवर्गमूर्तेः क्षेमं जनस्य परितोभिय ईश विद्मः ॥ ब्रह्मा बिभेत्यलमतो द्विपरार्धधिष्ण्यः कालस्य
ते किमुत तत्कृतभौतिकानाम् ॥ ४३ ॥ तद्वै भजाम्यृतधियस्तव पादमूलं हित्वेदमात्मच्छदि चात्मगुरोः परस्य ॥ देहा-
द्यपार्थमसदन्त्यमभिज्ञमात्रं विन्देत ते तर्हि सर्वमनीषितार्थम् ॥ ४४ ॥ सत्त्वं रजस्तम इतीश तवात्मबन्धो मायामयाः
स्थितिलयोदयहेतवोऽस्य ॥ लीला धृता यदपि सत्त्वमयी प्रशान्त्यै नान्ये नृणां व्यसनमोहभियश्च याभ्याम् ॥ ४५ ॥
तस्मात्तवेह भगवन्नथ तावकानां शुक्लां तनुं स्वदयितां कुशला भजन्ति ॥ यत्सात्वताः पुरुषरूपमुशन्ति सत्त्वं लोको
यतोऽभयमुतात्मसुखं न चान्यत् ॥ ४६ ॥ तस्मै नमो भगवते पुरुषाय भूम्ने विश्वाय विश्वगुरवे परदैवताय ॥ नारा-
यणाय ऋषये च नरोत्तमाय हंसाय संयतगिरे निगमेश्वराय ॥ ४७ ॥ यं वै न वेद वितथाक्षपथैर्भ्रमद्धीः सन्तं स्वखे-
ष्वसुषु हृद्यपि दृक्पथेषु ॥ तन्माययावृतमतिः स उ एव साक्षादाद्यस्तवाखिलगुरोरुपसाद्य वेदम् ॥ ४८ ॥ ॥

किमत्यन्तमाद्रियसे तत्राह—सत्त्वमिति । यदपि यद्यपि तवैव मायया कृता एता लीलास्त्वयैव धृतास्तथापि या सत्त्वमयी सैव प्रशान्त्यै मोक्षाय न केवलमस्य प्रशान्त्यभावमात्रमन्यभजने किंत्वनिष्टं च भवेदित्याह—व्यसनेति ॥ ४५ ॥ तदेव सदाचारेण द्रढयति—तस्मादिति । हे भगवन्, तव शुक्लां तनुं श्रीनारायणाख्याम् । अथ तावकानां च शुक्लां तनुं नराख्याम् । यद्यस्मात्सात्वताः सत्त्वमेव पुरुषस्येश्वरस्य रूपमुशन्ति मन्यन्ते, नत्वन्यद्रजस्तमश्चेति । अत्र हेतुः—यतः सत्त्वाल्लोको वैकुण्ठाख्यो लोकत्वे सत्यप्यभयं च भोगे सत्यप्यात्मसुखं च ॥ ४६ ॥ अतस्तं प्रणमति—तस्मै नम इति । हंसाय शुद्धाय । संयतगिरे नियतवाचे । अथ च निगमेश्वराय वेदमार्गप्रवर्तकाय ॥ ४७ ॥ वेदार्थसंप्रदायप्रवर्तने हेतुत्वं वदन् स्तौति—यमिति । वितथाक्षपथैः कपटेन्द्रियमार्गैर्भ्रमद्धीर्विक्षिप्तबुद्धिः पुमान्स्वेन्द्रियादिषु नियन्तृत्वेन सन्तमपि यं त्वां न वेद । दृक्पथेषु विषयेषु । बुद्धिविक्षेपे हेतुः—तन्मायया तस्य तवैव मायया

१ तद्वै इति तैः । अभिज्ञमात्रमित्यस्य टीकायामात्ममात्रमिति । आत्मन्यधिष्ठाने भ्रमादेव प्रतीतिर्यस्य तदित्यर्थः । २ 'परदेवतायै' इति पाठः । ३ 'स्वखेषु हृदयेऽपि च' इति पाठः । ४ 'त्वन्मायया' इति पाठः । ५ 'उपपद्य' इति पाठः । ६ अत्र 'अनिष्टं चाकिंचिदन्यथात्वे भवेदिति, किं त्वनिष्टं च । किं तदनिष्टं भवेत्तत्राह' इति च पाठः ।

आवृता आत्मनिष्ठा मतिर्यस्य स उ सोऽपि आद्य एव पूर्वमविद्वानेवाखिलगुरोस्तव त्वत्प्रवर्तितं वेदमुपसाद्य प्राप्य तं त्वां साक्षाद्वेद ॥ ४८ ॥ वेदेनैव त्वज्ज्ञानमित्युपपादयन्प्रणमति—यस्य तव दर्शनं निगमे भवति । कथंभूतम् । आत्मनस्तव रहो रहस्यं तस्य प्रकाशकम् । अन्यथा दुर्ज्ञेयतामाह—अजपरा ब्रह्ममुख्याः कवयोऽपि सांख्ययोगादिभिर्यतमाना यत्र त्वयि मुह्यन्ति । कुत इत्यत आह—सर्वेषां सांख्यादिवादिनां ये वादास्तेषां विषया भेदादयस्तेषां प्रतिरूपं तत्तदनुसारि शीलं स्वभावो यस्य तम् । कुतः । आत्मना देहादिसंघातेन निगूढो बोधो यस्य तम् । एवंभूतं महापुरुषं त्वां वन्दे ॥ ४९ ॥ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे भावार्थदीपिकायां टीकायामष्टमोऽध्यायः ॥८॥ ॥छ॥ ॥ नवमे भगवन्मायादिदृक्षोर्दर्शनं मुहुः ॥ मायाशिशोर्लयाब्धौ

यद्दर्शनं निगम आत्मरहःप्रकाशं मुह्यन्ति यत्र कवयोऽजपरा यतन्तः ॥ तं सर्ववादविषयप्रतिरूपशीलं वन्दे[2] महा-
पुरुषमात्मनिगूढबोधम् ॥ ४९ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धेऽष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥ ॥
॥ सूत उवाच ॥ संस्तुतो भगवानित्थं मार्कण्डेयेन धीमता ॥ नारायणो नरसखः प्रीत आह भृगूद्वहम् ॥ १ ॥ ॥ श्रीभग-
वानुवाच ॥ भो भो ब्रह्मर्षिवर्योसि[3] सिद्ध आत्मसमाधिना ॥ मयि भक्त्यानपायिन्या तपःस्वाध्यायसंयमैः ॥ २ ॥ वयं
ते परितुष्टाः स्म त्वद्बृहद्व्रतचर्यया ॥ वरं प्रतीच्छ भद्रं ते वरदेशादभीप्सितम् ॥ ३ ॥ ॥ ऋषिरुवाच ॥ जितं ते देवदे-
वेश प्रपन्नार्तिहराच्युत ॥ वरेणैतावतालं नो यद्भवान्समदृश्यत ॥ ४ ॥ गृहीत्वाजादयो यस्य श्रीमत्पादाब्जदर्शनम् ॥
मनसा योगपक्वेन स भवान्मेऽक्षगोचरः ॥ ५ ॥ अथाप्यम्बुजपत्राक्ष पुण्यश्लोकशिखामणे ॥ द्रक्ष्ये मायां यया लोकः
सपालो वेद सद्भिदाम् ॥ ६ ॥ ॥ सूत उवाच ॥ इतीडितोऽर्चितः काममृषिणा भगवान्मुने ॥ तथेति स स्मयन्प्रागाद्बद-
र्याश्रममीश्वरः ॥ ७ ॥ तमेव चिन्तयन्नर्थमृषिः स्वाश्रम एव सः ॥ वसन्नग्न्यर्कसोमाम्बुभूवायुवियदात्मसु ॥ ८ ॥

च मुनेर्निर्वेशनिर्गमैः ॥ १ ॥ भगवतः परितोषपूर्वकं तदपेक्षितवरदानं कथयितुमाह—संस्तुत इत्यादिना ॥ १ ॥ आत्मसमाधिना चित्तैकाग्र्येण ॥ २ ॥ वयं ते परितुष्टाः स्मेति बहुवचनं सर्वदेवाभिप्रायेण । वरदेशादित्येकवचनं द्वयोरैक्याभिप्रायेण । प्रतीच्छ गृहाण ॥ ३ ॥ वरेण च्छन्दयता त्वया जितमुत्कर्षो दर्शितः । मम तु वराकाङ्क्षा नास्तीत्याह—वरेणेति ॥ ४ ॥ यस्य तव श्रीमत्पादाब्जदर्शनं मनसापि गृहीत्वा प्राप्य[5] कृतार्था अजादयो भवन्ति स भवान्मेऽक्षगोचरो जातोऽस्ति किमतः परं वरेणेत्यर्थः ॥ ५ ॥ द्रक्ष्ये द्रष्टुमिच्छामि । लोकपालैर्ब्रह्मादिभिः सहितोऽयं लोको जनो यया सद्भिदां सति वस्तुनि भेदम् ॥ ६ ॥ तथेति द्रक्ष्यसीति । स ईश्वरः स्मयन्प्रागात् । पाँठान्तरे क्रियाविशेषणम् ॥ ७ ॥ तमेवार्थं मायादर्शनरूपम् । अग्र्यादिमूर्तिषु ॥ ८ ॥ ॥

१ आद्यो वेदप्राप्तेः पूर्वावस्थापन्नोऽर्थादविद्वानेवेत्यर्थः । 'आद्यः' इत्यत्र 'आज्ञः' इति मूले टीकायां च पाठः । तत्रातिशयेनाज्ञः आज्ञ इत्यर्थः । स्वार्थिकोऽण् वा बोध्यः । २ 'वन्दामहे' इति पाठः । ३ 'वर्योऽसि' इति पाठः । ४ तपःस्वाध्यायसंयमैर्ये आत्मसमाधिश्चित्तैकाग्र्यं तेन या अनपायिनी भक्तिस्तया विरुद्धोऽसीत्यन्वयः । ५ अजादयोऽपि कृतार्था भवन्तीति शेषः । ६ 'प्राप्य प्राकृता अप्यजादयः' इति पाठः । ७ 'सस्मयम्' इत्येवंरूपे इति भावः ।

भावद्रव्यैर्मनोमयैर्द्रव्यैः । क्वचित्कदाचित्प्रेमप्रसरसंप्लुतः प्रेमोद्रेकं प्राप्तः ॥ ९ ॥ मायादर्शनमाह—तस्येत्यादिना ॥ १० ॥ तं वायुमनु बलाहका मेघा अभवन्नाविर्बभूवुः । ते च तडिद्भिः सहिता उच्चैः स्वनन्तो गर्जन्तः । अक्षो रथाङ्गं तद्वत्स्थविष्ठा अभितो वर्षधारा मुमुचुः ॥ ११ ॥ चतुर्दिक्षु वर्तमानाः समुद्राः समीरवेगेनोर्मयस्तैर्भूतलं ग्रसन्तः । उग्रा नक्रा येषु, महाभया आवर्ता येषु, गभीरो घोषो येषु, ते च ते च ते च ॥ १२ ॥ आत्मना सह जरायुजादिचतुर्विधं जगदन्तर्बहिश्चोपतापितं वीक्ष्य । क्ष्मां जलाप्लुतां वीक्ष्य । मुनिः समत्रसद्भयं प्राप । केनोपतापितम् । अद्भिः । कथंभूताभिः । अतिद्युभिरतिक्रान्ता

ध्यायन्सर्वत्र च हरिं भावद्रव्यैरपूजयत् ॥ क्वचित्पूजां विसस्मार प्रेमप्रसरसंप्लुतः ॥ ९ ॥ तस्यैकदा भृगुश्रेष्ठ पुष्प-
भद्रातटे मुनेः ॥ उपासीनस्य सन्ध्यायां ब्रह्मन्वायुरभून्महान् ॥ १० ॥ तं चण्डशब्दं समुदीरयन्तं बलाहका अन्वभव-
न्करालाः ॥ अक्षस्थविष्ठा मुमुचुस्तडिद्भिः स्वनन्त उच्चैरभिवर्षधाराः ॥ ११ ॥ ततो व्यदृश्यन्त चतुःसमुद्राः समन्ततः
क्ष्मातलमाग्रसन्तः ॥ समीरवेगोर्मिभिरुग्रनक्रमहाभयावर्तगभीरघोषाः ॥ १२ ॥ अन्तर्बहिश्चाद्भिरतिद्युभिः खरैः शत-
ह्रदाभीरुपतापितं जगत् ॥ चतुर्विधं वीक्ष्य सहात्मना मुनिर्जलाप्लुतां क्ष्मां विमनाः समत्रसत् ॥ १३ ॥ तस्यैवमुद्वी-
क्षत ऊर्मिभीषणः प्रभञ्जनाघूर्णितवार्महार्णवः ॥ आपूर्यमाणो वरषद्भिरम्बुदैः क्ष्मामप्यधाद्द्वीपवर्षाद्रिभिः समम् ॥ १४ ॥
सक्ष्मान्तरिक्षं सदिवं सभागणं त्रैलोक्यमासीत्सह दिग्भिराप्लुतम् ॥ स एक एवोर्वरितो महामुनिर्बभ्राम विक्षिप्य
जटा जडान्धवत् ॥ १५ ॥ क्षुत्तृट्परीतो मकरैस्तिमिङ्गिलैरुपद्रुतो[5] वीचिनभस्वताहतः[1] ॥ तमस्यपारे पतितो भ्रमन्दिशो
न वेद खं गां[2] च परिश्रमेषितः ॥ १६ ॥ क्वचिद्गतो[3] महावर्ते तरलैस्ताडितः[4] क्वचित् ॥ यादोभिर्भक्ष्यते क्वापि स्वयम-
न्योन्यघातिभिः ॥ १७ ॥ क्वचिच्छोकं क्वचिन्मोहं क्वचिद्दुःखं सुखं भयम् ॥ क्वचिन्मृत्युमवाप्नोति व्याध्यादिभिरुतार्दितः
॥ १८ ॥ अयुतायुतवर्षाणां सहस्राणि शतानि च ॥ व्यतीयुर्भ्रमतस्तस्मिन्विष्णुमायावृतात्मनः ॥ १९ ॥ स कदा-
चिद्भ्रमंस्तस्मिन्पृथिव्याः ककुदि द्विजः ॥ न्यग्रोधपोतं ददृशे फलपल्लवशोभितम् ॥ २० ॥ ॥

द्यौर्याभिः । खरैश्च सूर्यरश्मिभिर्वायुभिर्वेति शेषः । शतह्रदाभिश्च विद्युद्भिः । दीर्घत्वमार्षं छन्दोनुसारेण ॥ १३ ॥ प्रभञ्जनेनाघूर्णितं प्रकम्पितं वाः उदकं यस्मिन् सः । अप्यधाच्छादयामास । समं सह ॥ १४ ॥ सक्ष्मान्तरिक्षं भूम्यन्तरिक्षस्थप्राणिसहितम् । सदिवं स्वर्गस्थदेवसहितम् । भागणा ज्योतिर्गणास्तैः सहितम् । जटा विक्षिप्य विकीर्य ॥ १५ ॥ परिश्रमेण इषितो गतः प्राप्त इत्यर्थः । इषु सर्पणे इत्यस्मात् ॥ १६ ॥ अन्योन्यघातिभिस्तद्भक्षणाय परस्परं युध्यद्भिः ॥ १७ ॥ १८ ॥ विष्णुमायावृतात्मन इति स तथा दृष्टवानित्यर्थः ॥ १९ ॥ ककुद्युन्नतप्रदेशे न्यग्रोधपोतं कोमलवटम् ॥ २० ॥ ॥

१ वीचियुक्तेन नभस्वता आहतः प्राप्ताघातः परिश्रमेण इषितो व्याप्तः, 'इष गतौ' इत्यस्मात् । २ 'गां द्यां च' इति पाठः । ३ 'मग्नः' इति पाठः । ४ 'तरङ्गैः' इति पाठः । ५ 'उपद्रुतः' इत्यपि पाठः ।

तस्येशानदिक्शाखायां शिशुमपि ॥ २१ ॥ श्रीमद्रम्यं वदनपङ्कजं यस्य तम् । कम्बुवत्त्रिरेखावृता ग्रीवा यस्य तम् । महोरस्कं विशालवक्षसम् । सुनासं शोभना नासा यस्य तम् । सुन्दरे भ्रुवौ यस्य तम् ॥ २२ ॥ श्वासैरेजन्तः कम्पमाना अलकास्तैराभातं शोभितम् । कम्बुवदन्तर्वलयेन श्रीर्ययोस्तौ कम्बुश्रियौ तयोः कर्णयोर्दाडिमपुष्पे यस्य तम् । विद्रुमतुल्याधरभासा ईषच्छोणायितं सुधातुल्यं स्मितं यस्य तम् ॥ २३ ॥ पद्मगर्भवत् आ ईषदरुणावपाङ्गौ नेत्रप्रान्तौ यस्य तत् । हृद्यो हासो यस्मिंस्तदवलोकनं यस्य तम् । श्वासैरेजन्त्यश्चलन्त्यो वलयस्तिर्यङ्निम्नरेखास्ताभिः संविग्ना चञ्चला निम्ना गम्भीरा नाभिर्यस्मिंस्त-दलवदश्वत्थपत्रसंकाशमुदरं यस्य तम् ॥ २४ ॥ चारवोऽङ्गुलयो ययोस्ताभ्यामुन्नीयाकृष्य धयन्तं पिबन्तम् ॥ २५ ॥ हृत्पद्मं च विलोचनाम्बुजे च प्रोत्फु-

प्रागुत्तरस्यां शाखायां तस्यापि ददृशे शिशुम् ॥ शयानं पर्णपुटके ग्रसन्तं प्रभया तमः ॥ २१ ॥ महामरकत-
श्यामं श्रीमद्वदनपङ्कजम् ॥ कम्बुग्रीवं महोरस्कं सुनासं सुन्दरभ्रुवम् ॥ २२ ॥ श्वासैजदलकाभातं कम्बुश्रीकर्ण-
दाडिमम् ॥ विद्रुमाधरभासेषच्छोणायितसुधास्मितम् ॥ २३ ॥ पद्मगर्भारुणापाङ्गं हृद्यहासावलोकनम् ॥ श्वासै-
जद्वलिसंविग्ननिम्ननाभिदलोदरम् ॥ २४ ॥ चार्वङ्गुलिभ्यां पाणिभ्यामुन्नीय चरणाम्बुजम् ॥ मुखे निधाय
विप्रेन्द्रो धयन्तं वीक्ष्य विस्मितः ॥ २५ ॥ तद्दर्शनाद्वीतपरिश्रमो मुदा प्रोत्फुल्लहृत्पद्मविलोचनाम्बुजः ॥ प्रहृष्ट-
रोमाद्भुतभावशङ्कितः प्रष्टुं पुरस्तं प्रससार बालकम् ॥ २६ ॥ तावच्छिशोर्वै श्वसितेन भार्गवः सोऽन्तःशरीरं
मशको यथाविशत् ॥ तत्राप्यदो न्यस्तमचष्ट कृत्स्नशो यथा पुराऽमुह्यदतीव विस्मितः ॥ २७ ॥ खं रोदसी
भगणानद्रिसागरान् द्वीपान् सवर्षान् ककुभः सुरासुरान् ॥ वनानि देशान्सरितः पुराकरान् खेटान्व्रजानाश्रम-
वर्णवृत्तयः ॥ २८ ॥ महान्ति भूतान्यथ भौतिकान्यसौ कालं च नानायुगकल्पकल्पनम् ॥ यत्किंचिदन्यद्व्यवहार-
कारणं ददर्श विश्वं सदिवावभासितम्[२] ॥ २९ ॥ हिमालयं पुष्पवहां च तां नदीं निजाश्रमं तत्र ऋषीन-
पश्यत् ॥ विश्वं विपश्यन् श्वसिताच्छिशोर्वै बहिर्निरस्तो न्यपतल्लयाब्धौ ॥ ३० ॥　　॥　　॥

ल्लानि तानि यस्य सः । अद्भुतभावोऽत्याश्चर्यरूपं तेन शङ्कितः सन्नपि तं प्रष्टुं पुरः प्रससार समीपं गतः ॥ २६ ॥ अदः इदं जगद्यथा पुरा प्रलयात्पूर्वं न्यस्तं विन्यस्तं दृष्ट्वा चातीव विस्मितः सन्नमुह्यत ॥ २७ ॥ कृत्स्नशो दर्शनं प्रपञ्चयति—खमित्यादिना । ककुभो दिशः । पुराण्याकरांश्च । खेटान् कर्षकग्रा-मान् । व्रजान् गोकुलानि । आश्रमांश्च वर्णांश्च तेषां वृत्तीश्चेत्यर्थः ॥ २८ ॥ नानायुगानि कल्पांश्च कल्पयति तैर्वा कल्प्यत इति तथा तं कालं च । सदिव परमार्थं इवावभासितं तेनैव ॥ २९ ॥ ३० ॥　　॥　　॥　　॥　　॥

१ मच्चरणाम्बुजे कीदृशं मधु वर्तते, यत एतदास्वादनार्थं बहवो भक्ताः प्रयतन्ते तस्मादिदमहमप्यास्वाद्य परिचेष्य इतीव धयन्तमिति चक्र० । २ स मार्कण्डेयः दिवा दिवस एव अवभासितं प्रकाशरूपं ददर्श इति 'स दिवावभासितम्' इति पदविश्लिष्टपाठेऽर्थान्तरम् ।

वटं च तोकं च वीक्ष्य तस्य प्रेम्णा सुधातुल्यस्मितयुक्तेनापाङ्गनिरीक्षणेन निरीक्षितः सन् । अथ तं बालकमधोक्षजं परिष्वक्तुमभ्ययादिति द्वयोरन्वयः । कथंभूतम् । नेत्राभ्यां हृदि धिष्ठितमधिष्ठितम् ॥ ३१ ॥ ३२ ॥ तावत्परिष्वङ्गलाभात्पूर्वमेव ऋषेस्तस्यान्तर्हितो बभूव । तदुद्यमवैफल्ये दृष्टान्तः—अनीशो निर्दैवस्तेन निर्मिता ईहा क्रीडा यथेति ॥ ३३ ॥ अन्तर्हितं भगवन्तमनु वटः सलिलं लोकसंप्लवश्च तिरोधाय्यन्तर्हितः । स च स्वाश्रम एव यथापूर्वं स्थित इति ॥ ३४ ॥　॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे भावार्थदीपिकायां टीकायां नवमोऽध्यायः ॥ ९ ॥　॥ छ ॥　॥ दशमे शिव आगत्य मुनेस्तुष्टो वरानदात् ॥ तेन साकमतिप्रीत्या समाभाष्य सभाजयन् ॥ १ ॥ १ ॥ ज्ञानकाशया ज्ञानवत्प्रकाशमानया । त्वद्भजनं विना विद्वांसोऽपि

तस्मिन्पृथिव्याः ककुदि प्ररूढं वटं च तत्पर्णपुटे शयानम् ॥ तोकं च तत्प्रेमसुधास्मितेन निरीक्षितोऽपाङ्गनिरी-
क्षणेन ॥ ३१ ॥ अथ तं बालकं वीक्ष्य नेत्राभ्यां धिष्ठितं हृदि ॥ अभ्ययादतिसंक्लिष्टः परिष्वक्तुमधोक्षजम् ॥ ३२ ॥
तावत्स भगवान्साक्षाद्योगाधीशो गुहाशयः ॥ अन्तर्दध ऋषेः सद्यो यथेहानीशनिर्मिता[१] ॥ ३३ ॥ तमन्वथ वटो ब्रह्मन्
सलिलं लोकसंप्लवः ॥ तिरोधायि क्षणादस्य स्वाश्रमे पूर्ववत्स्थितः ॥ ३४ ॥　॥ इति श्रीमद्भागवते महापुराणे
द्वादशस्कन्धे मायादर्शनं नाम नवमोऽध्यायः ॥ ९ ॥　॥ छ ॥　॥ सूत उवाच ॥ स एवमनुभूयेदं नारायणविनिर्मितम् ॥
वैभवं योगमायायास्तमेव शरणं ययौ ॥ १ ॥　॥ मार्कण्डेय उवाच ॥ प्रपन्नोऽस्म्यङ्घ्रिमूलं ते प्रपन्नाभयदं हरे ॥
यन्माययापि विबुधा मुह्यन्ति ज्ञानकाशया ॥ २ ॥　॥ सूत उवाच ॥ तमेवं निभृतात्मानं वृषेण दिवि पर्यटन् ॥ रुद्राण्या
भगवान् रुद्रो ददर्श स्वगणैर्वृतः ॥ ३ ॥ अथोमा तमृषिं वीक्ष्य गिरिशं समभाषत ॥ पश्येमं भगवन्विप्रं निभृतात्मे-
न्द्रियाशयम् ॥ ४ ॥ निभृतोदझषव्रातं[२] वातापाये यथार्णवम् ॥ कुर्वस्य तपसः साक्षात्संसिद्धिं सिद्धिदो भवान् ॥ ५ ॥
॥ श्रीभगवानुवाच ॥ नैवेच्छत्याशिषः क्वापि ब्रह्मर्षिर्मोक्षमप्युत ॥ भक्तिं परां भगवति लब्धवान्पुरुषेऽव्यये ॥ ६ ॥
अथापि संवदिष्यामो भवान्येतेन साधुना ॥ अयं हि परमो लाभो नृणां साधुसमागमः ॥ ७ ॥　॥　॥

यस्य तव मायया ज्ञानिनो वयमित्यहंकारेण विमुह्यन्तीत्यर्थः ॥ २ ॥ श्रीनारायण एव स्वमायादर्शनश्रान्तं शिवरूपेण सान्त्वयामास, तदाह—तमेवमि-त्यादिना । निभृतात्मानं समाहितचित्तम् । रुद्राण्या भवान्या ॥ ३ ॥ निभृता निश्चला आत्मेन्द्रियाशया देहेन्द्रियमनांसि यस्य तम् ॥ ४ ॥ निभृतं निश्चल-मुदकं झषव्रातश्च यस्मिंस्तम् । संसिद्धिं फलं साक्षात्कुरु प्रकटीकुरु । यतो भवान्सिद्धिदः ॥ ५ ॥ आशिषोऽभ्युदयलक्षणाः । उत निश्चितम् । अत्र हेतुः—भक्तिमिति ॥ ६ ॥ संवदिष्यामः संवादं करिष्यामः ॥ ७ ॥　　॥　　॥　　॥　　॥

१ असमर्थनिर्मिता ईहा वाञ्छा यथा सद्योऽन्तर्धत्ते तद्वत् । २ 'निभृतोदझपव्रातः' इति पाठः, स चोपमानोपमेययोर्विरुद्धविभक्तिकत्वादयुक्तः ।

सतां गतित्वे हेतुः—ईशान इति ॥ ८ ॥ रुद्धा धियोऽन्तःकरणस्य वृत्तयो येन सः ॥ ९ ॥ १० ॥ न केवलं बहिरेवात्मन्यपि प्राप्तं शिवं विचक्ष्य विस्मितः। कथं प्राप्तम् । सहसाकस्मादेव हृदि भातम् । कथंभूतम् । तडिद्वत्पिशङ्गा जटा धारयतीति तथा तम् । त्रीण्यक्षीणि यस्य तम् । शूलादिभिः सहाक्षमालादीन्बिभ्राणमित्यन्वयः । अक्षमालादीनां द्वन्द्वैक्यम् ॥ ११ ॥ १२ ॥ विस्मयपूर्वकं बहिर्दर्शनमाह—किमिदमिति ॥ १३ ॥ सोमया उमया सहागतं रुद्रं ददृशे । ततो ननाम ॥ १४ ॥ १५ ॥ पूर्णकामत्वं व्यनक्ति—येन त्वया जगन्निर्वृतं भवतीति ॥ १६ ॥ निर्गुणत्वेन त्रिगुणत्वेन च नमस्करोति—नमः

॥ सूत उवाच ॥ इत्युक्त्वा तमुपेयाय भगवान्स सतां गतिः ॥ ईशानः सर्वविद्यानामीश्वरः सर्वदेहिनाम् ॥ ८ ॥ तयोरा-
गमनं साक्षादीशयोर्जगदात्मनोः ॥ न वेद रुद्धधीवृत्तिरात्मानं विश्वमेव च ॥ ९ ॥ भगवांस्तदभिज्ञाय गिरिशो योग-
मायया ॥ आविशत्तद्गुहाकाशं वायुश्छिद्रमिवेश्वरः ॥ १० ॥ आत्मन्यपि शिवं प्राप्तं तडित्पिङ्गजटाधरम् ॥ त्र्यक्षं दशभुजं
प्रांशुमुद्यन्तमिव भास्करम् ॥ ११ ॥ व्याघ्रचर्माम्बरधरं शूलखट्वाङ्गचर्मभिः ॥ अक्षमालाडमरुककपालासिधनुःसह
॥ १२ ॥ बिभ्राणं सहसा भातं विचक्ष्य हृदि विस्मितः ॥ किमिदं कुत एवेति समाधेर्विरतो मुनिः ॥ १३ ॥ नेत्रे उन्मील्य
ददृशे सगणं सोमयागतम् ॥ रुद्रं त्रिलोकैकगुरुं ननाम शिरसा मुनिः ॥ १४ ॥ तस्मै सपर्यां व्यदधात्सगणाय
सहोमया ॥ स्वागतासनपाद्यार्घगन्धस्रग्धूपदीपकैः ॥ १५ ॥ आह चात्मानुभावेन पूर्णकामस्य ते विभो ॥ करवाम
किमीशान येनेदं निर्वृतं जगत् ॥ १६ ॥ नमः शिवाय शान्ताय सत्त्वाय प्रमृडाय च ॥ रजोजुषेऽप्यघोराय नमस्तुभ्यं
तमोजुषे ॥ १७ ॥ ॥ सूत उवाच ॥ एवं स्तुतः स भगवानादिदेवः सतां गतिः ॥ परितुष्टः प्रसन्नात्मा प्रहसंस्तम-
भाषत ॥ १८ ॥ ॥ श्रीभगवानुवाच ॥ वरं वृणीष्व नः कामं वरदेशा वयं त्रयः ॥ अमोघं दर्शनं येषां मर्त्यो यद्विन्दते-
ऽमृतम् ॥ १९ ॥ ब्राह्मणाः साधवः शान्ता निःसङ्गा भूतवत्सलाः ॥ एकान्तभक्ता अस्मासु निर्वैराः समदर्शिनः
॥ २० ॥ सलोका लोकपालास्तान्वन्दन्त्यर्चन्त्युपासते ॥ अहं च भगवान्ब्रह्मा स्वयं च हरिरीश्वरः ॥ २१ ॥ ॥

शिवाय निर्गुणाय । सत्त्वाय सत्त्वाधिष्ठात्रे । अत एव प्रमृडयति सुखयतीति तथा तस्मै ॥ १७ ॥ १८ ॥ नोऽस्मत्तः त्रयो ब्रह्मविष्णुमहेश्वराः । यद्येभ्यः । ते वयम् ॥ १९ ॥ वरदानादिना भवत्सेवैवास्माभिः क्रियते, नत्वनुग्रहो जगद्वन्द्यत्वाद्भवतामिति ब्राह्मणान्स्तौति—ब्राह्मणा इत्यादि । ये साधवः सदाचाराः। शान्ता मत्सरादिरहिताः । निःसङ्गा निष्कामाः ॥ २० ॥ न केवलं त एव, किंत्वहं चेत्यादि ॥ २१ ॥ ॥ ॥

१ सः उमयेति छेदः । स मुनिः । सोऽचि लोपे चेदिति सलोपः । २ क्वचित् 'सात्वतां गतिः' इति मूले, 'सात्वतां सतां गतित्वे हेतुः' इति टीकायां च पाठः । क्वचिच्च 'सात्वतां पतिः' इत्यपि पाठः । ३ इह 'व्याघ्रचर्माम्बरं शूलधनुरिष्वसिचर्मभिः ॥ अक्षमालाडमरुककपालपरशुं सह' इति पाठः । तत्राक्षमालादीनां द्वन्द्वैक्ये पुंस्त्वानुपपत्तिः । आर्षं वा पुंस्त्वं कल्पनीयम् । ४ 'रजोजुषेऽतिघोराय' इति, 'अथाघोराय' इति च पाठौ । ५ सत्त्वाय ज्ञानवर्धकगुणशालिने ।

पूज्यतमत्वे हेत्वन्तरमाह—नेति । अण्वप्यणुमात्रमपि । न चक्षते न पश्यन्ति । तत्तस्मादेवंभूतान्युष्मान् ईमहि भजेम ॥ २२ ॥ २३ ॥ ब्राह्मणेभ्यो ब्राह्मणान् । आत्मसमाधानं चित्तैकाग्र्यम् । तप आलोचनम् । स्वाध्यायोऽध्ययनम् । संयमो वागादिनियमस्तैः ॥ २४ ॥ किंच, श्रवणादित्यादि ॥ २५ ॥ चन्द्रो ललामो भूषणं यस्य तस्य धर्मरहस्ययुक्तममृतास्पदं वचः कर्णाभ्यां पिबन्नातृप्यदलमिति नामन्यत । कर्णयोरमृतायनमिति वान्वयः ॥ २६ ॥ शिवस्य वागेवामृतं तेन ध्वस्तः क्लेशपुञ्जो यस्य सः ॥ २७ ॥ इयं लीला दुर्विभाव्याऽवितर्क्या । यद्यथा ईशितव्यानि स्वनियम्यानि यानि भूतानि तानि जगदीश्वराः । स्वयं नमन्ति स्तुवन्ति चेति ॥ २८ ॥ अथवा लोकसंग्रहमात्रमेतदित्याह—धर्ममिति । प्रवक्तारोऽपि यत्स्वयं देहिनां धर्मं ग्राहयितुमाचरन्ति ॥ २९ ॥ नन्वेतत्स्वप्रभाव-

न ते मय्यच्युतेऽजे च भिदामण्वपि चक्षते ॥ नात्मनश्च जनस्यापि तद्युष्मान्वयमीमहि ॥ २२ ॥ नह्यम्मयानि तीर्थानि
न देवाश्चेतनोज्झिताः ॥ ते पुनन्त्युरुकालेन यूयं दर्शनमात्रतः ॥ २३ ॥ ब्राह्मणेभ्यो नमस्यामो येऽस्मद्रूपं त्रयीमयम् ॥
बिभ्रत्यात्मसमाधानतपःस्वाध्यायसंयमैः ॥ २४ ॥ श्रवणाद्दर्शनाद्वापि महापातकिनोऽपि वः ॥ शुध्येरन्नन्त्यजाश्चापि
किमु संभाषणादिभिः ॥ २५ ॥ ॥ सूत उवाच ॥ इति चन्द्रललामस्य धर्मगुह्योपबृंहितम् ॥ वचोऽमृतायनमृषिर्नातृप्यत्क-
र्णयोः पिबन् ॥ २६ ॥ स चिरं मायया विष्णोर्भ्रामितः कर्शितो भृशम् ॥ शिववागमृतध्वस्तक्लेशपुञ्जस्तमब्रवीत् ॥ २७ ॥
॥ ऋषिरुवाच ॥ अहो ईश्वरलीलेयं दुर्विभाव्या शरीरिणाम् ॥ यन्नमन्तीशितव्यानि स्तुवन्ति जगदीश्वराः ॥ २८ ॥
धर्मं ग्राहयितुं प्रायः प्रवक्तारश्च देहिनाम् ॥ आचरन्त्यनुमोदन्ते क्रियमाणं स्तुवन्ति च ॥ २९ ॥ नैतावता भगवतः
स्वमायामयवृत्तिभिः ॥ न दुष्येतानुभावस्तैर्मायिनः कुहकं यथा ॥ ३० ॥ सृष्ट्वेदं मनसा विश्वमात्मनानुप्रविश्य यः ॥ गुणैः
कुर्वद्भिराभाति कर्तेव स्वप्नदृग्यथा ॥ ३१ ॥ तस्मै नमो भगवते त्रिगुणाय गुणात्मने ॥ केवलायाद्वितीयाय गुरवे ब्रह्म-
मूर्तये ॥ ३२ ॥ कं वृणे नु परं भूमन्वरं त्वद्वरदर्शनात् ॥ यद्दर्शनात्पूर्णकामः सत्यकामः पुमान्भवेत् ॥ ३३ ॥ ॥

तिरस्कारकं कथं मया क्रियते तत्राह—नैतावतेति । एतावता लोकसंग्रहमात्रेण । तैर्नमनादिभिः कथंभूतैः । स्वमायामयी वृत्तिर्येषु तैर्भगवतो मायिनस्तवानुभावो न दुष्येत । यतः प्रसिद्धस्य मायिनः कुहकं कपटं यथा तथा एतानि नमनादीनि । अतस्तस्य यथा कुहकैरात्मानुभावो न दुष्यति तद्वत् । प्रदुष्येतानुभाव इति पाठे नकारस्य दृष्टान्तेऽप्यनुषङ्गः ॥ ३० ॥ मायाचेष्टितं प्रपञ्चयति—सृष्ट्वेति । स्वप्नदृग्यथेत्यविद्या चेष्टिते दृष्टान्तः ॥ ३१ ॥ त्रिगुणत्वेऽपि न जीववत्तदभिभूताय किंतु गुणानामात्मने नियन्त्रे ॥ ३२ ॥ 'वरं वृणीष्व' इति यदुक्तं तत्राह—कमिति । वरं दर्शनं यस्य तस्मात् त्वत्तः परं कं नु वरं वृणे । यस्य तव दर्शनादवलोकनात्पूर्णकामः सर्वानन्दसंदोहरूपः सत्यकामो यथेच्छं प्राप्तसर्वानन्दः ॥ ३३ ॥ ॥ ॥ ॥

१ इत्थमेव चतुर्थेऽपि—'अथ भागवता यूयं प्रियाः स्थ भगवान् यथा । न मद्भागवतानां च प्रेयानन्योऽस्ति कर्हिचित् ॥' इति । २ 'ईश्वरचर्येयं' इति पाठः । ३ स्वेषु भक्तेषु या माया कृपा तन्मयवृत्तिभिरिति क्रम० । ४ अविद्यया स्वप्नं सृजतो जीवस्यापि वस्तुतस्तत्संबन्धो नास्ति, किमुतेश्वरस्येति तात्पर्यम् ।

॥ ३४ ॥ वरदानाय स्वयमेव प्रवृत्तः शर्वयोमया चाभिनन्दितोऽनुमोदितः सन्नाह ॥ ३५ ॥ कामोऽयं सर्वोऽप्यन्यच्च यत्पुण्यं यश इत्यादिर्ब्रह्मवर्चस्विनस्ते भूयादित्युत्तरेणान्वयः । यतस्त्वमधोक्षजे भक्तिमान् ॥३६॥३७॥ तस्य कर्म तपआदि। अमुना पुरानुभूतं यद्भगवन्मायावैभवं तच्च कथयन् ॥३८॥ अवाप्तो महायोगमहिमा येन सः ॥ ३९ ॥ एतन्मार्कण्डेयस्य चरितं तेनानुभूतं च भगवन्मायावैभवं तेऽनुवर्णितम् ॥ ४० ॥ नन्वेवमप्यस्मत्कुलोत्पन्नस्यास्य सप्तकल्पायुर्ष्वं वृद्धैरुच्यमानं विरुद्धमेव तत्राह—एतन्मार्कण्डेयेनानुभूतं भगवन्मायावैभवं नानाकल्परूपं कादाचित्कमीश्वरेच्छया तस्यैवाकस्मिकं, नतु सर्वसाधारणम् । एतत्केचिदनादिबहुकालमावर्तितं दैवयुगसहस्रद्वयमानेन पुनःपुनः परिवर्तितं प्रचक्षते । के ते । नृणां संसृतिं सर्गप्रलयादिलक्षणामात्मनो भगवतो मायेत्येव-

वरमेकं वृणेऽथापि पूर्णात्[1]कामाभिवर्षणात् ॥ भगवत्यच्युतां भक्तिं तत्परेषु तथा त्वयि ॥ ३४ ॥ ॥ सूत उवाच ॥
इत्यर्चितोऽभिष्टुतश्च[2] मुनिना सूक्तया गिरा ॥ तमाह भगवान् शर्वः शर्वया चाभिनन्दितः ॥ ३५ ॥ [3]कामो महर्षे
सर्वोऽयं भक्तिमांस्त्वमधोक्षजे ॥ आकल्पान्ताद्यशः पुण्यमजरामरता तथा ॥ ३६ ॥ ज्ञानं त्रैकालिकं ब्रह्मन्विज्ञानं
च विरक्तिमत् ॥ ब्रह्मवर्चस्विनो भूयात्पुराणाचार्यतास्तु ते ॥ ३७ ॥ ॥ सूत उवाच ॥ एवं वरान्स मुनये दत्त्वा-
गात्र्यक्ष ईश्वरः ॥ देव्यै तत्कर्म कथयन्ननुभूतं पुरा[4]ऽमुना ॥ ३८ ॥ सोऽप्यवाप्तमहायोगमहिमा भार्गवोत्तमः ॥
विचरत्यधुनाप्यद्धा हरावेकान्ततां गतः ॥३९॥ अनुवर्णितमेतत्ते मार्कण्डेयस्य धीमतः ॥ अनुभूतं भगवतो माया-
वैभवमद्भुतम् ॥४०॥ एतत्केचिदविद्वांसो मायासंसृति[5]मात्मनः ॥ अनाद्यावर्तितं नृणां कादाचित्कं प्रचक्षते ॥४१॥
य एवमेतद्भृगुवर्य वर्णितं रथाङ्गपाणेरनुभावभावितम् ॥ संश्रावयेत्संश्रृणुयादु तावुभौ[6] तयोर्न कर्माशयसंसृति-
र्भवेत् ॥ ४२ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे दशमोऽध्यायः ॥ १० ॥ ॥ छ ॥ ॥ शौनक उवाच ॥
अथेममर्थं पृच्छामो भवन्तं बहुवित्तमम् ॥ समस्ततन्त्रराद्धान्ते भवान्भागवत तत्त्ववित्[7] ॥ १ ॥ ॥

मविद्वांसः । विद्वांसस्तु मायाशिशोः श्वासोच्छ्वासाभ्यां सप्तकृत्वस्तदुदरप्रवेशनिर्गमतः सप्तकल्पत्वं तत्क्षणमात्रेणेति वदन्ति, अतो न विरोध इत्यर्थः ॥ ४१ ॥ संश्रृणुयात् । उ इति हर्षे । संश्रावयेद्वा । यौ तावुभौ । तयोः कर्मवासनाकृता संसृतिर्न भवेदिति ॥४२॥ ॥ इति श्रीमद्भा० द्वादशस्कन्धे भावार्थदीपिकायां टीकायां दशमोऽध्यायः ॥१०॥ ॥छ॥ ॥ एकादशे तु पूजार्थं महापुरुषवर्णनम् ॥ रवेर्व्यूहस्य चाख्यानं प्रतिमासं पृथक् पृथक् ॥१॥ येनामर्त्यत्वमापन्नो मर्त्योऽसौ भार्गवोत्तमः ॥ तं पृच्छति क्रियायोगं साङ्गोपाङ्गादिकल्पितम् ॥ २ ॥ अथेति । हे भागवत, यतो भवान् सन्समस्ततन्त्रराद्धान्ते तत्त्वविद्रहस्यज्ञः ॥१॥

१ स्वयं पूर्णोदत एव भक्तेषु कामाभिवर्षणात्त्वत्त इत्यर्थः । २ 'इत्यर्थितः' इति पाठः । ३ 'कामस्तेऽयं महर्षेऽस्तु' इति पाठः । ४ 'पुरा मुनेः' इति मूले टीकायां च कचित् पाठः । ५ 'संसृतिरात्मनः' इति पाठो मूले टीकायां च कचित् । ६ तावुभौ कृतार्थाविति शेष इति बाल० । तावुभौ तुल्याविति शेष इति चक्र० । ७ 'भगवान्भावतत्त्ववित्' इति मूले, टीकायां च 'यतो भगवान् भवान् भावतत्त्वविद्रहस्यज्ञ' इति पाठः ।

प्रष्टव्यमाह—तान्त्रिका इति । परिचर्यायामुपासनायां विषये । केवलस्य चैतन्यघनस्य । अङ्गानि पादादीन्युपाङ्गानि गरुडादीन्यायुधानि सुदर्शनादीन्याकल्पाः कौस्तुभादयस्तेषां द्वन्द्वैक्यम् । तद्यथा कल्पयन्ति यैश्च तत्त्वैः कल्पयन्ति तन्नो वर्णयेति ॥२॥३॥ गुरूपदेशगम्यत्वादस्यार्थस्य तन्नमस्कारपूर्वकमाह—नमस्कृत्येति । विभूतीर्विराड्विग्रहाद्याः ॥४॥ अङ्गादिकल्पनां भूरादिभिर्दर्शयितुं प्रथमं तावद्यथा कल्पयन्तीति प्रश्नस्य वैराजरूपेणेत्युत्तरं वक्तुं विराड्विग्रहमाह—मायाद्यैः प्रकृतिसूत्रमहदहंकारपञ्चतन्मात्रैर्नवभिस्तत्त्वैः । विकार एकादशेन्द्रियाणि पञ्च महाभूतानीति षोडश तन्मयो विराट् स प्रसिद्धो निर्मितः । यत्र विराजि सचित्के चेतनाधिष्ठिते भुवनत्रयं दृश्यते । अनेनाङ्गादिकल्पनासौलभ्यं दर्शितम् ॥ ५ ॥ एतद्वै पौरुषं रूपम् । पुरुषस्य वैराजस्य रूपमेवेश्वरेणाधिष्ठितत्वात्तदभेद-

तान्त्रिकाः परिचर्यायां केवलस्य श्रियःपतेः ॥ अङ्गोपाङ्गायुधाकल्पं कल्पयन्ति यथा च यैः ॥ २ ॥ तन्नो वर्णय
भद्रं ते क्रियायोगं बुभुत्सताम् ॥ येन क्रियानैपुणेन मर्त्यो यायादमर्त्यताम्[1] ॥ ३ ॥ ॥ सूत उवाच ॥ नमस्कृत्य
गुरून्वक्ष्ये विभूतीर्वैष्णवीरपि ॥ याः प्रोक्ता वेदतन्त्राभ्यामाचार्यैः पद्मजादिभिः ॥ ४ ॥ मायाद्यैर्नवभिस्तत्त्वैः
स विकारमयो विराट् ॥ निर्मितो दृश्यते यत्र सचित्के भुवनत्रयम् ॥ ५ ॥ एतद्वै पौरुषं रूपं भूः पादौ द्यौः
शिरो नभः ॥ नाभिः सूर्योऽक्षिणी नासे वायुः कर्णौ दिशः प्रभोः ॥ ६ ॥ प्रजापतिः प्रजननमपानो मृत्यु-
रीशितुः ॥ तद्बाहवो लोकपाला मनश्चन्द्रो भ्रुवौ यमः ॥ ७ ॥ लज्जोत्तरोऽधरो लोभो दन्ता ज्योत्स्ना स्मयो[2] भ्रमः ॥
रोमाणि भूरुहा भूम्नो मेघाः पुरुषमूर्धजाः ॥ ८ ॥ यावानयं वै पुरुषो यावत्या संस्थया मितः ॥ तावानसावपि
महापुरुषो लोकसंस्थया ॥ ९ ॥ कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बिभर्त्यजः ॥ तत्प्रभा व्यापिनी साक्षाच्छ्रीवत्स-
मुरसा विभुः ॥ १० ॥ स्वमायां वनमालाख्यां नानागुणमयीं दधत् ॥ वासश्छन्दोमयं पीतं ब्रह्मसूत्रं त्रिवृ-
त्स्वरम् ॥ ११ ॥ बिभर्ति सांख्यं योगं च देवो मकरकुण्डले ॥ मौलिं पदं पारमेष्ठ्यं सर्वलोकाभयंकरम् ॥ १२ ॥
अव्याकृतमनन्ताख्यमासनं यदधिष्ठितः ॥ धर्मज्ञानादिभिर्युक्तं सत्त्वं पद्ममिहोच्यते ॥ १३ ॥ ॥

विवक्षया तस्य रूपमुच्यते । अङ्गकल्पनामाह—भूः पादावित्यादित्रिभिः । भूराद्यनुवादेन भगवत्पादादिभावना विधीयते ॥ ६ ॥ प्रजननं मेढ्रम् । अपानः पायुः ॥ ७ ॥ ८ ॥ अनुक्तमन्यदप्येवमूह्यमित्याह—यावानयं व्यष्टिः पुरुषः स्वमानतः सप्तवितस्तिः । संस्थयावयवसंनिवेशेन मितः परिमितः ॥ ९ ॥ भूषणादीन्याह—कौस्तुभेत्यादिना । स्वात्मज्योतिः शुद्धं जीवचैतन्यम् । या तस्य कौस्तुभस्य प्रभा तामेव श्रीवत्सं बिभर्ति ॥ १० ॥ त्रिवृत्स्वरं त्रिमात्रं प्रणवम् ॥ ११ ॥ पारमेष्ठ्यं पदं ब्रह्मलोकम् ॥ १२ ॥ अव्याकृतं प्रधानम् । यदधिष्ठितोऽधिष्ठाय स्थितः । तदासनभूतं पद्मं सत्त्वं सत्त्वगुणः ॥ १३ ॥ ॥ ॥

१ अमर्त्यतां जरामरणराहित्यं, मुक्तिमित्यर्थः । २ स्मयो हासः । भ्रमो भ्रमहेतुर्माया ।

मुख्यतत्त्वं प्राणतत्त्वम् । 'प्राणो वै मुख्यः' इति श्रुतेः । दरवरं शङ्खम् ॥ १४ ॥ १५ ॥ आकूतीः क्रियाशक्तियुक्तं मनः । अस्य रथस्याभिव्यक्तिं बहिरभिव्यक्तं रूपम् । मुद्रया धृतयार्थक्रियात्मतां वरदाभयदादिरूपत्वं बिभर्ति । तत्तन्मुद्रया तथा तथा भावयेदित्यर्थः ॥ १६ ॥ मण्डलं देवयजनम् । देवपूजाभूमिं सूर्यमण्डलत्वेन भावयेदित्यर्थः । अन्तर्वह्निमण्डलं वा । दीक्षासंस्कार आत्मनो गुरुकृतां मन्त्रदीक्षामेवात्मनस्तत्पूजायोग्यतां भावयेदित्यर्थः । परिचर्येति । भगवतस्तां परिचर्यां स्वस्य सकलपापक्षयायेत्येवं भावयेदित्यर्थः ॥१७॥ पूर्वमासनपद्ममुक्तमिदानीं करस्थं पद्ममाह—भगवानिति । भगशब्दार्थमैश्वर्यादिषाड्गुण्यम् ॥१८॥ हे द्विजाः । एकवचनान्तो वा पाठः । अकुतोभयं कैवल्यं धाम गृहमभजत् । यद्वा, वैकुण्ठस्य विशेषणमकुतोभयं यद्धामेति । त्रिवृत् ऋग्यजुःसामरूपो वेदः, 'सुपर्णोऽसि गरुत्मांस्त्रिवृत्ते शिरः' इत्यादिमन्त्रलिङ्गात् । यज्ञं यज्ञरूपं पुरुषम्, 'यज्ञो वै विष्णुः' इति श्रुतेः ॥१९॥ अनपायिनी हरेः शक्तिः ।

ओजः सहो बलयुतं मुख्यतत्त्वं गदां दधत् ॥ अपां तत्त्वं दरवरं तेजस्तत्त्वं सुदर्शनम् ॥ १४ ॥ नभोनिभं[1] नभस्तत्त्वमसिं चर्म तमोमयम् ॥ कालरूपं धनुः शार्ङ्गं तथा कर्ममयेषुधिम् ॥ १५ ॥ इन्द्रियाणि शरानाहुराकूतीरस्य[2] स्यन्दनम् ॥ तन्मात्राण्यस्याभिव्यक्तिं मुद्रयार्थक्रियात्मताम् ॥ १६ ॥ मण्डलं देवयजनं दीक्षासंस्कार आत्मनः ॥ परिचर्या भगवत आत्मनो दुरितक्षयः ॥ १७ ॥ भगवान्भगशब्दार्थं लीलाकमलमुद्वहन्[3] ॥ धर्मं यशश्च भगवांश्चामरव्यजनेऽभजत् ॥१८॥ आतपत्रं तु वैकुण्ठं द्विजा धामाकुतोभयम् ॥ त्रिवृद्वेदः सुपर्णाख्यो यज्ञं वहति पूरुषम् ॥१९॥ अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः ॥ विष्वक्सेनस्तन्त्रमूर्तिर्विदितः पार्षदाधिपः ॥ नन्दादयोऽष्टौ द्वास्थाश्च तेऽणिमाद्या हरेर्गुणाः ॥ २० ॥ वासुदेवः संकर्षणः प्रद्युम्नः पुरुषः स्वयम् ॥ अनिरुद्ध इति ब्रह्मन्मूर्तिव्यूहोऽभिधीयते ॥ २१ ॥ स विश्वस्[4]तैजसः[5] प्राज्ञस्[6]तुरीय[7] इति वृत्तिभिः ॥ अर्थेन्द्रियाशयज्ञानैर्भगवान्परिभाव्यते ॥ २२ ॥ अङ्गोपाङ्गायुधाकल्पैर्भगवांस्तच्चतुष्टयम् ॥ बिभर्ति स्म चतुर्मूर्तिर्भगवान्हरिरीश्वरः ॥ २३ ॥ ॥

तत्र हेतुः—साक्षादात्मनः स्वरूपस्य चिद्रूपत्वात्तस्यास्तदभेदादित्यर्थः । मन्त्रमूर्तिः पञ्चरात्राद्यागमरूपः । येऽणिमादयोऽष्टौ गुणास्ते हरेर्द्वारपाला नन्दादयः ॥ २० ॥ तस्यैव चतुर्व्यूहोपासनामाह—वासुदेवादिशब्दैः पुरुषः श्रीनारायण एव स्वयं मूर्तिभेदैरुपास्य इत्यभिधीयते ॥ २१ ॥ तस्यैवाध्यात्मनि चतुर्धोपासनामाह—स एव भगवान्विश्वादिशब्दैर्वृत्तिभिर्जाग्रदाद्यवस्थाभिः परिभाव्यते । तद्वृत्त्युपाधीनाह—अर्था बाह्याः । इन्द्रियं मनः । आशयस्तदुभयसंस्कारयुक्तमज्ञानम् । ज्ञानं त्रितयसाक्षि तैः ॥ २२ ॥ उक्तचतुर्व्यूहद्वयोपासनेऽपि पूर्वोक्तभङ्गाद्युपासनमाह—अङ्गेति । अङ्गादिभिरुपलक्षितो भगवान्हरिर्वासुदेवादिचतुर्मूर्तिः सन्विश्वादिचतुष्टयं बिभर्ति स्म । विश्वादिभावेऽपि तन्नियन्तुस्तस्य न जीवत्वमित्याह—विश्वादिचतुष्टयं बिभ्रदपि भगवानीश्वर एवेति ॥ २३ ॥ ॥

१ नभोवन्निर्मलम् । २ आकूतिरिति लक्षणया क्रियाशक्तियुक्तं मनो यस्य भगवतः स्यन्दनमाहुः । 'आकूतिः स्यन्दनं विभोः' इति वीर० शुक० पाठः । ३ उद्वहन् भवतीति शेषः । तथा च भिन्नवाक्यत्वेन न भगवच्छब्दपौनरुक्त्यम् । एकस्य भगवच्छब्दस्य पूज्य इत्यर्थो वा । ४ तथा चेन्द्रियैरर्थावभासकजाग्रदवस्थायां विश्व इति । ५ मनोमात्रावभास्यस्वप्नावस्थायां तैजस इति । ६ अज्ञानोपलक्षितसुषुप्तावस्थायां प्राज्ञ इति । ७ तत्र चैतन्यं स एव तुरीय इति ।

तस्यैव ब्रह्मादित्रिमूर्तितामाह—द्विजऋषभेति । स एष एक एव भगवान् ब्रह्मयोनिर्वेदस्य कारणमित्यादिहेतुत्रयम् । वस्तुतो भेदाभावेऽप्येतज्जगत्स्वगतमायया सृजति हरति पातीति कृत्वाख्यया ब्रह्मादिरूपयानावृताक्षोऽनाच्छन्नज्ञानोऽपि विवृत इव भिन्न इव निरुक्तः शास्त्रेषु नतु भिन्नः । अत्र विद्वदनुभवं प्रमाणयति—यतस्तत्परैरात्मत्वेनेव लभ्यत इति ॥ २४ ॥ यस्येदमुपासनमुक्तं तं श्रीकृष्णं प्रार्थयते—कृष्णसख अर्जुनस्य सखे । वृष्णिश्रेष्ठ । अवनिध्रुहो ये राजन्यास्तेषां वंशस्य दहन । अनपवर्गमक्षीणं वीर्यं यस्य । गोपवनितानां व्रजाः समूहा भृत्या नारदादयस्तैर्गीतं तीर्थभूतं श्रवः कीर्तिर्यस्य । श्रवणमेव मङ्गलं यस्य ॥ २५ ॥ एतज्जपमात्रस्यापि ब्रह्मज्ञानं फलमित्याह—य इति । कल्ये उषःकाले यस्तच्चित्तः प्रयतः शुचिश्च स जप्त्वा गुहाशयं हृदिस्थं ब्रह्म पश्यति ॥ २६ ॥ मण्डलं देवयजनमित्युक्त्या बुद्धिमागतो मूर्तिव्यूहप्रसङ्गेन रविव्यूहोऽत्र पृच्छ्यते—शुक इति । पञ्चमे यदाह—'तथान्ये च ऋषयो गन्धर्वा अप्सरसो

द्विजऋषभ स एष ब्रह्मयोनिः स्वयंदृक् स्वमहिमपरिपूर्णो मायया च स्वयैतत् ॥ सृजति हरति पातीत्याख्ययानावृताक्षो विवृत इव निरुक्तस्तत्परैरात्मलभ्यः ॥ २४ ॥ श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य[1] ॥ गोविन्द गोप[2]वनिताव्रजभृत्यगीततीर्थश्रवः श्रवणमङ्गल पाहि भृत्यान् ॥ २५ ॥ य इदं कल्य उत्थाय महापुरुषलक्षणम् ॥ तच्चित्तः प्रयतो जप्त्वा ब्रह्म वेद गुहाशयम् ॥ २६ ॥ ॥ शौनक उवाच ॥ शुको यदाह भगवान् विष्णुराताय शृण्वते ॥ सौरो गणो मासि मासि नाना वसति सप्तकः ॥२७॥ तेषां नामानि कर्माणि संयुक्ता[3]नामधीश्वरैः ॥ ब्रूहि नः श्रद्दधानानां व्यूहं सूर्यात्मनो हरेः ॥ २८ ॥ ॥ सूत उवाच ॥ अनाद्यविद्यया विष्णोरात्मनः सर्वदेहिनाम् ॥ निर्मितो लोकतन्त्रोऽयं लोकेषु परिवर्तते ॥ २९ ॥ एक एव हि लोकानां सूर्य आत्मादिकृद्धरिः ॥ सर्ववेदक्रियामूलमृषिभिर्बहुधोदितः ॥३०॥ कालो देशः क्रिया कर्ता करणं कार्यमागमः ॥ द्रव्यं फलमिति ब्रह्मन्नवधोक्तोऽजया हरिः ॥३१॥

नागा ग्रामण्यो यातुधाना देवा इत्येकैकशो गणाः सप्त' इत्यादिना । सौरः सूर्यसंबन्धी । सप्तकः सप्तानां गणः ॥ २७ ॥ तेषां सप्तानामधीश्वरैस्तत्तत्पतिभिस्तत्तन्मासाधिकृतसूर्यैर्वा व्यूहं विभागम् ॥ २८ ॥ तत्र तावत् व्यूहं निरूपयितुं प्रथमं सूर्यस्वरूपमाह—अनाद्यविद्यया मायया । अयं सूर्यः । लोकयात्राप्रवर्तकः ॥ २९ ॥ अतस्तस्य क्रियाभेदोपाधिकमेव नानात्वं, न स्वत इत्याह—एक एवेति । 'सूर्य आत्मा जगतस्तस्थुषश्च' इति श्रुतेः । जगदात्मा आदिकृत्सृष्टिकर्ता हरिरेव सूर्यः, स च सर्वासां वेदोक्तक्रियाणां मूलं संस्तेनोपाधिना बहुधोक्तः ॥ ३० ॥ कालरूपधारिणो हरेर्द्वादशादित्यरूपं भेदं क्रियोपाधिकं दर्शयितुं प्रथमं सर्वकर्मप्रवृत्तये मायाकृतं नवधा भेदमाह—काल इति । कालः प्रातरादिः । देशः समादिः । क्रिया अनुष्ठानम् । कर्ता ब्राह्मणादिः । करणं स्रुगादिः । कार्यं यागादि । आगमो मन्त्रादिः । द्रव्यं व्रीह्यादि । फलं स्वर्गादि ॥ ३१ ॥ ॥ ॥ ॥ ॥

१ 'वृष्णिवृषावनि' इति पाठः । २ 'गोद्विजसुरार्तिहरावतार' इति पाठः । ३ अधीश्वरैः संयुक्तानामित्यनेन तेषां प्रत्येकं स्वस्वपतिसाहित्येन द्वन्द्वं ज्ञेयम् । अत एव द्वन्द्वशः सप्त पृथक्चतुर्दशेति पञ्चमोक्तिः संगच्छते । सूर्यस्यापि स्वनियन्त्रन्तर्यामिसाहित्येन द्वन्द्वं ज्ञेयमिति बालबोधिन्याम् । क्वचित्तु 'नियुक्तानाम्' इति पाठः, तत्र नितरां युक्तानामित्यर्थः ।

तत्र च कालस्वरूपधारी भगवान्पृथक् चरति । मध्वादिषु चैत्रादिषु । लोकतन्त्राय लोकयात्रानिर्वाहाय ॥ ३२ ॥ तानेव गणानाह—धातेति द्वादशभिः । धाता सूर्यः । कृतस्थली अप्सराः । हेती राक्षसः । वासुकिर्नागः । रथकृद्यक्षः । पुलस्त्य ऋषिः । तुम्बुरुर्गन्धर्वः । मधुमासं चैत्रम् । नयन्त्यनुवर्तयन्ति ॥ ३३ ॥ अथौजा यक्षः । प्रहेती राक्षसः । नारदो गन्धर्वः । कच्छनीरो नागः । माधवं वैशाखम् ॥ ३४ ॥ मित्रः सूर्यः । पौरुषेयो राक्षसः । रथस्वनो यक्षः । शुक्रमासं ज्येष्ठम् ॥ ३५ ॥ वरुणः सूर्यः । सहजन्यो यक्षः । शुक्रो नागः । चित्रस्वनो राक्षसः । शुचिमासमाषाढम् ॥ ३६ ॥ इन्द्रः सूर्यः । विश्वावसुर्गन्धर्वः । श्रोता यक्षः । एलापत्रो नागः । वर्यो राक्षस इति स्वयमेव व्याख्यातम् । नभोमासं श्रावणम् ॥ ३७ ॥ विवस्वान् सूर्यः । उग्रसेनो गन्धर्वः । व्याघ्रो राक्षसः ।

मध्वादिषु द्वादशसु भगवान्कालरूपधृक् ॥ लोकतन्त्राय चरति पृथग्द्वादशभिर्गणैः[2] ॥ ३२ ॥ धाता कृतस्थली हेतिर्वासुकी रथकृन्मुने ॥ पुलस्त्यस्तुम्बुरुरिति मधुमासं नयन्त्यमी ॥ ३३ ॥ अर्यमा पुलहोऽथौजाः प्रहेतिः पुञ्जिकस्थली ॥ नारदः कच्छनीरश्च नयन्त्येते स्म माधवम् ॥ ३४ ॥ मित्रोऽत्रिः पौरुषेयोऽथ तक्षको मेनका हहाः ॥ रथस्वन इति ह्येते शुक्रमासं नयन्त्यमी ॥ ३५ ॥ वसिष्ठो वरुणो रम्भा सहजन्यस्तथा हुहूः ॥ शुक्रश्चित्रस्वनश्चैव शुचिमासं नयन्त्यमी ॥ ३६ ॥ इन्द्रो विश्वावसुः श्रोता एलापत्रस्तथाङ्गिराः ॥ प्रम्लोचा राक्षसो वर्यो नभोमासं नयन्त्यमी ॥ ३७ ॥ विवस्वानुग्रसेनश्च व्याघ्र आसारणो भृगुः ॥ अनुम्लोचा शङ्खपालो नभस्याख्यं नयन्त्यमी ॥ ३८ ॥ पूषा धनंजयो वातः सुषेणः सुरुचिस्तथा ॥ घृताची गौतमश्चेति तपोमासं नयन्त्यमी ॥ ३९ ॥ क्रतुर्[3]वर्चा भरद्वाजः पर्जन्यः सेनजित्तथा ॥ विश्व ऐरावतश्चैव तपस्याख्यं नयन्त्यमी ॥ ४० ॥ अथांशुः कश्यपस्तार्क्ष्य ऋतसेन[4]स्तथोर्वशी ॥ विद्युच्छत्रुर्[5]महाशङ्खः सहोमासं नयन्त्यमी ॥ ४१ ॥ भगः स्फूर्जोऽरिष्टनेमिरूर्ण आयुश्च पञ्चमः ॥ कर्कोटकः पूर्वचित्तिः पुष्यं[6]मासं नयन्त्यमी ॥ ४२ ॥ ॥ ॥

आसारणो यक्षः । शङ्खपालो नागः । नभस्याख्यं भाद्रपदम् ॥ ३८ ॥ धनंजयो नागः । वातो राक्षसः । सुषेणो गन्धर्वः । सुरुचिर्यक्षः । तपोमासं माघम् । मासक्रमातिलङ्घनं कौर्मोक्तादित्यानुक्रमानुसारेण । वैष्णवे तु मासक्रमेणोक्तिः । क्वचिन्नामव्यत्ययस्तु कल्पभेदेनेति ज्ञेयम् ॥ ३९ ॥ क्रतुर्यक्षः । वर्चा राक्षसः । पर्जन्यः सूर्यः । सेनजिदप्सराः । विश्वो गन्धर्वः । ऐरावतो नागः । तपस्याख्यं फाल्गुनम् ॥ ४० ॥ अंशुः सूर्यः । अंश इति वा पाठः । तार्क्ष्यो यक्षः । ऋतसेनो गन्धर्वः । विद्युच्छत्रू राक्षसः । महाशङ्खो नागः । सहोमासं मार्गशीर्षम् ॥४१॥ भगः सूर्यः । स्फूर्जो राक्षसः । अरिष्टनेमिर्गन्धर्वः । ऊर्णो यक्षः । आयुर्ऋषिः । कर्कोटको नागः ॥ ४२ ॥ ॥ ॥ ॥

१ 'सौरो गणो मासि मासि' इति यत्पृष्टं तत्र प्रथमं चैत्रमाससप्तकमाह । २ 'गुणैः' इति विज० संमतः पाठः । ३ 'ऋतुः' इति मूले टीकायां च पाठः । ४ 'धृतसेनः' इति पाठः । ५ 'विद्युच्छन्नः' इति मूले टीकायां च पाठः । ६ 'पौषमासम्', 'सहस्याख्यं' इति पाठौ ।

त्वष्टा सूर्यः । ऋचीकतनयो जमदग्निः । कम्बलो नागः । ब्रह्मापेतो राक्षसः । शतजिद्यक्षः । धृतराष्ट्रो गन्धर्वः । इषंभरा आश्विनपालकाः ॥ ४३ ॥ विष्णुरादित्यः । अश्वतरो नागः । सूर्यवर्चा गन्धर्वः । सत्यजिद्यक्षः । मखापेतो राक्षसः । ऊर्जमासं कार्तिकमासम् । एते चादित्यादयः कौर्मे विभज्योक्ताः—'धाताऽर्यमा च मित्रश्च वरुणश्चेन्द्र एव च । विवस्वानथ पूषा च पर्जन्यश्चांशुरेव च ॥ भगस्त्वष्टा च विष्णुश्च आदित्या द्वादश स्मृताः । पुलस्त्यः पुलहश्चात्रिर्वसिष्ठोऽथाङ्गिरा भृगुः ॥ गौतमोऽथ भरद्वाजः कश्यपः क्रतुरेव च । जमदग्निः कौशिकश्च मुनयो ब्रह्मवादिनः ॥ रथकृच्चोऽरिष्टनेमिर्ग्रामणीश्च रथस्वनः । रथचित्रस्वनः श्रोता अरुणः सेनजित्तथा ॥ तार्क्ष्यश्चारिष्टनेमिश्च ऋतजित्सत्यजित्तथा ॥' एते यक्षाः । 'अथ हेतिः प्रहेतिश्च पौरुषेयो वधस्तथा । वर्यो व्याघ्रस्तथायश्च वायुर्विद्युद्दिवाकरः ॥ ब्रह्मापेतश्च विप्रेन्द्रा यज्ञापेतश्च राक्षसः । वासुकिः कच्छनीरश्च तक्षकः सर्पपुङ्गवः ॥ एलापत्रः शङ्खपालस्तथैरावतसंज्ञितः । धनंजयो महापद्मस्तथा कर्कोटको द्विजाः । कम्बलोऽश्वतरश्चैव वहन्त्येनं यथाक्रमम् । तुम्बुरुर्नारदो हाहा हूहूर्विश्वावसुस्तथा ॥ उग्रसेनो

त्वष्टा ऋचीकतनयः कम्बल[2]श्च तिलोत्तमा ॥ ब्रह्मापेतोऽथ शतजिद्धृतराष्ट्र इषंभराः ॥ ४३ ॥ विष्णुरश्वतरो रम्भा सूर्यवर्चाश्च सत्यजित् ॥ विश्वामित्रो मखापेत ऊर्जमासं नयन्त्यमी ॥ ४४ ॥ एता भगवतो विष्णोरादित्यस्य विभूतयः ॥ स्मरतां संध्ययोर्नॄणां हरन्त्यंहो दिने दिने ॥ ४५ ॥ द्वादशस्वपि मासेषु देवोऽसौ षड्भिरस्य वै ॥ चरन्समन्तात्तनुते परत्रेह च सन्मतिम् ॥ ४६ ॥ सामर्ग्यजुर्भिस्तल्लिङ्गैरृषयः संस्तुवन्त्यमुम् ॥ गन्धर्वास्तं प्रगायन्ति नृत्यन्त्यप्सरसोऽग्रतः ॥४७॥ उन्नह्यन्ति रथं नागा ग्रामण्यो रथयोजकाः ॥ चोदयन्ति रथं पृष्ठे नैर्ऋता बलशालिनः ॥४८॥ वालखिल्याः सहस्राणि षष्टिर्ब्रह्मर्षयोऽमलाः ॥ पुरतोऽभिमुखं यान्ति स्तुवन्ति स्तुतिभिर्विभुम् ॥ ४९ ॥ एवं ह्यनादिनिधनो भगवान्हरिरीश्वरः ॥ कल्पे कल्पे स्वमात्मानं व्यूह्य[3] लोकानवत्यजः ॥ ५० ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे आदित्यव्यूहविवरणं नामैकादशोऽध्यायः ॥ ११ ॥ ॥ ॥

वसुरुचिर्विश्वावसुरथापरः । चित्रसेनस्तथोर्णायुर्धृतराष्ट्रो द्विजोत्तमाः ॥ सूर्यवर्चा द्वादशेति गन्धर्वा गायतां वराः । कृतस्थल्यप्सरोवर्या तथान्या पुञ्जिकस्थली ॥ मेनका सहजन्या च प्रम्लोचा च द्विजोत्तमाः । अनुम्लोचा घृताची च विश्वाची चोर्वशी तथा ॥ अन्या च पूर्वचित्तिः स्यादन्या चैव तिलोत्तमा । रम्भा चेति द्विजश्रेष्ठास्तथैवाप्सरसः स्मृताः ॥' इति ॥ ४४ ॥ ४५ ॥ एतेषां पृथक्कर्माणि निरूपयति—द्वादशस्वपीति त्रिभिः । असौ देवः सूर्यः षड्भिर्गन्धर्वादिभिरस्य जनस्य समन्ताच्चरन् शुभां मतिं तनुते । गायत्र्यर्थोऽनेन सूचितः ॥ ४६ ॥ तल्लिङ्गैः सूर्यप्रकाशकैः ॥ ४७ ॥ उन्नह्यन्ति दृढं बध्नन्ति । ग्रामण्यो यक्षाः । नैर्ऋता राक्षसाः ॥ ४८ ॥ किंच, वालखिल्या इति । एवं प्रतिमासं त एव स्तुवन्ति विभुं सूर्यम् ॥ ४९ ॥ व्यूह्य विभज्य ॥ ५० ॥ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे भावार्थदीपिकायां टीकायामेकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

१ 'तथापश्च' इति पाठः । २ 'कम्बलाश्वः' इति मूले टीकायां च पाठः । ३ 'लोकांस्तपत्यजः' इति पाठः ।

द्वादशे तु पुराणोक्तसर्वार्थानुक्रमः कृतः ॥ प्रथमस्कन्धमारभ्य प्राधान्येन समासतः ॥ १ ॥ तदेवमस्मिन्पुराणे विस्तरेणोक्तानर्थान्संक्षेपतो वर्णयिष्यन्धर्मादीन्प्रणमति—नम इति । महते हरिभक्तिलक्षणाय । ब्राह्मणेभ्यो ब्राह्मणान् । सनातनाननादीन् । धर्मानित्युपलक्षणं पुराणोक्तार्थानाम् ॥ १ ॥ पुरुषत्वे उचितं श्रवणादियोग्यम् ॥२॥ एतत्प्रपञ्चयति—अत्रेति । भगवानैश्वर्यादिषड्गुणः । साक्षात्संकीर्तित इति देवताकाण्डार्थः ॥३॥ ब्रह्मकाण्डार्थमाह—अत्र ब्रह्मेति । गुह्यं निर्गुणम् । प्रभवाप्ययम्,—प्रभवत्यस्मादिति प्रभवम्, अप्येत्यस्मिन्नित्यप्ययम्, तच्च तच्च । अनेनाश्रयशब्दार्थो दर्शितः । विज्ञानसंयुतमपरोक्षज्ञानपर्यन्तं ज्ञानम् । तदुपाख्यानं तज्ज्ञानमुपाख्यायते प्रकाश्यते येन तज्ज्ञानसाधनमित्यर्थः ॥ ४ ॥ कर्मकाण्डार्थमाह—भक्तियोगश्च साध्यसाधनरूपः । तदाश्रयं भक्ति-

॥ सूत उवाच ॥ नमो धर्माय महते नमः कृष्णाय वेधसे ॥ ब्राह्मणेभ्यो नमस्कृत्य धर्मान्वक्ष्ये सनातनान् ॥ १ ॥
एतद्वः कथितं विप्रा विष्णोश्चरितमद्भुतम् ॥ भवद्भिर्यदहं पृष्टो नराणां पुरुषोचितम् ॥ २ ॥ अत्र संकीर्तितः
साक्षात्सर्वपापहरो हरिः ॥ नारायणो हृषीकेशो भगवान्सात्त्वतांपतिः ॥ ३ ॥ अत्र ब्रह्म परं गुह्यं जगतः प्रभ-
वाप्ययम् ॥ ज्ञानं च तदुपाख्यानं प्रोक्तं विज्ञानसंयुतम् ॥ ४ ॥ भक्तियोगः समाख्यातो वैराग्यं च तदाश्र-
यम् ॥ पारीक्षितमुपाख्यानं नारदाख्यानमेव च ॥ ५ ॥ प्रायोपवेशो राजर्षेर्विप्रशापात्परीक्षितः ॥ शुकस्य ब्रह्म-
र्षभस्य संवादश्च परीक्षितः ॥ ६ ॥ योगधारणयोत्क्रान्तिः संवादो नारदाजयोः ॥ अवतारानुगीतं च सर्गः
प्राधानिकोऽग्रतः ॥ ७ ॥ विदुरोद्धवसंवादः क्षत्तृमैत्रेययोस्ततः ॥ पुराणसंहिताप्रश्नो महापुरुषसंस्थितिः ॥ ८ ॥
ततः प्राकृतिकः सर्गः सप्त वैकृतिकाश्च ये ॥ ततो ब्रह्माण्डसंभूतिर्वैराजः पुरुषो यतः ॥ ९ ॥ कालस्य स्थूल-
सूक्ष्मस्य गतिः पद्मसमुद्भवः ॥ भुवं उद्धरणेऽम्भोधेर्हिरण्याक्षवधो यथा ॥ १० ॥ ऊर्ध्वतिर्यगवाक्सर्गो रुद्रसर्ग-
स्तथैव च ॥ अर्धनारीनरस्याथ यतः स्वायंभुवो मनुः ॥ ११ ॥ ॥ ॥

योगेन निष्पादितम् । एवं सामान्यतो निरूप्येदानीं द्वादशस्कन्धप्रकरणार्थाननुक्रामति—पारीक्षितमुपाख्यानं परीक्षिज्जन्मादि तत्प्रस्तावाय नारदाख्यानं च ॥ ५ ॥ ब्रह्मर्षभस्य ब्राह्मणोत्तमस्य । इति प्रथमस्कन्धार्थः ॥ ६ ॥ उत्क्रान्तिरर्चिरादिगतिः । प्राधानिकः प्रधानकार्यविराड्रूपः सर्गः । अग्रत आदितो महदादिक्रमेणेत्यर्थः । इति द्वितीयार्थः ॥ ७ ॥ महापुरुषस्य संस्थितिः प्रलये तूष्णीमवस्थानम् ॥ ८ ॥ प्राकृतिकः प्रकृतिभवो गुणक्षोभरूपः । वैकृतिका महदादयश्चकाराद्विकाराश्च ये तेषां सर्गः ॥ ९ ॥ गतिः स्वरूपम् । उद्धरणे उद्धारणे ॥ १० ॥ अर्धाभ्यां नारी च नरश्च तस्य सर्गः ॥ ११ ॥ ॥

१ 'यत्तद्ब्रह्म' इति पाठः । २ 'सदुपाख्यानं' इति पाठः । ३ 'शुकस्यैव च ब्रह्मर्षेः' इति मूले 'ब्रह्मर्षेर्ब्राह्मणोत्तमस्य' इति व्याख्यायां च पाठः । ४ भुव उद्धरणे निमित्ते यथा हिरण्याक्षवधः कृतस्तथोक्तमित्यर्थः । भुव उद्धरणमम्भोधेः सकाशात् । मकारलोपश्छान्दस इति चक्र० । अत्र 'भुव उद्धरणं चाब्धेः' इति, 'उद्धरणेऽम्भोधौ' इति, 'उद्धरणाम्भोधेः' इति च पाठाः आदर्शान्तरेषु । अन्तिमपाठे उद्धरणा उद्धारः । 'यथा' इत्यत्र 'तथा' इत्यपि पाठः क्वचित् । ५ 'तिर्यगधःसर्गः' इति पाठः । ६ 'सर्गः स्वायंभुवो यतः' इति पाठः । यतो याभ्यां नारीनराभ्याम् । ७ नारीनरयोः समाहारद्वन्द्वे तस्य द्विवचनान्तार्धशब्देन समासः ।

संतानो धर्मपत्नीनामिति नवब्रह्मसमुत्पत्तिरित्यस्यानन्तरं द्रष्टव्यम् ॥१२॥१३॥ इति तृतीयार्थः । चतुर्थस्कन्धार्थमाह—नवब्रह्मणां मरीच्यादीनां समुत्पत्तिः संतानः ॥ १४ ॥ पञ्चमस्कन्धार्थमाह—ततः प्रैयव्रतं प्रियव्रतस्य चरितम् ॥ १५ ॥ द्वीपाद्युपवर्णनं प्रथमं संक्षेपतस्ततो द्वीपादीनां ये गिरयो नद्यश्च तेषामुपवर्णनम् । पातालानां नरकाणां च संस्थितिः । अनेनैव नरकनिवर्तकमजामिलोपाख्यानं गृहीतं ततः पराचीनम् ॥१६॥ षष्ठार्थमाह—दक्षजन्मेति ॥१७॥

शतरूपा च या स्त्रीणामाद्या प्रकृतिरुत्तमा ॥ संतानो धर्मपत्नीनां कर्दमस्य प्रजापतेः ॥ १२ ॥ अवतारो भगवतः
कपिलस्य महात्मनः ॥ देवहूत्याश्च संवादः कपिलेन च धीमता ॥ १३ ॥ नवब्रह्मसमुत्पत्तिर्दक्षयज्ञविनाशनम् ॥
ध्रुवस्य चरितं पश्चात्पृथोः प्राचीनबर्हिषः ॥ १४ ॥ नारदस्य च संवादस्ततः प्रैयव्रतं द्विजाः ॥ नाभेस्ततोऽनुचरित-
मृषभस्य भरतस्य च ॥ १५ ॥ द्वीपवर्षसमुद्राणां गिरिनद्युपवर्णनम् ॥ ज्योतिश्चक्रस्य संस्थानं पातालनरकस्थितिः
॥ १६ ॥ दक्षजन्म प्रचेतोभ्यस्तत्पुत्रीणां च संततिः ॥ यतो देवासुरनरास्तिर्यङ्नगखगादयः ॥ १७ ॥ त्वाष्ट्रस्य जन्म
निधनं पुत्रयोश्च दितेर्द्विजाः ॥ दैत्येश्वरस्य चरितं प्रह्लादस्य महात्मनः ॥ १८ ॥ मन्वन्तरानुकथनं गजेन्द्रस्य विमोक्ष-
णम् ॥ मन्वन्तरावताराश्च विष्णोर्हयशिरादयः ॥ १९ ॥ कौर्मं धान्वन्तरं मात्स्यं वामनं च जगत्पतेः ॥ क्षीरोदमथनं
तद्वदमृतार्थे दिवौकसाम् ॥ २० ॥ देवासुरमहायुद्धं राजवंशानुकीर्तनम् ॥ इक्ष्वाकुजन्म तद्वंशः सुद्युम्नस्य महात्मनः
॥ २१ ॥ इलोपाख्यानमत्रोक्तं तारोपाख्यानमेव च ॥ सूर्यवंशानुकथनं शशादाद्या नृगादयः ॥ २२ ॥ सौकन्यं चाथ
शर्यातेः ककुत्स्थस्य च धीमतः ॥ खट्वाङ्गस्य च मान्धातुः सौभरेः सगरस्य च ॥ २३ ॥ रामस्य कोशलेन्द्रस्य चरितं किल्बि-
षापहम् ॥ निमेरङ्गपरित्यागो जनकानां च संभवः ॥ २४ ॥ रामस्य भार्गवेन्द्रस्य निःक्षत्रकरणं भुवः ॥ ऐलस्य सोम-
वंशस्य ययातेर्नहुषस्य च ॥ २५ ॥ दौष्यन्तेर्भरतस्यापि शन्तनोस्तत्सुतस्य च ॥ ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशोऽनु-
कीर्तितः ॥ २६ ॥ यत्रावतीर्णो भगवान्कृष्णाख्यो जगदीश्वरः ॥ वसुदेवगृहे जन्म ततो वृद्धिश्च गोकुले ॥ २७ ॥ ॥

सप्तमार्थमाह—पुत्रयोश्चेति ॥ १८ ॥ अष्टमार्थमाह—मन्वन्तरानुकथनमिति । क्वचित्कस्यचिदनुक्तिर्व्युत्क्रमोक्तिश्च भक्तिरसाकुलत्वेनेति द्रष्टव्यम् ॥ १९ ॥ २० ॥ नवमार्थमाह—राजवंशेति ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ सोमवंशादिभूतस्यैलस्य चरितम् ॥ २५ ॥ तत्सुतस्य भीष्मस्य ॥ २६ ॥ २७ ॥ ॥

१ 'ततो द्वीपसमुद्राद्रिवर्षनद्युपवर्णनम्' इति पाठः । २ क्वचित्तु 'कौर्मं मात्स्यं नारसिंहम्' इति पाठः, स चायुक्तोऽष्टमेऽनुल्लेखात् । भक्तिरसाकुलत्वेन व्युत्क्रमोक्तिर्वा तत्पाठे । ३ चरितमिति शेषः । ४ 'नृपा यतः' इति पाठे यतो यस्मिन्नित्यर्थः । क्वचित्तु 'नृपादयः' इत्यपि पाठः । ५ 'कौसलेन्द्रस्य चरितमद्भुतं' इति पाठः । ६ 'निःक्षत्रीकरणम्' इति पाठः । ७ 'नाहुषस्य च' इति पाठः । ८ 'दौष्कंतेः' इति पाठः । ९ 'तस्य वृद्धिः' इति पाठः ।

दशमार्थमाह—तस्य कर्माणीति । पूतनाया असुसहितस्य स्तन्यपयसः पानम् ॥ २८ ॥ सहभ्रातुः ससखस्य ॥ २९ ॥ ३० ॥ ३१ ॥ यज्ञाभिषेकम् । यज्ञः पूजा अभिषेकश्च तयोर्द्वन्द्वैक्यम् ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ द्विषतः शत्रून्प्रमथ्य ॥ ३७ ॥ ३८ ॥ ये च शम्बरादयस्तेषां माहात्म्यं प्रभावो वधश्च

तस्य [2]कर्माण्यपाराणि कीर्तितान्यसुरद्विषः ॥ पूतनाऽसुपयःपानं [3]शकटोचाटनं शिशोः ॥ २८ ॥ तृणावर्तस्य निष्पेषस्तथैव बकवत्सयोः ॥ धेनुकस्य सहभ्रातुः प्रलम्बस्य च संक्षयः ॥ २९ ॥ गोपानां च परित्राणं दावाग्नेः परिसर्पतः ॥ दमनं कालियस्याहेर्महाहेर्नन्दमोक्षणम् ॥ ३० ॥ व्रतचर्या तु कन्यानां यत्र तुष्टोऽच्युतो व्रतैः ॥ प्रसादो यज्ञपत्नीभ्यो विप्राणां चानुतापनम् ॥ ३१ ॥ गोवर्धनोद्धारणं च शक्रस्य सुरभेरथ ॥ यज्ञाभिषेकं कृष्णस्य स्त्रीभिः क्रीडा च रात्रिषु ॥ ३२ ॥ शङ्खचूडस्य दुर्बुद्धेर्वधोऽरिष्टस्य केशिनः ॥ अक्रूरागमनं पश्चात्प्रस्थानं रामकृष्णयोः ॥ ३३ ॥ व्रजस्त्रीणां विलापश्च मथुरालोकनं ततः ॥ गजमुष्टिकचाणूरकंसादीनां च यो वधः ॥ ३४ ॥ मृतस्यानयनं सूनोः पुनः सांदीपनेर्गुरोः ॥ मथुरायां निवसता यदुचक्रस्य यत्प्रियम् ॥ ३५ ॥ कृतमुद्धवरामाभ्यां युतेन हरिणा द्विजाः ॥ जरासन्धसमानीतसैन्यस्य बहुशो वधः ॥ घातनं यवनेन्द्रस्य कुशस्थल्या निवेशनम् ॥ ३६ ॥ आदानं पारिजातस्य सुधर्मायाः सुरालयात् ॥ रुक्मिण्या हरणं युद्धे प्रमथ्य द्विषतो हरेः ॥ ३७ ॥ हरस्य जृम्भणं युद्धे बाणस्य भुजकृन्तनम् ॥ प्राग्ज्योतिषपतिं हत्वा कन्यानां हरणं च यत् ॥ ३८ ॥ चैद्यपौण्ड्रकशाल्वानां दन्तवक्रस्य दुर्मतेः ॥ शम्बरो द्विविदः पीठो मुरः पञ्चजनादयः ॥ ३९ ॥ माहात्म्यं च वधस्तेषां वाराणस्याश्च दाहनम् ॥ भारावतरणं भूमेर्निमित्तीकृत्य पाण्डवान् ॥४०॥ विप्रशापापदेशेन संहारः स्वकुलस्य च ॥ उद्धवस्य च संवादो वासुदेवस्य चाद्भुतः ॥ ४१ ॥ यत्रात्मविद्या ह्यखिला प्रोक्ता धर्मविनिर्णयः ॥ ततो मर्त्यपरित्याग आत्मयोगानुभावतः ॥ ४२ ॥ युगलक्षणवृत्तिश्च कलौ नृणामुपप्लवः ॥ चतुर्विधश्च प्रलय उत्पत्तिस्त्रिविधा तथा ॥ ४३ ॥ ॥ ॥

॥ ३९ ॥ ४० ॥ एकादशार्थमाह—विप्रशापेति ॥ ४१ ॥ धर्मविनिर्णयो वर्णाश्रमधर्मविनिश्चयः । मर्त्यपरित्यागो मनुष्यत्वस्यान्तर्धानम् ॥ ४२ ॥ द्वादशार्थमाह—युगेति । युगलक्षणं तदनुरूपा वृत्तिश्चेत्यर्थः । त्रिविधा प्राकृतिकी नैमित्तिकी नित्या चेति ॥ ४३ ॥ ॥ ॥

१ शक्रेण कृता पूजा सुरभ्या कृतो योऽभिषेकः स इत्यर्थः । २ 'कर्माण्युदाराणि' इति पाठः । ३ 'शकटोत्पाटनं' इति पाठः । ४ एतदग्रे 'अघासुरासुसंहारः कस्य मायाप्रदर्शनम्' इति, क्वचिच्च 'अघासुरवधो धात्रा वत्सपालावगूहनम्' इत्यर्धमधिकं क्वचित् । ५ 'कालियस्याहो महाहेः' इति पाठः । ६ चैद्यादीनां माहात्म्यमासुरप्रभावो वधश्च ये च शंबरादयस्तेषां चेत्यन्वयः ७ उपप्लवो बुद्धिव्यामोहः धर्मविप्लवो वा ।

ऋषेर्व्यासस्य । सूर्यस्य च विन्यास इत्यर्थः ॥ ४४ ॥ इति चोक्तमिति चकारादन्यदपि वो युष्माभिरिह यत्पृष्टोऽस्मि तदुक्तमिति । किमेवं नानार्थकथनेन तत्राह—लीलेति । सर्वशः तत्तदर्थकीर्तनद्वारेणेत्यर्थः ॥ ४५ ॥ तत्कीर्तनेनापि किमित्यपेक्षायां तत्फलमाह द्वाभ्याम्—पतितः कूपादिषु । स्खलितः सोपानादिषु । आर्तो दुःखितः । क्षुत्त्वा क्षुतं कृत्वा विवशोऽपि ॥ ४६ ॥ संकीर्त्यमानो यद्वा श्रुतोऽनुभावो यस्य स पुंसां चित्तं प्रविश्य निःशेषं दुःखं विधुनोति । हीति सतामनुभवं प्रमाणयति । अर्को गिरिगुहादिध्वान्तं न धुनोतीत्यपरितोषाद्दृष्टान्तान्तरमाह—अतिवातोऽभ्रमिवेति ॥ ४७ ॥ हरिसंकीर्तनमेव महाफलं तद्व्यतिरिक्तं सर्वं मिथ्यालापमात्रमिति प्रपञ्चयति—मृषागिर इति चतुर्भिः । मृषागिरो मिथ्यावाचः । असतीरसत्यः । असतां कथा यासु ताः । यद्यासु

देहत्यागश्च राजर्षेर्विष्णुरातस्य धीमतः ॥ शाखाप्रणयनमृषेर्मार्कण्डेयस्य सत्कथा ॥ महापुरुषविन्यासः सूर्यस्य जगदात्मनः ॥ ४४ ॥ इति चोक्तं द्विजश्रेष्ठा यत्पृष्टोऽहमिहास्मि वः ॥ लीलावतारकर्माणि कीर्तितानीह सर्वशः ॥ ४५ ॥ [2]पतितः स्खलितश्चार्तः [3]क्षुत्त्वा वा विवशो ब्रुवन् ॥ हरये नम इत्युच्चैर्मुच्यते सर्वपातकात् ॥ ४६ ॥ संकीर्त्यमानो भगवाननन्तः श्रुतानुभावो व्यसनं हि पुंसाम् ॥ प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोऽर्कोऽभ्रमिवातिवातः ॥ ४७ ॥ मृषागिरस्ता ह्यसतीरसत्कथा न कथ्यते यद्भगवानधोक्षजः ॥ तदेव सत्यं तदु हैव मङ्गलं तदेव पुण्यं भगवद्गुणोदयम् ॥४८॥ तदेव रम्यं रुचिरं नवं नवं तदेव शश्वन्मनसो महोत्सवम् ॥ तदेव शोकार्णवशोषणं नृणां यदुत्तमश्लोकयशोऽनुगीयते ॥ ४९ ॥ न तद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् ॥ तद्ध्वाङ्क्षतीर्थं न तु हंससेवितं यत्राच्युतस्तत्र हि साधवोऽमलाः ॥ ५० ॥ स वाग्विसर्गो जनताघसंप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि ॥ नामान्यनन्तस्य यशोऽङ्कितानि यच्छृण्वन्ति गायन्ति गृणन्ति साधवः ॥ ५१ ॥ नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम् ॥ कुतः पुनः शश्वदभद्रमीश्वरे न ह्यर्पितं कर्म यदप्यनुत्तमम् ॥ ५२ ॥ ॥

उत्तमश्लोकस्य यशोऽनुगीयत इति यत्तदेव सत्यं तदेव हि मङ्गलम् । उ ह इति हर्षे । भगवद्गुणानामभ्युदयो यस्मात्तत् ॥ ४८ ॥ नवं नवं यथा भवति तथा रुचिरं रुचिप्रदम् । महानुत्सवो यस्मात् ॥ ४९ ॥ चित्राणि पदानि यस्मिन् । तदपि जगत्पवित्रयतीति तथा तद्धरेर्यशो न प्रगृणीत न वर्णयेत्तद्वचो ध्वाङ्क्षतीर्थं काकतुल्यनराणां रतिस्थानं नतु हंसैर्ज्ञानिभिः सेवितम् । तत्र हेतुः—यत्रेति ॥ ५० ॥ स वाग्विसर्गः स एव वाचः प्रयोगो जनताघसंप्लवो जनसमूहाघनाशकः । यद्यस्मात्तान्येवान्यैः कीर्त्यमानानि शृण्वन्ति श्रोतरि सति गायन्ति, नो चेत्स्वयमेव गृणन्ति ॥ ५१ ॥ इदानीं ज्ञानकर्मादरादपि भगवत्कीर्तनादिष्वेवादरः कर्तव्य इत्याह त्रिभिः—नैष्कर्म्यं ब्रह्म तत्प्रकाशकं यज्ज्ञानं यतो निरञ्जनमुपाधिनिवर्तकं तदप्यच्युतभक्तिवर्जितं चेन्न शोभते, नापरोक्षपर्यन्तं

१ तेषां तेषां लीलादीनामर्थः प्रयोजनं तत्कीर्तनद्वारेणेति भावः । २ पतित इत्यादि । कैमुत्यार्थेयमुक्तिः । पतित इत्याद्यापद्ग्रस्तोऽपि मुच्यते, किमुत यथावस्थ इत्यादि स्खलितादिषु योज्यम् । ३ 'श्रुत्वा' इति पाठः, तत्र हरये नम इति श्रुत्वेत्यर्थः ।

भवतीत्यर्थः । ईश्वरे न चेदर्पितं तर्हि यदनुत्तमं सर्वोत्तममपि कर्म तदपि पुनः कुतः शोभते । यतः शश्वत्साधनकाले फलकाले चाभद्रं दुःखात्मकम् ॥ ५२ ॥ किंच, वर्णाश्रमाचारादिषु यः परो महान्परिश्रमः स यशोयुक्तायां श्रियामेव । कीर्तिः संपत्तिश्च केवलं परः पुरुषार्थ इत्यर्थः । गुणानुवादादिभिस्तु श्रीधरपादपद्मयोरविस्मृतिर्भवति ॥ ५३ ॥ ततः किमत आह—अविस्मृतिरिति । क्षिणोति नाशयति ॥ ५४ ॥ अथेदानीं श्रोतॄनात्मानं चाभिनन्दन्नाह—यूयमिति द्वाभ्याम् । हे द्विजाग्र्याः, यद्यस्मादात्मन्यन्तःकरणे श्रीनारायणमाविवेश्य शश्वद्भजत । संभावनायां लोट् । अतो भूरिभागा बहुपुण्याः । कथंभूतम् । अखिला-

यशःश्रियामेव परिश्रमः परो वर्णाश्रमाचारतपःश्रुतादिषु ॥ अविस्मृतिः श्रीधरपादपद्मयोर्गुणानुवादश्रवणादि[1]-
भिर्हरेः ॥ ५३ ॥ अविस्मृतिः कृष्णपदारविन्दयोः क्षिणोत्यभद्राणि शमं तनोति च ॥ सत्त्वस्य शुद्धिं परमात्मभक्तिं
ज्ञानं च विज्ञानविरागयुक्तम् ॥ ५४ ॥ यूयं द्विजाग्र्या बत भूरिभागा यच्छश्वदात्मन्यखिलात्मभूतम् ॥ नारायणं
देवमदेवमीशमजस्रभावा[2] भजताविवेश्य ॥ ५५ ॥ अहं च संस्मारित आत्मतत्त्वं श्रुतं पुरा मे परमर्षिवक्त्रात् ॥
प्रायोपवेशे नृपतेः परीक्षितः सदस्यृषीणां महतां च शृण्वताम् ॥ ५६ ॥ एतद्वः कथितं विप्राः कथनीयोरुकर्मणः ॥
माहात्म्यं वासुदेवस्य सर्वाशुभविनाशनम् ॥ ५७ ॥ य[3] एवं श्रावयेन्नित्यं यामक्षणमनन्यधीः[4] ॥ श्रद्धावान् योऽनु-
शृणुयात्पुनात्यात्मानमेव सः ॥ ५८ ॥ द्वादश्यामेकादश्यां वा शृण्वन्नायुष्यवान्भवेत्[5] ॥ पठत्यनश्नन्प्रयतस्ततो[6]
भवत्यपातकी ॥ ५९ ॥ पुष्करे मथुरायां च द्वारवत्यां यतात्मवान् ॥ उपोष्य संहितामेतां पठित्वा मुच्यते
भयात् ॥ ६० ॥ देवता मुनयः सिद्धाः पितरो मनवो नृपाः ॥ यच्छन्ति कामान्गृणतः शृण्वतो यस्य कीर्तनात् ॥ ६१ ॥
ऋचो यजूंषि सामानि द्विजोऽधीत्यानुविन्दते ॥ मधुकुल्या घृतकुल्याः पयःकुल्याश्च तत्फलम् ॥ ६२ ॥ पुराण-
संहितामेतामधीत्य प्रयतो द्विजः ॥ प्रोक्तं भगवता यत्तु तत्पदं परमं व्रजेत् ॥ ६३ ॥ ॥ ॥

त्मभूतं सर्वान्तर्यामिणम् । अत एव देवं सर्वोपास्यम् । अदेवं न देवोऽन्यो यस्य तम् । कुतः । ईशम् । यद्वा, यस्माद्यूयं भूरिभागास्तपआदिसंपन्नास्ततो नारायणं भजतेति विधिः ॥ ५५ ॥ मे मया श्रुतम् ॥ ५६ ॥ एतत्पुराणकीर्तनादिफलं प्रपञ्चयितुमाह—एतदित्यष्टभिः ॥ ५७ ॥ यामक्षणं यामं क्षणं चेत्यर्थः । आत्मानमेव साक्षात्पुनाति नतु स्नानादिवद्देहमात्रम् ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ऋगाद्यधीत्य द्विजो मधुकुल्यादि यदनुविन्दते तत्फलमेतां पठित्वानुविन्दत इति ॥ ६२ ॥ किंच, प्रोक्तमिति ॥ ६३ ॥ ॥ ॥ ॥ ॥

१ 'श्रवणादरादिभिः' इति पाठः । २ 'अवश्यभावाः' इति मूले पाठः । टीकायां च 'संभावनायां लोट्' इत्यनन्तरं 'कथंभूताः सन्तः । न वश्यतस्ततो निवर्तयितुमशक्यो वा भाव आत्मा बुद्धिर्येषां ते । अतो भूरिभागाः' इति पाठः । ३ 'य एवत्' इति पाठः । ४ एतदग्रे 'श्लोकमेकं तदर्धं वा पादं पादार्धमेव वा' इत्यर्धमधिकं क्वचित् । ५ 'आयुष्यभाक्' इति पाठः । ६ 'पुमान्निष्पातको भवेत्' इति पाठः ।

राजन्य उदधिमेखलां पृथ्वीम् । संधिरार्षः ॥ ६४ ॥ अस्य पुराणस्यैवंप्रभावातिरेके कारणमाह—कलिमलानां संहतिं समूहं कालयति विनाशयतीति तथा । इतरत्र शास्त्रान्तरे ॥ ६५ ॥ शास्त्रप्रतिपादितं भगवन्तं नमस्करोति—तमिति द्वाभ्याम् । जगदुदयस्थितिसंयमात्मानो रजआदयः शक्तयो यस्य तम् । द्युपतिभिर्देवैरपि दुरवसितोऽज्ञातः स्तवः स्तोत्रं यस्य तम् ॥ ६६ ॥ उपचिताभिरुद्रिक्ताभिर्नवशक्तिभिः प्रकृतिपुरुषमहदहंकारतन्मात्ररूपाभिः स्व आत्मन्येवोपरचितं स्थिरं जङ्गमं चालयो यस्य तस्मै भगवते ॥ ६७ ॥ श्रीगुरुं नमस्करोति—स्वसुखेनैव निभृतं पूर्णं चेतो यस्य । तेनैव व्युदस्तोऽन्यस्मिन् भावो यस्य तथाभूतोऽप्यजितस्य रुचिराभिर्लीलाभिराकृष्टः सारः स्वसुखगतं स्थैर्यं यस्य सः । तत्त्वदीपं परमार्थप्रकाशकं श्रीभागवतं यो व्यतनुत तं नतोऽस्मीति

विप्रोऽधीत्याप्नुयात्प्रज्ञां राजन्योदधिमेखलाम् ॥ वैश्यो निधिपतित्वं च शूद्रः शुध्येत पातकात् ॥ ६४ ॥ कलिमल-
संहतिकालनोऽखिलेशो हरिरितरत्र न गीयते ह्यभीक्षणम् ॥ इह तु पुनर्भगवानशेषमूर्तिः परिपठितोऽनुपदं
कथाप्रसङ्गैः ॥ ६५ ॥ तमहमजमनन्तमात्मतत्त्वं जगदुदयस्थितिसंयमात्मशक्तिम् ॥ द्युपतिभिरजशक्रशंकराद्यैर्दुर-
वसितस्तवमच्युतं नतोऽस्मि ॥ ६६ ॥ उपचितनवशक्तिभिः स्व आत्मन्युपरचितस्थिरजङ्गमालयाय ॥ भगवत
उपलब्धिमात्रधाम्ने सुरऋषभाय नमः सनातनाय ॥ ६७ ॥ स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोऽप्यजितरुचिर-
लीलाकृष्टसारस्तदीयम् ॥ व्यतनुत[1] कृपया यस्तत्त्वदीपं पुराणं तमखिलवृजिनघ्नं व्याससूनुं नतोऽस्मि ॥ ६८ ॥ ॥
इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धार्थनिरूपणं नाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥ सूत उवाच ॥
यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवैर्वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ॥ ध्यानावस्थित-
तद्गतेन मनसा पश्यन्ति यं योगिनो यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥ १ ॥ पृष्ठे भ्राम्यदमन्द-
मन्दरगिरिग्रावाग्रकण्डूयनान्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पान्तु वः ॥ यत्संस्कारकलानुवर्तनवशाद्वेला-
निभेनाम्भसां यातायातमतन्द्रितं जलनिधेर्नाद्यापि विश्राम्यति ॥ २ ॥ ॥ ॥

॥ ६८ ॥ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे भावार्थदीपिकायां टीकायां द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥ त्रयोदशे पुराणानां संख्यामाह यथाक्रमम् ॥ दानं दानस्य माहात्म्यं श्रीमद्भागवतस्य च ॥ १ ॥ सर्वपुराणसंख्यादीनुपवर्णयिष्यंस्तत्प्रतिपाद्यं देवं प्रणमति—यमिति । स्तवैर्वेदैश्च स्तुन्वन्ति स्तुवन्ति उपनिषच्छब्दस्याकारान्तत्वं छन्दोनुरोधेन[2] । ध्यानेनावस्थितं निश्चलं तद्गतं च यन्मनस्तेन यस्यान्तं न विदुः सुरासुरगणाः ॥ १ ॥ क्षीरोदमथनादौ दुर्ज्ञेयत्वमेव प्रदर्शयितुं कूर्मावतारमनुस्मारयन्नाशिषः प्रार्थयते—पृष्ठे भ्राम्यन्नमन्दो मन्दरगिरिर्गरिष्ठो मन्दराचलस्तस्य ग्रावाणस्तेषामग्राणि तैः कण्डूयनात्तेन सुखेन निद्रालोर्निद्राशीलस्य । येषां श्वासानिलानां संस्कारास्तेषां कलाश्च लेशास्तदनुवर्तनवशाज्जलनिधेरम्भसां यातायातं न विश्राम्यति । ननु समुद्र-

१ व्यतनुत सविस्तरं व्याख्यातवान् । २ अङ्गादीनां समाहारद्वन्द्वे 'द्वन्द्वाच्चुदषहान्तात्—' इत्यनेन समासान्ते टचि प्रयोगोपपत्तौ छन्दोनुरोधेनेति व्याख्यानं विचारणीयम् ।

क्षोभादेव तन्न संस्कारवशात्तत्राह—वेलाक्षोभस्तस्य निभेन मिषेण ॥ २ ॥ पुराणसंहितानां संख्यास्तासां संभूतिं समाहारम् । अस्य तु श्रीभागवतस्य वाच्यं विषयः प्रयोजनं च दानं च तस्य पाठादेश्च माहात्म्यं निबोधत ॥ ३ ॥ त्रयोविंशत्त्रयोविंशतिः सहस्राणि । चतुर्विंशति चतुर्विंशतिः । शैवकं शिवपुराणम् ॥ ४ ॥ वाह्नमग्निपुराणम् । दशपञ्चसहस्राणि चत्वारि शतानि च ॥ ५ ॥ ६ ॥ स्कान्दं शताधिकैकाशीतिसहस्रम् ॥ ७ ॥ सौपर्णं गरुडपुराणमेकोनविंशदेकोन-

पुराणसंख्यासंभूतिमस्य वाच्यप्रयोजने ॥ दानं दानस्य माहात्म्यं पाठादेश्च निबोधत ॥३॥ ब्राह्मं दशसहस्राणि पाद्मं पञ्चोनषष्टि च ॥ श्रीवैष्णवं त्रयोविंशच्चतुर्विंशति शैवकम् ॥ ४ ॥ दशाष्टौ श्रीभागवतं नारदं पञ्चविंशतिः ॥ मार्कण्डं[1] नव वाह्नं च दशपञ्चचतुःशतम् ॥ ५ ॥ चतुर्दश भविष्यं स्यात्तथा पञ्चशतानि च ॥ दशाष्टौ ब्रह्मवैवर्तं लिङ्गमेकादशैव तु ॥ ६ ॥ चतुर्विंशति वाराहमेकाशीतिसहस्रकम् ॥ स्कान्दं शतं तथा चैकं वामनं दश कीर्तितम् ॥ ७ ॥ कौर्मं सप्तदशाख्यातं मात्स्यं तत्तु चतुर्दश ॥ एकोनविंशत्सौपर्णं ब्रह्माण्डं द्वादशैव तु ॥ ८ ॥ एवं पुराणसंदोहश्चतुर्लक्ष उदाहृतः ॥ तत्राष्टादशसाहस्रं श्रीभागवतमिष्यते ॥ ९ ॥ इदं भगवता पूर्वं ब्रह्मणे नाभिपङ्कजे ॥ स्थिताय भवभीताय कारुण्यात्संप्रकाशितम् ॥१०॥ आदिमध्यावसानेषु वैराग्याख्यानसंयुतम् ॥ हरिलीलाकथाव्रातामृतानन्दितसत्सुरम् ॥ ११ ॥ सर्ववेदान्तसारं यद्ब्रह्मात्मैकत्वलक्षणम् ॥ वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनम् ॥ १२ ॥ प्रौष्ठपद्यां पौर्णमास्यां हेमसिंहसमन्वितम् ॥ ददाति यो भागवतं स याति परमां गतिम् ॥ १३ ॥ राजन्ते तावदन्यानि पुराणानि सतां गणे ॥ यावन्न दृश्यते साक्षाच्छ्रीमद्भागवतं परम्[2] ॥ १४ ॥ सर्ववेदान्तसारं हि श्रीभागवतमिष्यते ॥ तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित् ॥ १५ ॥ निम्नगानां यथा गङ्गा देवानामच्युतो यथा ॥ वैष्णवानां यथा शंभुः पुराणानामिदं तथा ॥ १६ ॥ क्षेत्राणां चैव सर्वेषां यथा काशी ह्यनुत्तमा ॥ तथा पुराणव्रातानां श्रीमद्भागवतं द्विजाः ॥ १७ ॥ ॥ ॥

विंशतिः ॥ ८ ॥ महाभारतं त्वितिहासः । रामायणं च ऋषिप्रोक्तं काव्यम् । अतः पुराणानां संदोहः समूहश्चतुर्लक्षसंख्याक एव । इदानीमस्य वाच्यप्रयोजनादीन् दर्शयितुमाह—तत्रेत्यादिना ॥ ९ ॥ १० ॥ हरिलीलाकथानां व्रातः समूहः स एवामृतं तेनानन्दिताः सन्तः सुराश्च येन तत् ॥ ११ ॥ तन्निष्ठं तद्विषयम् ॥ १२ ॥ प्रौष्ठपद्यां भाद्रपद्याम् । हेमसिंहसमन्वितं सुवर्णसिंहासनारूढम् ॥ १३ ॥ १४ ॥ तद्रस एवामृतं तेन तृप्तस्य निर्वृतस्य ॥ १५ ॥ १६ ॥ १७ ॥ ॥

१ मार्कण्डं मार्कण्डेयम् । पृषोदरादिः । क्वचित्तु 'मार्कण्डेयं' इत्यपि पाठः । २ अयमेव पाठो बहुपुस्तकसंमतश्चक्रवर्त्यादृतश्च । 'यावद्भागवतं नैव श्रूयतेऽमृतसागरम्' इति पाठः क्वचित् ।

पारमहंस्यं परमहंसैः प्राप्यम् । नैष्कर्म्यं सर्वकर्मोपरमः । भक्त्या तच्छ्रवणादिपरो विमुच्यते ॥ १८ ॥ श्रीभागवतसंप्रदायप्रवर्तकरूपेण भगवद्ध्यानलक्षणं मङ्गलमाचरति—कस्मै ब्रह्मणे अतुलोऽसमः । अयं श्रीभागवतरूपः । पुरा कल्पादौ । तद्रूपेण ब्रह्मरूपेण नारदाय तद्रूपिणा नारदरूपिणा कृष्णाय व्यासाय । तद्रूपिणा योगीन्द्राय शुकाय तदात्मना शुकरूपेण । तत्परं सत्यं श्रीनारायणाख्यं तत्त्वं धीमहि । इति गायत्र्यैव यथोपक्रममुपसंहरन् गायत्र्याख्यब्रह्मविद्येयमिति दर्शयति ॥ १९ ॥ तमेव देवतारूपेण गुरुरूपेण च प्रणमति—नम इति द्वाभ्याम् । व्याचचक्षे व्याख्यातवान् ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ भावार्थ-

श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं यस्मिन्पारमहंस्यमेकममलं ज्ञानं परं गीयते ॥ तत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं तच्छृण्वन्विपठन्विचारणपरो[1] भक्त्या विमुच्येन्नरः ॥ १८ ॥ कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः पुरा तद्रूपेण च नारदाय मुनये कृष्णाय[2] तद्रूपिणा ॥ योगीन्द्राय तदात्मनाथ भगवद्राताय कारुण्यतस्तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि ॥ १९ ॥ नमस्तस्मै भगवते वासुदेवाय साक्षिणे ॥ य इदं कृपया कस्मै व्याचचक्षे मुमुक्षवे ॥ २० ॥ योगीन्द्राय नमस्तस्मै शुकाय ब्रह्मरूपिणे ॥ संसारसर्पदष्टं यो विष्णुरातममूमुचत् ॥ २१ ॥ भवे[3] भवे यथा भक्तिः पादयोस्तव जायते ॥ तथा कुरुष्व देवेश नाथस्त्वं नो यतः प्रभो ॥ २२ ॥ नामसंकीर्तनं यस्य सर्वपापप्रणाशनम् ॥ प्रणामो दुःखशमनस्तं नमामि हरिं परम् ॥ २३ ॥ इति श्रीमद्भागवते महापुराणेऽष्टादशसाहस्र्यां वैयासिक्यां पारमहंस्यां संहितायां द्वादशस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ छ ॥

॥ समाप्तोऽयं ग्रन्थः ॥

दीपिकामेतां भगवद्भक्तवत्सलाम्[4] ॥ परमानन्दपादाब्जभृङ्गश्रीः श्रीधरोऽकरोत् ॥ १ ॥ स्वबालचपलालापैः स्वलीलापरिनर्तितैः[5] ॥ प्रीयतां परमानन्दनृहरिः सद्गुरुः स्वयम् ॥ २ ॥ श्रीपरानन्दसंप्रीत्यै गुह्यं भागवतं मया ॥ तन्मतेनेदमाख्यातं[6] नतु मन्मतिवैभवात् ॥ ३ ॥ क्वेदं नानानिगूढार्थं श्रीमद्भागवतं क्व नु ॥ मन्दबुद्धिरहं कृष्णप्रेम किं किं न कारयेत् ॥ ४ ॥ ॥ इति श्रीमद्भागवते महापुराणे श्रीमद्भागवतभावार्थदीपिकायां श्रीधरस्वामिविरचितायां टीकायां द्वादशस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ श्रीकृष्णाय नमोऽस्तु ॥ ॥ ॥ ॥ ॥ ॥

१ 'शृण्वंस्तथ पठन्' इति पाठः । २ 'व्यासाय' इति पाठः । ३ 'भवे भवे' इत्यादिश्लोकद्वयं क्वचिन्नास्ति । ४ 'भक्तवल्लभाम्' इति पाठः । ५ 'परिवर्तितैः' इति पाठः । ६ आख्यातं व्याख्यातम् । 'विवृतं तन्मतेन' इति पाठः ।

BHĀGAVATA PURĀṆA

OF

KṚṢṆA DVAIPĀYANA VYĀSA

With Sanskrit Commentary Bhāvārthabodhinī of

SRĪDHARA SVĀMIN

(Containing Introduction in Sanskrit and English and an Alphabetical Index of Verses)

Edited by

Prof. J. L. SHASTRI

MOTILAL BANARSIDASS
Delhi ☐ Varanasi ☐ Patna

श्रीव्यासमहर्षिप्रोक्तं

श्रीमद्भागवतपुराणम्

श्रीधरस्वामिविरचितया

भावार्थबोधिनीनाम्न्या संस्कृतटीकया समुपेतम्

संस्कर्ता
आचार्य जगदीशलाल शास्त्री

मोतीलाल बनारसीदास
दिल्ली □ वाराणसी □ पटना